7119

1. Title Chāndogya Upnishada Bhāshya
2. Accession No. 5542
3. Folio No./Pages 131
4. Lines 10-12
5. Size 32 × 16Cm
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Not available
10. Beginning "ओम् नमः शिवाय ।। ओम् नमः सामवेदाय ओम्मिसेतद्दक्ष रमिसाधष्टाध्यायी छंदोग्योय निषत्तस्पाः..."
11. End "इति श्री गोविन्द भगवतपूज्य पादशिष्य परम्हंस परिव्राजकाचार्य श्री शंकर भगवान कृतछांदोग्योषानि षट्राष्प समाप्तं ग्रन्थ संख्या ।।40900।।"
12. Colophon Yes
13. Illustrations No
14. Source Received from P.L. Duggal, Modern School, New Delhi
15. Subject Upanishad Bhāshya
16. Revisor No
17. Au[illegible] Shri Shankar Bhagawat
18. Rem[illegible] [illegible] are with margin, Bound.

2

छान्दोग्य - उपनिषद् भाष्य
शांकर भाष्य
INDIA
Shri P. L. Duggle
Modern School
New Delhi

छां. शं. १

ॐ नमः शिवाय ॥ ॐ नमः सामवेदाय ॥ ओमित्येतदक्षरमित्याद्यष्टाध्यायी छान्दोग्योपनिषत् तस्याः संक्षेपतोऽर्थजिज्ञासुभ्य ऋजुविवरणमल्प-
ग्रन्थमिदमारभ्यते तत्र सम्बन्धः समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितमर्चिरादिमार्गेण ब्रह्मप्रतिपत्तिकारणं केवलं च
धूमादिमार्गेण चन्द्रलोकप्रतिपत्तिकारणं स्वभावप्रवृत्तानां च मार्गद्वयपरिभ्रष्टानां कष्टाधोगतिरुक्ता न चोभयोर्मार्गयोरन्यतरस्मिन्न-
पि मार्गे आत्यन्तिकी पुरुषार्थसिद्धिरिति अतः कर्मनिरपेक्षमद्वैतात्मविज्ञानं संसारगतित्रयहेतूपमर्देन वक्तव्यमित्युपनिषदारभ्य-
ते न चाद्वैतात्मविज्ञानादन्यत्रात्यन्तिकी निःश्रेयसप्राप्तिर्भवति सन्ति अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति विपर्यये च स स्वराड् भ-
वतीति तथा द्वैतविषयानृताभिसन्धस्य बन्धनं तस्करस्येव तप्तपरशुग्रहणे दाहः संसारदुःखप्राप्तिश्चेत्युक्त्वा अद्वैतात्मसत्याभिसन्धस्य अ-
तस्करस्येव तप्तपरशुग्रहणे बन्ध[illegible]दाहाभावः संसारदुःखनिवृत्तिर्मोक्षश्च अत एव न कर्मसहभाव्यद्वैतात्मदर्शनं क्रियाका-
रकफलभेदोपमर्देन सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्तेः कर्मविधिप्रत्यय इति चेत्
न कर्तृभोक्तृस्वभावविज्ञानवतः तज्जनितकर्मफलरागद्वेषादिदोषवतश्च कर्मविधानात् अधिगतसकलवेदार्थस्य कर्मविधानाद् द्वै-
तज्ञानवतोऽपि कर्मेति चेत् न कर्माधिकृतविषयस्य कर्तृभोक्त्रादिज्ञानस्य स्वाभाविकस्य सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्यनेनोपम-
र्दितत्वात् तस्मादविद्यादिदोषवत एव कर्माणि विधीयन्ते नाद्वैतज्ञानवतोऽत एव हि वक्ष्यति सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्व-
मेतीति तत्रैतस्मिन्नद्वैतविद्याप्रकरणेऽभ्युदयसाधनान्युपासनान्युच्यन्ते कैवल्यसंनिकृष्टफलानि चाद्वैतादीषद्विकृतब्रह्मविषयाणि

मनोमयः प्राणशरीरस्सादीनि कर्मसमृद्धिफलानि च कर्माङ्गसम्बन्धीनि रहस्यसामान्यान्मनोवृत्तिसामान्याच्च यथाद्वैतज्ञानं मनोवृत्तिमा-
त्रं तथान्यान्युपासनानि मनोवृत्तिरूपाणीत्यस्ति हि सामान्यं कस्तर्ह्यद्वैतज्ञानस्योपासनानां च विशेषः उच्यते स्वाभाविकस्यात्मन्यक्रिये
अध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्तकमद्वैतविज्ञानं रज्ज्वादाविव सर्पाद्यध्यारोपलक्षणाज्ञानस्य रज्ज्वादिस्वरूपनिश्च-
यः प्रकाशनिमित्तः उपासनं तु यथाशास्त्रसमर्थितं किञ्चिदालम्बनमुपादाय तस्मिन्समानचित्तवृत्तिसन्तानकरणं तद्विलक्षणप्रत्ययानन्तरित-
मिति विशेषः तान्येतान्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वादद्वैतज्ञानोपकारकाणि आलम्बनविषयत्वात् सुखसाध्यानि चेति पूर्वमुप-

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पु-
रुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः ॥ १ ॥ २

न्यस्यन्ते तत्र कर्माभ्यासस्य दृढीकृतत्वात् कर्मपरित्यागेनोपासन एव दुःखं चेतः समर्पयितुमिति कर्माङ्गविषयमेव तावदादावुपासनमुपन्यस्यते ओ-
मित्येतदक्षरमुद्गीथमुपासीत ओमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठं तस्मिन्हि प्रयुज्यमाने स प्रसीदति प्रियनामग्रहण इव लोक-
स्तदिहेति परं प्रयुक्तमभिधायकत्वात्तथार्चादिवच्छब्दस्वरूपमात्रं प्रतीयते तथा चार्चादिवत्परस्यात्मनः प्रतीकं सम्पद्यते एवं नामत्वेन प्रतीकत्वे-
न च परमात्मोपासनसाधनं श्रेष्ठमिति सर्ववेदान्तेष्ववगतं जपकर्मस्वाध्यायाद्यन्तेषु च बहुशः प्रयोगात्प्रसिद्धमस्य श्रैष्ठ्यमतस्तदेतदक्ष-
रं वर्णात्मकमुद्गीथभक्त्यवयवत्वादुद्गीथशब्दवाच्यमुपासीत कर्माङ्गावयवभूते ओङ्कारे परमात्मप्रतीके दृढामैकाग्र्यलक्षणां मतिं सन्तनुयात्

छा॰ शं॰
२

स्वयमेवश्रुतिरोंकारस्योद्गीथशब्दवाच्यत्वेहेतुमाह ओमितिह्युद्गायति ओमित्यारभ्य हि यस्मादुद्गायति अत उद्गीथ ओंकार इत्यर्थः तस्योपव्याख्या
नं तस्याक्षरस्योप व्याख्यानमेवमुपासनमेवंविभूत्येवंफलमित्यादिकथनमुपव्याख्यानं प्रवर्तत इति वाक्यशेषः एषां चराचराणां भूतानां पृथि
वीरसो गतिः परायणमवष्टंभः पृथिव्या आपो अप्सु ह्योता च प्रोता च पृथिवी अतस्ताः रसः पृथिव्या अपामोषधयो रसोऽप्परिणामत्वादोषधीनां
तासां पुरुषो रसोऽन्नपरिणामत्वात्पुरुषस्य तस्यापि पुरुषस्य वाग्रसः पुरुषावयवानां वाक्सारिष्ठा अतो वाक्पुरुषस्य रस उच्यते तस्या अपि वाच ऋक्
रसः सारतरा ऋचः साम रसः सारतरं तस्यापि साम्न उद्गीथः प्रकृतत्वादोंकारः सारतरः एवं स एष उद्गीथाख्य ओंकारो भूतादीनामुत्तरोत्तररसानामतिश २
येन रसो रसतमः परमः परमात्मप्रतीकत्वात् परार्ध्यः अर्धं स्थानं परं च तदर्धं च परार्धं तदर्हतीति परार्ध्यः परमात्मस्थानार्हः परमात्मवदुपास्यत्वा
दित्यभिप्रायो ऽष्टमः पृथिव्यादिरससंख्यायां यः पुद्गीथोयमुद्गीथः वाक्यग्रसस्त्वत्र कतमा सा ऋक्कतमत्तत्साम कतमो वा स उद्गीथः कतमा कत

कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति वागेवर्क्प्राणः सामोमित्येतदक्षरमुद्गीथस्तद्वा एतन्मिथुनं।। ४ ५ ।।इ

मेति वीप्सा आदरार्था।। ननु च बह्वीनां जातिपरिप्रश्ने डतमच् न तु सह जातिर्बहुत्वे कथं डतमच्प्रयोग इति नैष दोषः जातौ परिप्रश्नो जातिपरिप्रश्न इत्येवं विग्रहे जातौ ब
ह्वीनां बहुत्वोपपत्तेर्न तु जातेः परिप्रश्न इति विग्रहे न तु जातेः परिप्रश्न इत्यस्मिन्विग्रहे कतमः कठ इत्युदाहरणमुपपन्नं जातौ परिप्रश्न इत्यत्र तु न प्रसज्ज
ते तत्रापि कठादिजातौ बह्व्यः व्यक्तय इति बहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः यदि जातेः परिप्रश्नः स्यात् कतमा कतमर्गित्यादावृक्संख्यानं कर्तव्यं स्यात् विमृष्टं भ
वति विमर्शः कृतो भवतीति विमर्शो हि कृते प्रतिवचनोक्तिरुपपन्ना वागेवर्क्प्राणः साम वागृचोरेकत्वेपि नाष्टमत्वव्याघातः पूर्वस्माद्वाक्यांतरत्वाद्दृष्टि
गुणाप्ति रूपे ओमित्येतदक्षरमुद्गीथ इति वाक्प्राणौ ऋक्सामयोनी इति वागेवर्क्प्राणः सामेत्युच्यते यथाक्रमं ऋक्सामयोर्वाक्प्राणयोर्ग्रहणे हि राम॰ २
सर्वासामृचां सर्वेषां च साम्नामवरोधः कृतः स्यात्सर्वर्क्सामावरोधे च ऋक्साममसाध्यानां कर्मणामवरोधः कृतः स्यात्तद्व ।। ६ ।। ७ ।।

6

२ रोधे च सर्वे कामा अवरुद्धाः स्युरोमित्येतदक्षरमुद्गीथ इति भक्त्याशंका निवर्त्यते तद्वा एतदिति मिथुनं निर्दिश्यते किं तन्मिथुनमित्याह यद्वाक्च प्राणश्च सर्व
ऋक्सामकारणभूतौ मिथुनं ऋक्साम चेति ऋक्सामकारणभूतौ ऋक्सामशब्दौ क्वावित्यर्थः ननु सतं चेत्येक ऋक्साम च मिथुनमन्यथा हि वाक्प्राणश्चेवे
ऋक् मिथुनमृक्साम चापरं मिथुनमिति द्वे मिथुने स्यातां तथा च तदेतन्मिथुनमित्येकवचननिर्देशोऽनुपपन्नः स्यात्तस्माद्दृक्सामयोन्योर्वाक्प्राणयोरेव

7

यद्वाक्च प्राणश्चर्क्च साम च तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे सꣳसृ
ज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ।। ६।।

मिथुनत्वं तदेतदेवंलक्षणं मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते एवं सर्वकामाप्तिगुणविशिष्टं मिथुनमोंकारे संसृष्टं विद्यत इत्योंकारस्य सर्वका
माप्तिगुणवत्त्वं सिद्धं वागप्राणरूपत्वमोंकारस्य प्राणनिष्पाद्यत्वं च मिथुनेन संसृष्टत्वं मिथुनस्य कामापयितृत्वं प्रसिद्धमिति दृष्टांतः उच्यते यथा लो
के मिथुनो मिथुनावयवौ स्त्रीपुंसौ यदा

छां॰ शं॰

मागच्छतो ग्राम्यधर्मतया संयुज्येयातां तदाप्ययतः प्रापयत अन्योन्यस्येतरेतरस्य कामं तथास्वात्मानुप्रविष्टेन मिथुनेन कामाप्तिगुणत्वमोंकारस्य
सिद्धमित्यभिप्रायः तदुपासकोऽप्युद्गाता तद्धर्मा भवतीति आपयिता ह वै कामानां यजमानस्य भवति य एतदक्षरमेवमाप्तिगुणवदुद्गीथमुपास्ते त
स्यैतद्यथोक्तं फलमित्यर्थः तं यथा यथोपास्ते तत्तदेव भवतीति श्रुतेः समृद्धिगुणवांश्चोंकारः कथं तद्वा एतत्प्रकृतमनुज्ञाक्षरमनुज्ञा च साक्षरं
चेतदनुज्ञा अनुमतिरोंकारः इत्यर्थः कथमनुज्ञेत्याह श्रुतिरेव यद्धि किंच यत्किंच लोके ज्ञानं धनं वानुजानाति विद्वान्धनी वा तत्रानुमतिं कुर्व

8

आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते
तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धि॥

न्नोमित्येव तदाह तथा च वेदे त्रयस्त्रिंशदित्योमिति होवाचेत्यादि तथा लोकेऽपि तवेदं धनं गृह्णामीत्युक्त ओमित्याहान्यतरः अत एषा उ एव एषैव समृद्धि
र्यदनुज्ञा या अनुज्ञा सा समृद्धिः तन्मूलत्वादनुज्ञायाः समृद्धो ह्योमिति अनुज्ञां ददाति तस्मात्समृद्धिगुणवानोंकार इत्यर्थः समृद्धिगुणोपासक
त्वात्तत्तद्धर्मा सन्समर्द्धयिता ह वै कामानां यजमानस्य भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते इत्यादि पूर्ववत् इदानीमक्षरं स्तौति॥

राम॰ ३

उपास्यत्वात् प्ररोचनार्थं कथं तेनाक्षरेण प्रकृतेनेयमृग्वेदादिलक्षणा त्रयी विद्या त्रयीविद्याविहितं कर्मेत्यर्थः नहि त्रयी विद्यैवाश्रावणादिभिर्वर्त्त
ते कर्म तु तथा प्रवर्त्तत इति कथं ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीति लिंगाच्च सोमयाग इति गम्यते तच्च कर्मैतस्यैवाक्षरस्याप
चित्यै पूजार्थं परमात्मप्रतीकं हि तत् तदपचितिः परमात्मन एव सास्य कर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इति स्मृतेः महिम्नाऽस्य रसेन किंचै
तस्यैवाक्षरस्य महिम्ना महत्त्वेनर्त्विग्यजमानादिप्राणैरित्यर्थः तस्यैतस्यैवाक्षरस्य रसेन व्रीहियवादिनिर्वृत्तेन हविषेत्यर्थः यागहोमा

9

र्यदनुज्ञा समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते तेने
यं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै

घ्यन्ते रसेनाक्षिप्यते तच्चादित्यमुपतिष्ठते ततो वृष्ट्यादिक्रमेण प्राणोऽन्नं च जायते प्राणैरन्नेन च यज्ञस्तायते अत उच्यते अक्षरस्य महिम्ना रसेनेति तत्राक्षरं वि
द्वानं वतः कर्म कर्तव्यमिति स्थितं मा क्षिपति तेनाक्षरेणोभौ यश्चैतदक्षरमेवं यथा व्याख्यातं वेद यश्च कर्ममात्रविदक्षरयाथात्म्यं न वेद तावु
भौ कुरुतः कर्म तयोश्च कर्मसामर्थ्याद्देवफलं स्यात् किं तत्राक्षरयाथात्म्यवि॥

छां॰ शे॰
४

णानेनेति दृष्टं हि लोके हरीतकीं भक्षयतोस्तद्रसाभिज्ञेतरयोर्विरेचनं नैवं यस्मान्नाना तु विद्या चाविद्या च भिन्ने हि विद्याविद्ये तु शब्दः पक्षव्यावृत्त्यर्थः ओंकारस्य कर्माङ्गत्वमात्रविज्ञानमुद्गीथावयवमात्रविषयमुपासनातिरिक्तं विज्ञाने नैव रसतमाप्तिसमृद्धिगुणवद्विज्ञानं किं तर्हि ततोऽभ्यधिकं तस्मात्तदङ्गाधिक्यात्फलाधिक्यं युक्तमित्यभिप्रायो दृष्टं हि लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात्फलाधिक्यं

महिम्ना रसेन तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति १

तस्माद्यदेव विद्यया विज्ञानेन युक्तः सन्करोति कर्म श्रद्धयास्तिक्यबुद्ध्या उपनिषदा योगेन युक्त इत्यर्थः तदेव कर्म वीर्यवत्तरमविद्वत्कर्मणोऽधिकफलं भवतीति विद्वत्कर्मणो वीर्यवत्तरत्ववचनादविदुषोऽपि कर्म वीर्यवद्भवतीत्यभिप्रायो न चाविदुषः कर्मण्यनधिकारः उषस्तिप्रकरणे विदुषामप्यार्त्विज्यदर्शनात्समानमाप्तिसमृद्धिगुणवदक्षरमित्येकमुपासनं मध्ये प्रयोजनं दर्शनात् अनेकैर्हि विशेषगुणैरनेकधोपास्यत्वात् एवमेतस्यैव प्रकृतस्योद्गीथाख्यस्याक्षरस्योपव्याख्यानं भवति १

र.म०
४

1.0

देवासुराः देवाश्चासुराश्च देवा दीव्यतेर्द्योतनार्थस्य शास्त्रोद्भासिता इन्द्रियवृत्तयः असुरास्तद्विपरीताः स्वेष्वेवासुषु विष्वग्विषयासु प्राणनक्रियासु रमणात्स्वाभाविकास्तम आत्मिका इन्द्रियवृत्तय एव ह वै इति पूर्ववृत्तोद्भासकौ निपातौ यत्र यस्मिन्निमित्ते इतरेतरविषयापहारलक्षणे संयेतिरे सम्पूर्वस्य यततेः संग्रामार्थत्वमिति संग्रामं कृतवन्त इत्यर्थः शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविकास्तमोरूपा इन्द्रियवृत्तयोऽसुरास्तथा तद्विपरीताः शास्त्रार्थविषयविवेकज्योतिरात्मानो देवाः स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ता इतरेतराभिभवोद्भवरूपः संग्राम इव सर्वप्राणिषु प्रतिदेहं देवासुरसंग्रामो

य
१

4

देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम
इति ते ह नासिक्यं प्राणमुद्गीथमुपासाञ्चक्रिरे तं हासुराः पाप्मना विविधुः ॥ ७ ॥ २

ऽनादिकालप्रवृत्त इत्यभिप्रायः स इह श्रुत्याख्यायिकारूपेण धर्माधर्मोत्पत्तिविवेकविज्ञानाय कथ्यते प्राणविशुद्धिविज्ञानविधिपरतया अत उभयेऽपि देवासुराः प्रजापतेरपत्यानि प्रजा वै प्रजापतिः कर्मज्ञानाधिकृतः पुरुषः पुरुष एवोक्थमयमेव महान्प्रजापतिरिति श्रुत्यन्तरात् तस्य हि शास्त्रीयाः स्वाभाविकाश्च करणवृत्तयो विरुद्धा अपत्यानीव तदुद्भवत्वात् तत्र उत्कर्षापकर्षलक्षणनिमित्ते ह देवा उद्गीथं उद्गीथभक्त्युपलक्षितमौद्गात्रं कर्माजह्रुराहृतवन्तः तस्यापि केवलस्याहर्तुमसंभवात् ज्योतिष्टोमाद्याहृतवन्त इत्यभिप्रायः ७

छा॰ शं॰
५

तत्किमर्थमाजह्रुरित्युच्यते अनेन कर्मणैनानसुरानभिभविष्याम इत्येवमभिप्रायाः सन्तः। यदा च तदुद्गीथं कर्माभिजिहीर्षवस्तदा ते ह देवा नासिक्
यं भवं चेतनावन्तं घ्राणं प्राणमुद्गीथकर्तारं उद्गीथभक्त्योपासांचक्रिरे कृतवन्त इत्यर्थः। नासिक्यप्राणदृष्ट्योद्गीथाख्यमक्षरमोंकारमुपासांचक्रिर इत्यर्थः। २
एवं हि प्रकृतार्थपरित्यागोऽप्रकृतार्थोपादानं च न कृतं स्यात्। खल्वेतस्येत्याक्षरस्येति ओंकारोऽत्र उपास्यतया प्रकृतो न तूद्गीथभक्तिः कर्मा
स्यावयवः इदानीमेव कथं नासिक्यप्राणदृष्ट्याओंकारमुपासांचक्रिर इत्याह नेवशेषः उद्गीथकर्मविहितकर्तृप्राणदेवतादृष्ट्या उद्गीथभक्त्यवयवस्य ओंकारस्य

तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धोऽथ वा ह वाचमुद्गीथमुपासांचक्रि
रे तां हासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च ॥ ॥ ध ॥ ॥

पाप्मा हेनविवक्षितो न स्वतेजोमहात्म्यर्थेन कर्मानुष्ठानं तरति पुरुषमेवोकृतमेवं देवैर्वृतमुद्गातारं हासुराः स्वाभाविकतमसा स्वात्मनो ज्योतिरूपं नासिक्यप्राण
रां देवं स्वाख्येन पाप्मना धर्मासंगरूपेण विविधुर्विद्धवन्तः संसर्गं कृतवन्त इत्यर्थः। स हि नासिक्यः प्राणः कल्याणगन्धग्रहणाभिमानासंगाभिभूतविवे
कविज्ञानो बभूव स तेन दोषेण पाप्मसंसर्गी बभूव तदिदमुक्तं असुराः पाप्मना विविधुरिति यस्मादासुरेण पाप्मना विद्धः तस्मात्तेन पाप्मनाप्रेरितो प्राणो
दुर्गन्धिग्राहकः प्राणिनामतस्तेनोभयं जिघ्रति लोकः सुरभि च दुर्गन्धि च पाप्मना ह्येष यस्मादिद्धः उभयग्रहणमविवक्षितं यत्रोभयं हविरार्तिमार्च्छतीति यद्वत्
यद्देवेषु प्रतिरूपं जिघ्रतीति तत्समानप्रकरणश्रुतेर्मुख्यप्राणस्योपास्यतायतद्विमुद्गीतानुभवार्थोऽयं विचारः अतः प्रवर्तितोऽतत्स्वसुरादिदेवताः क्रमेण विचार्य
सुरेणापाप्मना विद्धा इत्यपोह्यन्ते समानमन्यत् अथ ह वाक्चक्षुः श्रोत्रमनसां युक्ताऽप्यन्यास्तथासमनादिदेवतादृष्ट्याणमुखल्वेता देवताः पाप्मभिरितिक्र

पाप्मना ह्येषा विद्धाऽथ ह चक्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धमथ
ह श्रोत्रमुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धमथ ह मन
उद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुः ॥ ध ॥ ध ॥ ध ॥ ध ॥ ध ॥ ध ३

संतताद्यासुरेण विद्धत्वात् प्राणादिदेवता अपोह्य ध्यानेतरेयरएवायं प्रसिद्धो मुखे भवो मुख्यः प्राणः तमुद्गीथमुपासांचक्रिरे तं हासुराः पूर्ववत्प्राप्य विदध्वंसुर्विन
ष्टा अभिमानमात्रेण अकृतार्थाः किं चिरपि प्राणस्य कथं विनष्टा इत्यत्र दृष्टान्तमाह यथा लोके अश्मानमाखणमशक्यं खनित्रादिभिरपि भेत्तुं न शक्यो अ
खणमाखणः तम् तासामर्थ्याद्वोष्टः पांसुपिण्डः ऋत्वाऽणाश्मनि ॥ ध ॥ ध ॥ ध ॥ ध ॥ ३

छां॰उ॰
६

सिद्धोऽश्मभेदनाभिप्रायेणात्मसाश्मनः किं विध्वस्यकृत्वा स्वयं विध्वंसेत विदीर्येत तैवं विध्वस्तमुरस्पर्थः एवं विध्वस्तेऽसुरैर्धर्षितत्वात्प्राणादूसेवं विदः प्राणात्म
भूतस्येदं फलमाह यथाश्मानमिसेव एवं दृष्टांत एवं हैवं स विध्वंसते विनश्यति कोसौ विसाहयएवं विदियथोक्तप्राणविदिपापंतस्त्वर्हेकं तुकामपतत्रघ्यतिय
श्चैनमभिदासतिहिनस्तिप्राणविदं प्रस्त्वाक्रोशत्नादिप्रयुंक्ते सोप्येवमेवविध्वंसतइत्यर्थः यस्मात्स एष प्राणवित्प्राणभूतत्वाद्श्माखणएवाश्मा
खणोऽधर्षणीय इत्यर्थः ननु नासिकोपि प्राणोवायुत्मा पथामुख्यः तत्र नासिकः प्राणः पाप्मना विद्धः प्राण एव सन्न मुख्यः कथं नैष दोषो वायुत्मापि सन्

त्स्मात्तेनोभयं स्मे कल्पयते संकल्पनीयं चासंकल्पनीयं च पाप्मनास्येतद्विद्धम् अथ हय एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रि ५
रे तं हासुरा ऋत्वा विदध्वसुर्यथाश्मानमाखणमृत्वायथाश्मानमाखणमृत्वा विध्वंसतएवं ~~विध्वंसेतैवं~~ हैवसविध्वंसते य त्वाविध्वंसैतैवं
तोय एवं विदि पापं कामयते यश्चैनमभिदासति स एषोश्माखणो नैवैतेन सुरभि न दुर्गंधि विजानात्यपहतपाप्मा ह्येष तेनयद
श्नाति यत्पिबति ॥ ६ ॥

मुख्यः स्थानदेवतावत्नीपक्षत्वान्न विद्धो नासिक्यस्तु स्थानकरणवैगुण्याद्धि दूरतिपुं पंथायस्मात्पशिक्षावत्सुरूपाश्रयाः कार्यविशेषं कुर्वंति नामहस्तगता
स्तद्दोषवत्प्राणस्य विवत्वाद्धि हि घ्राणदेवतानमुख्योयस्मान्नस्माच्चैवैतेनसुरभिदुर्गंधिवाविजानाति घ्राणेनैवतदुभयं विजानाति लोकौ तस्मात्पापकार्य
दर्शनादपहतोविनाशि ॥ ॥ ॥ ७

तोऽपनीतः पाप्मापस्मात्सोपमपहत पाप्मा सोयं विशुद्ध इत्यर्थः यस्माच्चात्मंभरयः कल्याणाघासंगवत्वात्घ्राणादयो न तथात्मंभरिर्मुख्यः किं
तर्हि सर्वार्थः कथमित्युच्यते तेन मुख्येनयदश्नाति यत्पिबति लोकस्तेनाशितेन पीतेन च तेतरान्प्राणान्घ्राणादीनवति पालयति नहि तेषां स्थितिर्भव
तीत्यर्थः अतः सर्वंभरः प्राणोतो विशुद्धः कथं पुनर्मुख्याशितपीताभ्यां स्थितिरितरेषां गम्यतइत्युच्यते एतंमुख्यं प्राणं मुख्य प्राणस्येतिमंत्रपाने
त्यर्थोऽन्ततोंतमरणकालेऽविन्दत्वाऽलब्ध्वा उत्क्रामति प्राणसमुदायइत्यर्थः प्राणो हि न शक्रोत्यशितुं पातुं वाऽनाशितो नेति प्रसिद्धा घ्राणा

तेनेतरान्प्राणानवसेतमुखवांतन्तो विन्दोत्क्रामति व्याददात्येवांतत इतितंहांगिरा उद्गीथमुपासां चक्रएतमुखवांगि
रसं मन्यंतेंऽगानां यद्रसस्तेनेतंहबृहस्पतिरुद्गीथमुपासां चक्रएतमु एव बृहस्पतिं मन्यंते वाग्धि बृहती ॥ ८

त्कि लापसंदृश्यते तुत्क्रांतौ प्राणस्याशितपातोयाददाते वास्यविहारणं करोतीत्यर्थः तद्धिनालाभे उत्क्रांतस्य लिंगं तं हांगिराः तं मुख्यं प्राणं
हअंगिरा इत्येवंगुणमुद्गीथमुपासांचक्रे उपासनं कृतवान्कोदाल्भ्य इतिवक्ष्यमाणेन संबध्यते तथा बृहस्पतिरितिसापास्यइतिषोपासांच
क्रे वकरसेवसंवंधकृतवेतः केचिदेतमुखवांगिरसंबृहस्पतिमायास्यप्राणं मन्यंत इति वचनान्नभवत्येवं यस्मात्क्रतासंभवेसंभवति तु यथा
क्ततमषिवोदनापामपिक्रसंतरात्रस्माछक्तर्ष्विवरत्वावसते एवमेवसंतमृषिमपि तथामाध्यमागत्स्मरोविश्वामित्रोवामदेवोत्रिरिसादिष्टु ७

15

छां॰ शं॰

16

षीनेव प्राणमापाद्यतिश्रुतिः तथैवं ज्ञानपूर्वीन्प्राणोपासकानेंगिरो बृहस्पत्यापस्यान्प्राणांकोऽसभेदविज्ञानाय प्राणोह पिता प्राणो मातेसा
दिवचत स्मादृषिरंगिरा नाम प्राणएवसन्नात्मानमंगिरसं प्राणमुद्गीथमुपासांचक्रे सेतघत्पस्मात्सोंगानां प्राणाः सन्रसः तेनासावंगिरस
ः तथासावोबृहस्पतः पतिस्तिर्मसो बृहति सम्पाघघस्मा दास्यादयति निर्गच्छतितेनापास्य स्ववि प्राणएवमन्निसर्थः तथामापुपासकत्राप्ता
नमेवांगिरसादिगुणां प्राणमुद्गीथमुपासीतेसर्थोनिकेवलमंगिरप्रभृतयः उपासांचक्रिरे तंहवकोनामदाल्भ्योरल्भसापसंदाल्भ्योविदां

तस्मादाषयतिस्नेन तं ह हापामसुद्गीथमुपासांचक्राणं तमुराचापासंमन्यंत आस्माघद्यतेतेनतं ह बको दाल्भ्यो विदांचकार स
ह नैमिशीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त
इत्यध्यात्मं ॥२३॥ ३ ॥ २

चकारयथादर्शितं प्राणं विज्ञातवानविदित्वा च स ह नैमिशीयानां सत्रिणामुद्गाता बभूव स च प्राणविज्ञानसामर्थ्याद्द्वेभ्यो नैमिशीयेभ्यः
कामानागायति स्म हागीतवान्किलेत्यर्थः तथान्योप्युद्गाता आगाता ह वै कामानां भवति य एवं विद्वान्यथोक्तगुणं प्राणमक्षरमुद्गी
थमुपास्ते तस्यैतद्दृष्टफलमुक्तं प्राणात्मभावस्त्वदृष्टो देवो भूत्वा देवानप्येतीतिश्रुतेः सिद्धमेवेत्यभिप्रायः इत्यध्यात्ममेतदात्म
विषयमुद्गीथोपासनमित्युक्तोपसंहारोऽधिदैवतोद्गीथोपासनं वक्ष्यमाणं बुद्धिसमाधानार्थः २ ॥ ॥ ७ ॥

राम॰

17

अथानंतरमधिदैवतं देवताविषयमुद्गीथोपासनं प्रस्तुतमित्यर्थोनेकधोपास्यत्वादुद्गीथस्य यएवासावादित्यस्तपति तमुद्गीथमुपासीतादित्यदृष्ट्योद्गी
थमुपासीतेत्यर्थः ननु तमुद्गीथमित्युद्गीथशब्दोक्षरस्य वाची सन्कथमादित्ये वर्तते इति उच्यते उद्यन्नुद्गच्छन्वा एष प्रजाभ्यः प्रजार्थमुद्गायति नह्यनामनो
सस्यर्यनिष्पत्तिस्यादेः पंक्तिः स्यात् अतउद्गायन्निवयथैवोद्गाताऽन्नार्थमतउद्गीथः सवितेत्यर्थः किंचोद्यन्नैशंतमस्तज्जं च भयं प्राणिनामपहंति
तमेवंगुणं सवितारं यो वेद सोपहंता नाशयिता ह वै भयस्य जन्ममरणादिलक्षणस्यात्मनस्तमसश्च तत्कारणस्याज्ञानलक्षणस्य भवति यद्यपिस्थान

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति उद्यंस्तमो भयमपहंत्यपहंता ह वै भयस्य त
मसो भवति य एवं वेद समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा
एतमिमममुं चोद्गीथमुपासीत अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स ॥ ७ ॥ ७ ॥ २

नभेदात्प्राणादित्यौ भिन्नाविव लक्ष्येते तथापि न स्वतत्त्वभेदस्तयोः कथं समान उ एव तुल्य एव प्राणः सवित्रा गुणतः सविता च प्राणेन यस्मादुष्णो
यं प्राणः उष्णश्चासौ सविता किंच स्वर इतीमं प्राणमाचक्षते कथयंति तथा स्वर इति चामुं सवितारं यस्मात्प्राणः स्वरत्येव न पुनर्मृतः प्रत्यागच्छति
सविता त्वस्तमित्वा पुनः पुनरहन्यहनि प्रत्यागच्छत्यतः प्रत्यास्वरोऽस्मात्स्वरः गुणतो नामतश्च समानावितरेतरं प्राणादित्यावतस्तत्त्वाभेदादेतं प्राण
मिमममुं चादित्यमुद्गीथमुपासीतात्यथ खल्विति प्रकारांतरेणोपासनमुद्गीथस्योच्यते व्यानमेव व्यस्त्प्राणात्लक्षणं प्राणस्यैव वृत्ति ७ ७ ७

विशेषमुद्गीथमुपासीत चक्षुरादीन्(?) तत्तं निरूप्यते यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं बहिर्निःसारयति स प्राणाख्यो वायोर्वृत्तिविशेषः यदपानि-
त्यपश्वसिति ताभ्यामेवान्तराकर्षति वायुं सोऽपानाख्या वृत्तिः ततः किमित्युच्यते अथ य उक्तलक्षणयोः प्राणापानयोः संधिरन्तरा वृत्तिविशेषः स
व्यानो यः सांख्यादिशास्त्रप्रसिद्धो वायुः स विशेषणानिरूपणात्(?) सो व्यानस्याभिप्रायः कस्मात्पुनः प्राणापानौ हित्वा महता यासेन व्यानस्यै-
वोपासनमुच्यते वीर्यवत्कर्महेतुत्वात् कथं वीर्यवत्कर्महेतुत्वमित्याह यो व्यानः सा वाग्व्यानकार्यत्वाद्वाचो यस्माद्व्याननिर्वर्त्या वाक् तस्मादप्राण-

प्राणोऽपरपानिति(?) यो व्यानो यथ यः प्राणापानयोः संधिः स व्यानो यो व्यानः सा वाक् तस्मादप्राणन्ननपानन्वाचमभिव्याहरति या
वाक्सर्क्तस्मादप्राणन्ननपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्ननपानन्साम गायति यत्साम स उद्गीथस्तस्माद-
प्राणन्ननपानन्नुद्गायति अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्रा-
णन्ननपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ ३ ॥ ४ ॥ ५ ॥ ३ ॥

न्ननपानन् प्राणापानव्यापारावकुर्वन्वाचमभिव्याहरत्युच्चारयति लोके तथा वाग्विशेषामृचम् ऋक्संस्थं च साम साम्नावयवं चोद्गीथमप्राणन्ननपानन्व्या-
नेनैव निर्वर्तयतीत्यभिप्रायः न केवलं वागाद्यभिव्याहरणमेवातोऽस्मादन्यान्यपि यानि वीर्यवन्ति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि यथाग्नेर्मन्थनमा-
जेर्मर्यादायाः सरणं धावनं दृढस्य धनुष आयमनमाकर्षणमप्राणन्ननपानंस्तानि करोत्यतो विशिष्टो व्यानः ॥ ३ ॥ ३ ॥ ३ ॥

प्राणादिवृत्तिभ्यो विशिष्टः सोपासनेऽप्यायः फलवत्त्वाद्राजोपासनवत् एतस्य हेतोरेतस्मात्कारणाद्व्यानमेवोद्गीथमुपासीत नान्यद्वृत्त्यन्तरं कर्मवीर्यवत्तरत्वं फ-
लं अथ खलूद्गीथाक्षराण्युपासीत अक्षराणि नामाक्षराणि(?) तो विशिनष्टि उद्गीथ इति उद्गीथनामाक्षराणीत्यर्थो नामाक्षरोपासनेऽपि नामवत एवोपास-
नं कृतं भवेदमुष्मिन्नार्श इति यद्वत् प्राण एवोदुत्तिष्ठतिभिन्नः सन् प्राणदृष्टिः कथं प्राणस्योत्त्वमित्याह प्राणेन ह्युत्तिष्ठति सर्वोऽप्राणस्य बसादर्शनात् अतोऽस्त्युत्प्रा-
णे सच्च सामान्यं वाग्गीर्वाचो ह गिर इत्याचक्षते शिष्टास्तथान्नं थमन्ने हीदं सर्वं स्थितमतोऽस्त्यन्नस्य थकारस्य च सामान्यं त्रयाणां श्रुत्युक्तानि सामान्यानि तेनानुरू-

अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदं सर्वं स्थितं द्यौरेवोदन्तरि-
क्षं गीः पृथिवी थमादित्य एवोद्वायुर्गीरग्निस्थं सामवेद एवोद्यजुर्वेदो गीरृग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति
य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्ते ॥ ७ ॥ ३ ॥

पृथिव्यादिदृष्टिश्चानन्तरमेवोच्यते(?) उच्चैःस्थानादन्तरिक्षं गीर्गिरणाल्लोकानां पृथिवी थं प्राणिस्थानादादित्य एवोदूर्ध्वत्वाद्वायुर्गीरग्न्यादीनां गिरणादग्निस्थं यज्ञीय-
कर्मावस्थानात्सामवेद एवोत्स्वर्गसंस्तुतत्वात् यजुर्वेदो गीर्यजुषा प्रत्तस्य हविषो देवतानां गिरणात् ऋग्वेदस्थम् ऋच्यध्यूढत्वात्साम्न उद्गीथाक्षरोपास-
नफलमधुनोच्यते दुग्धे दोग्ध्यस्मै साधकाय कासौ वाक् दोहं कोऽसौ दोह इत्याह यो वाचो दोहः ऋगादिशब्दसाध्यं फलमित्यभिप्रायस्तं वाचो दोहं स्व-
यमेव वाग्दुग्ध्यात्मानमेव दोग्धि किंवा ॥ ३ ॥ ३ ॥

छां०शं०
५

नवान्नभत्तान्नो न्नारस्त्वरी त्राग्रिर्भवति यरात्तानिमथौ त्कानिरावंयथो त्करागाम्पुद्गीथाक्षराणिविद्वान्सन्नुपास्ते उद्गीथस्सथवल्लिरानीमाशीः समृद्धिराशिषः कामस्समृद्धिर्यथा भवेत्तदुच्यत इत्ति वाक्यशेषः उपसरणान्युपसर्तव्यान्युपगन्तव्यानि ध्येयानीत्यर्थः कथमित्युपासीतैवमुपासीत यथा येन साम्नायेन सामविशेषेण स्तोष्यन्स्तुतिं करिष्यन्स्यात् तद्वेदज्ञाता तत्साम उपधावेदुपसरेच्चिंतयेदुत्पत्त्यादिभिर्यस्यामृचि तत्साम तां चर्चमुपधावेद्देवतादिभिर्यदार्षेयं सामतदृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेद्येन छन्दसा गायत्र्यादिना स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः

द्गीथस्सयथवल्याशीःसमृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेद्यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेद्येन छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तं स्तोममुपधावेद्यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेदात्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृध्येत यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति॥ ७ ॥ ३ ॥

स्यात्तं स्तोमं गक्र लसक तेगास्तिना हात्मनेपरं स्तोष्यमाण इति तं स्तोममुपधावेद्यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेदृषिष्टा त्रादिभिरात्मानमुद्गातास्वं रूपं गोत्रनामादिभिः सामादि क्रमेण स्वं चात्मानमन्ततोऽन्त उपसृत्य कामं ध्यायन्नप्रमत्तः स्वरोष्मव्यञ्जनादिभ्यः प्रमादमकुर्वन्सन्ततोऽभ्याशः क्षिप्रमेव ह यद्यत्रास्मा एवंविदे स कामः समृध्येत समृद्धिं गच्छेत्कोऽसौ यत्कामो यः कामोऽस्य सोऽयं यत्कामः सन्स्तुवीतेति ३ ॥ ३ ॥ ३

राम०
५

ओमित्येतदक्षरमित्यादि प्रकृतस्याक्षरस्य पुनरुपादानमुद्गीथाक्षराद्युपासनान्तरितत्वादन्यत्र प्रसंगो माभूदित्येवमर्थम् प्रकृतस्यैवाक्षरस्याऽमृताभयगुणविशिष्टस्योपासनं विधातव्यमित्यारम्भः ओमित्यादि व्याख्यातं देवा वै मृत्योर्बिभ्यतः किं कृतवन्त इत्युच्यते त्रयीं विद्यां त्रयीविहितं कर्म प्राविशन्प्रविष्टवन्तो वैदिकं कर्म प्रारब्धवन्त इत्यर्थः तन्मृत्योस्त्राणं मन्यमानाः किं च ते कर्मण्यविनियुक्तैश्छन्दोभिर्मन्त्रैर्जपहोमादि कुर्वन्त आत्मानमकर्मान्तरेष्वच्छादयन्नच्छादितवन्तस्तद्यस्मादेभिर्मन्त्रैरच्छादयंस्तत्तस्माच्छन्दसां मन्त्राणां छादनाच्छन्दस्त्वं प्रसिद्धमेव तांस्तत्र देवान्कर्मपरान्मत्स्यघातक इव मत्स्यमुदके नातिगम्भीरे परिपश्येद्वडिशोदकस्रावोपायसाध्यं मन्यमानः एवं पर्यपश्यत्तदृष्टवान्मृत्युः कर्मक्षयोपायेन साध्यान्देवानमन्यतेत्यर्थः क्वासौ देवान्ददर्शेत्युच्यते ऋचि साम्नि यजुषि ऋग्यजुःसामसम्बन्धिकर्मणीत्यर्थः ते देवा वैदिकेन कर्मणा संस्कृताः शुद्धात्मानः सन्तो मृत्योश्चिकीर्षितं विदितवन्तो

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानं देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशंस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयंस्तच्छन्दसां छन्दस्त्वं तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन्यदा वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवं सामैवं यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य देवा अमृता अभया अभवन् स प्राविश्य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरं स्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति ५ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

विदित्वा च ते ऊर्ध्वाः कर्मभ्य ऋचः साम्नो यजुषः ऋग्यजुःसामसम्बद्धात्कर्मण इत्यर्थः तेन कर्मणा मृत्युभयापगमं प्रति निराशास्तदपास्यामृताभयगुणमक्षरं स्वरं शब्दितं प्राविशन्नेव प्रविष्टवन्तस्तदुपासनपराः ओंकारोपासनपराः संवृत्ता इत्यर्थः एवं शब्दोऽवधारणार्थः समुच्चयप्रतिषेधार्थः कथं पुनः स्वरशब्दवाच्यत्वमक्षरस्येत्युच्यते यदा वै ऋचमाप्नोति ओमित्येवातिस्वरत्येवं सामैवं यजुरेष उ स्वरः कोऽसौ यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य यथागुणमेवामृता अभयाश्चाभवन्देवाः स यो मोऽपि देववदेतदक्षरमेवममृताभयगुणं विद्वान्प्रणौति स्तौतीति उपासनमेवात्र स्तुतिरभिप्रेता स तथैवैतदेवाक्षरं स्वरममृतमभयं प्रविशति तत्प्रविश्य च राजकुलं प्रविष्टानामिव राज्ञोऽन्तरङ्गबहिरङ्गताव न परस्य ब्रह्मणोऽन्तरङ्गबहिरङ्गता विशेषः किं तर्हि यदमृता देवा येनामृतत्वे

तपरम ताभ्रमक तेषैवामृततोमविप्रविष्टस्वरमृतोमवति नत्र ॥ ॥ ॥ प
न तानाप्यधिकता भ्रमृततेऽरस्यर्थः ॥

सं
ते
२

छां·टी०
१०

प्राणादिरसदृष्टिविशिष्टस्योद्गीथस्योपासनमनुक्रमेवानन्तरसप्रणवोद्गीथयोरेकत्वं कृत्वा तस्मिन्प्राणरश्मिभेदगुणविशिष्टदृष्ट्याभ्यासस्योपासनमनेकपुत्रफलमित्ये
नीवक्तव्यमित्यारभ्यते अथ खलु य उद्गीथः स प्रणवो बहूनां च्छन्दोगानां य प्रणवस्तेषां च प्रणवः सो ऽयमुद्गीथशब्दवाच्यो ऽसौ वा आदित्य उद्गीथ एष प्रणवः प्रणवशब्दवा
च्योपि स एव बह्वृचानां नाम एव उद्गीथ आदित्यः कथं उद्गीथाख्यमक्षरं ओमिति स तद्धि एष हि यस्मात्स्वरन्नुच्चारयन् अनेकार्थत्वाद्धातूनामथवा स्वरन् गच्छतीति अ
तोऽसावुद्गीथः सविता तमेतमु एवाहमभ्यगासिषमाभिमुख्येन गीतवानस्म्यादित्यरश्मि भेदं कृत्वाऽऽयानं कृतवानस्मीत्यर्थः तेन तस्मात्कारणात्मम त्वं
मेकोऽसि पुत्र इति ह कौषीतकिः कौषीतकस्यापत्यं कौषीतकिः पुत्रमुवाचोक्तवान् रश्मीनादित्यं च भेदेन त्वं पर्यावर्तयात्पर्यावर्तयेत्यर्थः त्वं योगात्त एवं बह
वो वै ते तव पुत्रा भविष्यन्तीत्येवं सविशेषवृत्तं अथानन्तरमध्यात्ममुच्यते य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतेत्यादिपूर्ववद्यो मितिह्येष प्राणोऽपि स्वरन्नेति ओमिति

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेत्येतमु एवाहमभ्यगासिषं तस्मान्मम त्व
मेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मीꣳस्त्वं पर्यावर्तयाद्बहवो वै ते भविष्यन्तीत्यधिदैवतम् ॥ अथाध्यात्मं य एवायं मुख्यः प्राणस्तमुद्गीथमुपासी
तोमिति ह्येष स्वरन्नेत्येतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणाꣳस्त्वं भूमानमभिगायताद्बहवो वै मे भविष्यन्तीति ॥
अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृषदनाद्धैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ५

स्त्वमनुजानीहि मुख्यं प्राणं गायेन्द्रियादिरूपांश्चाभिगायेत्यर्थः न हि मया ताप एक एवायं मुख्यः समीप एवायं प्राणः सोऽपि भेदेन गुणवानिति तेन त्वं मा त्वं प्राणादिभेदेन भूमानमनुगायेति त्वं
मुख्यमेतमु एवाहमभ्यगासिषमित्यादिपूर्ववदतो वागादीन्मुख्यं च प्राणं भेदगुणविशिष्टमुद्गीथं पश्यन्भूमानं मनसाभिगायतात् पूर्ववद्बहवो वै
मे पुत्रा भविष्यन्तीत्येवमभिप्रायः सन्नित्यर्थः प्राणादित्यैकत्वोद्गीथदृष्टेरेकपुत्रत्वफलदोषेणापोदितत्वाद्रश्मिप्राणभेददृष्टेः कर्तव्यता
येत्यर्थः बहवो वै मे पुत्रा भविष्यन्तीत्येवमभिप्रायः सन्नित्यर्थः अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्येकत्वदर्शनमुक्तं तस्य तत्फलमुच्यते होतृषदनाद्धोतारः स्थानं शंसति तत्स्थानं होतृ
षदनं तस्मिन्सम्यक्प्रयुक्तात्कर्मणो फलमित्यर्थः न हि देशमात्रात्फलमाहर्तुं शक्यं किं तद्धैवापि दुरुद्गीतं दुष्टमुद्गीतमुद्गानं कृतमुद्गात्रा स्वकर्मणि क्षतं कृत
मित्यर्थः तदनुसमाहरत्यनुसन्धत्त इत्यर्थः चिकित्सयेव धातुवैषम्यसमीकरणमिति ५

अथेदानीं सर्वफलसंपत्त्यर्थमुद्गीथस्योपासनान्तरं विधित्स्यते इयमेव पृथिवी ऋगग्निः साम पृथिव्यग्निदृष्टिः कार्या तथाग्नौ सामदृष्टिः कथं पृथिव्यग्न्योर्ऋक्
सामत्वमित्युच्यते तदेतदग्न्याख्यं साम एतस्यां पृथिव्यामृच्यध्यूढमधिगतमुपरिभावेन स्थितं ऋचीव साम तस्मादत एव कारणादृच्यध्यूढमेव साम गीयते
इदानीमपि सामगैः यथा ऋक्सामे नात्यन्तं भिन्ने अन्योन्यं तथैतौ पृथिव्यग्नी कथं इयमेव सा पृथिवी सा मम नामार्धशब्दवाच्यास्तदर्धशब्दवाच्यो ऽग्निरमः त
देतत् पृथिव्यग्निद्वयं सामैकशब्दाभिधेयत्वमापन्नं साम तस्मान्नान्योन्यमभिन्नं पृथिव्यग्निद्वयं नित्यसंश्लिष्टमृक्सामे च तस्माच्च पृथिव्यग्न्योर्ऋक्सामत्वमि
त्यर्थः सामाक्षरयोः पृथिव्यग्निदृष्टिविधानार्थमियमेव साग्निरम इति केचित् अन्तरिक्षमेवर्ग्वायुः सामेत्यादि पूर्ववत् नक्षत्राणामधिपतिश्चन्द्रमाः अ

~~इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयत इयमेव साग्निरमस्तत्साम ॥ अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्या~~
~~ꣳ साम गीयतेद्यौरेव सादित्योऽमस्तत्साम नक्षत्राणि~~ देतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्सा
म द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते द्यौरेव सादित्योऽमस्तत्साम नक्षत्राण्येवर्क्चन्द्रमाः साम तदेतदे
तस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम ॥ अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः
कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते अथ यदेवैतदादित्यस्य शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं त
दमस्तत्सामाथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश
त्मस्तत्साम अथ यदेतदादित्यस्य शुक्लं भाः शुक्ला दीप्तिः ॥
सैवर्क् अथ यदादित्ये नीलं परः कृष्णं परोऽतिशयेन काष्ण्यं तत्साम तद्ध्येकान्तसमाहितदृष्टेर्दृश्यते तदेवैते भाः शुक्लकृष्णे सा चामश्च साम अथ
य एषोऽन्तरादित्ये आदित्यस्यान्तर्मध्ये हिरण्मयो हिरण्मय इव हि साम यो न हि सुवर्णविकारत्वं देवस्य संभवति ऋक्सामगेष्णत्वापहतपाप्मत्वासं
भवात् न हि सौवर्णे ऽचेतने पाप्मादिप्राप्तिरस्ति येन प्रतिषिध्येत चाक्षुषे चाग्रहणात् अतो लुप्तोपम एव हिरण्मयशब्दो ज्योतिर्मय इत्यर्थः उ
त्तरेष्वपि समानो योजना पुरुषः पुरि शयनात्पूरयति वा स्वेनात्मना जगदिति दृश्यते निवृ ॥ ॥ ॥ ॥

२२
२३

तत्वसुभिः समाहितचेतोभिर्ब्रह्मचर्यादिसाधनापेक्षैः तेजस्विनोपि श्मश्रुकेशादयः कृष्णाः स्युरितोविशिनष्टि हिरण्यश्मश्रुर्हिरण्यकेशइति ज्योतिर्मया एवास्यश्मश्रुकेशा इत्यर्थः आप्रणखात्प्रणखो नखाग्रं नखाग्रेण सह सर्वः सुवर्ण इव भारूपइत्यर्थः तस्यैवं सर्वतः सुवर्णवर्णस्याप्यक्ष्णोर्विशेषः कथं तस्य यथा कप्यासं कप्यासः कपेर्मर्कटस्यासः कप्यासः आसेरुपवेशनार्थस्य करणे घञ् कपिपृष्ठान्तो येनोपविशति कप्यासइवपुण्डरीकमत्यन्ततेजस्वेवमस्य देवस्याक्षिणी उपमितोपमात्वान्नहीनोपमा तस्यैवंगुणविशिष्टस्य गौणमिदं नामोदिति कथं गौणत्वं स एष देवः सर्वेभ्यः पाप्मभ्यः पाप्मना सहतत्कार्येभ्य इत्यर्थः य आत्मापहतपाप्मेत्यादि वक्ष्यति उदित उद्गत उद्गतो यतोसावुन्नामा तमेवंगुणसम्पन्नमुन्नामानं यथोक्तेन प्रकारेण यो वेद सोप्येवमेवोदेति उद्गच्छति सर्वेभ्यः पाप्मभ्यो ह वै इत्यवधारणार्थौ निपातौ उदेत्येवेत्यर्थः तस्योद्गीथत्वं देवस्यादित्यादीनामिव विवक्षित

आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतं ६

त्याह तस्यर्क्सामे गेष्णौ पृथिव्याद्यृक्साम पर्वणी स सर्वात्मा हि देवः परापरलोककामेशितृत्वाद्युपपद्यते पृथिव्यग्न्याद्यृक्सामे गेष्णौ सर्वयोनित्वात् एवमुन्नामा वा सा ऋक्सामगेष्णश्च तस्मादृक्सामगेष्णत्वप्राप्तमुद्गीथत्वमुच्यते परोक्षेण परोक्षप्रियत्वाद्देवस्य तस्मादुद्गीथ इति तस्मात्त्वेव हेतोरुद्गायतीत्युद्गाता यस्माद्ध्येतस्य यथोक्तस्योन्नाम्नो गाता सोऽतोऽयुक्ताद्गातेति नामप्रसिद्धिरुद्गातुः स एव देव उन्नामा ये चामुष्मादादित्यात्परांचः पराग्गता ऊर्ध्वा लोकास्तेषां लोकानां चेष्टे न केवलमीशितृत्वमेव चशब्दाद्धारयति च सह्याधारः पृथिवीं द्यामुतेमामित्यादिमंत्रवर्णात् किंच देवकामानामीष्टे इत्येतदधिदैवतं देवताविषयं देवस्योद्गीथस्य स्वरूपमुक्तं ६ ॥ ७ ७ ७ ६ ११

अथाधुनाध्यात्ममुच्यते वागेवर्गधराः साम माधरोपरिस्थानत्वसामान्यात् प्राणो घ्राणमुच्यते सह वायुना वागेव सा प्राणो ममः सादिरूर्ध्ववत् चक्षुरेवर्गात्मा साम वेति छायात्मा तत्स्थे तत्वात्तामध्यात्ममेवर्क् मनः साम श्रोत्रस्याधिष्ठातृत्वान्मनसः साम तत् अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णमादित्यवदकराक्षस्थिष्ठानं तत्सामाथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सएव स्सैवर्गध्यात्मवागाद्याः पृथिव्याद्याधिदैवं प्रसिद्धा ऋक्पादवद्भासरात्मिका तथा साम्नो स्य साहचर्यादृक्लोके साम स्मकराञ्चमुक्तान्ततयायजुः स्वाहास्वधावषडादिसर्वमेववायजुस्तत्तद्रावसर्वात्मकत्वात्सर्वयोनित्वा

अथाध्यात्मं वागेवर्क् प्राणः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते वागेव साप्राणोऽमस्तत्साम चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते चक्षुरेव सात्मामस्तत्साम श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते श्रोत्रमेव सा मनोऽमस्तत्साम अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्साम अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥ ३ ॥ ३ ॥

च्येति सर्वो वा मन्त्रगादिप्रकरणात्तद्ब्रह्मेति त्रयीवेदास्तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते किं तद्यदमुष्यादित्यस्य पुरुषस्य हिरण्मय इत्यादिप्रदिष्टमेव तमुक्तं पावमुष्य गेष्णौ पर्वणी तावेवास्यापि चाक्षुषस्य गेष्णौ यच्चामुष्य नामोदित्युद्गीथ इति च तदेवास्य नाम स्थानभेदात्तद्रूपगुणनामादिदेशादीशितृत्वविषयभेदव्यपदेशाच्चादित्यचाक्षुषयोर्भेद इति चेत् न अमुनानेनैवेत्येकस्योभयात्मत्वप्राप्त्यनुपपत्तेः द्विधाभावेनोपपद्यत इति चेत् ॥ ॥ ३ ॥ ३

वक्ष्यति हि सराकथा भवति त्रिधा भवती त्यादि वेतन सैकस्य निरवयवत्वाद्द्विधाभावानुपपत्तेस्तस्मादध्यात्माधिदैवतयोरेकत्वमेव यथारूपावितिहि
शोभिहृकारस्यामवीवीनतन्द्रेहावगमायकिंतहि स्थानभेदात्तमे हाशकामाभेदि सिवमर्थं स एष चास्य पुरुषपेशतस्माद्यात्मिकास्त्रनेनो
चोर्वाभ्गुताल्लोकास्तेषांचेष्टे मनुष्यसंबेधिनां च कामानां तत्तस्माद्य इमे वीणायां गायंति गायनाह एतमेव गायंति यस्माद्वी ~~[illegible]~~
स्वरंगायतितस्मात्तेधनलाभयुक्ताधनवंतरस्सर्थः अथ य एतदेवं विद्वान्सामगायति उभौ स गायति चाक्षुषमादित्यंच

स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति तद्य इमे वीणायां गायंत्येतं ते गायंति तस्मात्ते धनसनयो अथ य एतदेवं विद्वान्साम ७
गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोति देवकामांश्च ॥ अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्तांश्च ८ छां
आप्नोति मनुष्यकामांश्च तस्मादुहैवंविदुद्गाता ब्रूयात्कं ते काममागायानीत्येष ह्येव कामागानस्येष्टे य एवं विद्वान्साम गायति साम गा

तस्यैवंविदः फलमुच्यते सोऽमुनैवादित्येन स एष ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोति आदित्यान्तर्गतदेवो भूत्वेत्यर्थः देवकामांश्च अथानेनैव चाक्षु
षेणैव ये चैतस्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्च वायुर्देवो भूत्वेत्यर्थः तस्मादुहैवंविदुद्गाता ब्रूयाद्यजमानं कथमिष्टं ते तव काममागा
यानीत्येष हि यस्मादुद्गाता कामगानस्योद्गानेन कामं संपादयितुमीष्टे समर्थ इत्यर्थः कोऽसौ य एवं विद्वान्साम गायति साम गायति ७ श्रीः

अनेकधोपास्यत्वादक्षरस्य प्रकारांतरेण परोवरीयस्त्वगुणफलमुपासनांतरमानिनायेतिहासस्तु सुखावबोधार्थः त्रयस्त्रिसंख्याकाः ह इत्यैतिह्यार्थः उद्गीथे उद्गी
थज्ञानं प्रति कुशला निपुणा बभूवुः कस्मिंश्चिद्देशे काले निमित्ते वा समेतानामित्यभिप्रायो न हि सर्वस्मिन्जगति त्रयाणामेव कौशलमुद्गीथादिविज्ञाने
अपतेस्तु प्रसिद्धा जानश्रुतिकैकेयप्रभृतयः सर्वज्ञकल्पाः के ते त्रय इत्याह शिलको नामतः शलावतोऽपत्यं शालावत्यश्चैकितायनस्यापत्यं चैकितायनो
दाल्भ्यगोत्रो दाल्भ्यो द्व्यामुष्यायणो वा प्रवाहणो नामतो जीवलस्यापत्यं जैवलिरित्येते त्रयस्ते होचुरन्योन्यमुद्गीथे वै कुशला निपुणा इति प्रसिद्धाः स्मो

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हंतोद्गीथे क
थां वदाम इति तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवंतावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति स ह शिलकः
शालावत्यश्चैकितायनं दाल्भ्यमुवाच हंत त्वा पृच्छानीति पृच्छेति होवाच कासाम्नो गतिरिति १ ॥ २ ॥ ३ ॥

हंत यद्यनुमतिर्भवतामुद्गीथे उद्गीथज्ञाननिमित्तां कथां विचारणां पक्षप्रतिपक्षोपन्यासेन वदामो वा इत्यर्थः तथा च तद्विद्यसंवादे विपरीतग्र
हणनाशोऽपूर्वविज्ञानोपजननं संशयनिवृत्तिश्चेत्यतस्तद्विद्यसंयोगः कर्तव्य इति चेतिहासप्रयोजनं दृश्यते हि शिलकादीनां तथेत्युक्त्वा ते समुपविवि
शुरुपविष्टवंतः किल तत्र राज्ञः प्रागल्भ्योपपत्तेः स ह प्रवाहणो जैवलिरुवाचेतरौ भगवंतौ पूजावंतावग्रे पूर्वं वदतां ब्राह्मणयोरिति लिंगाद्राजासौ युवयोर्ब्रा
ह्मणयोर्वदतोर्वाचं श्रोष्यामि अर्थरहितामित्यपरे वाचमिति विशेषणादित्युक्तयोः स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हंत यद्यनुमंस्यसे त्वा
पृच्छानीत्युक्त इतरः पृच्छ ॥ ३

तिहोवाच लथानुमतिराह कासाम्नः प्रकृतत्वादुद्गीथस्यो द्गीथोत्र सुपास्तेन प्रकृतः परोवरीयां समुद्गीथं इतिवक्ष्यतिगतिः आश्रयः परायणमित्येतस्तं पृ
ष्टो दाल्भ्य उवाच स्वर इति स्वरात्मकत्वात्साम्नो यो यदात्मकः सद्गतिः तदाश्रयश्च भवतीतिप्रयुक्तं मृदाश्रय इव घटादिः स्वरस्य कागतिरिति प्राण इति होवाच प्रा
णनिष्पाद्यो हि स्वरस्तस्मात्स्वरस्य प्राणो गतिः प्राणस्य कागतिरित्यन्नमिति होवाचान्नावष्टम्भो हि प्राणः शुष्यति वै प्राणः ऋतेन्नादिति हि श्रुतेरन्नस्य मिति चान्नस्य का
गतिरिति आप इति होवाचाप्संभवत्वादन्नस्यापां कागतिरित्यसौ लोक इति होवाचामुष्माद्धि लोकाद्वृष्टिः संभवति अमुष्य लोकस्य कागतिरिति पृष्टो दाल्भ्य उवाच
आह स्वर्गममुं लोकमतीत्याश्रयान्तरं परं साम न नयेत्कश्चिदिति होवाच अतो वयमपि स्वर्गं लोकं सामाभिसंस्थापयामः स्वर्गलोकप्रतिष्ठं साम जानीमः

स्वर इति होवाच स्वरस्य कागतिरिति प्राण इति होवाच प्राणस्य कागतिरित्यन्नमिति होवाचान्नस्य कागतिरित्याप इति होवाचापां कागतिरित्य
सौ लोक इति होवाचामुष्य लोकस्य कागतिरिति न स्वर्गं लोकमतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्थापयामः स्वर्गसंस्तावं
हि सामेति तं ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति
मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदा

स्वर्गः स्वर्गसंस्तावं स्वर्गत्वेन संस्तवनं संस्तावो यस्य तत्साम स्वर्गसंस्तावं हि यस्मात्स्वर्गो वै लोकः सामवेद इति हि श्रुतिः तमित्तरः शिलकः शालावत्यश्चैकि
तायनं दाल्भ्यमुवाचाप्रतिष्ठितमसंस्थितं परोवरीयस्त्वेनासमाप्तगतिसामेत्यर्थो वै दाल्भ्य किल ते तव साम यस्त्वेतर्हि ब्रूयात्
सामविदेतस्मिन्काले कश्चित्सामविपरीतविज्ञानमप्रतिष्ठितं साम प्रतिष्ठितमित्येवं वादापराधिनं मूर्धा शिरस्ते विपतिष्यति विस्पष्टं पतिष्य
तीत्येवमुक्तस्यापराधिनस्तथैव तद्धि ॥ ॥

पतेन्न संशयो न त्वहं ब्रवीमीत्यभिप्रायो ननु मूर्धपाताई चेदपराधं कृतवानतः परेणानुक्तस्यापि पतेन्मूर्धा न चेदपराधवतस्यापि नैव पततस्मन्यथा अकृताभ्यागमः कृतना
शश्च स्यातां नैष दोषः कृतस्य कर्मणः शुभाशुभस्य फलप्राप्तेर्देशकालनिमित्तापेक्षत्वात्तत्रैवं सति मूर्धपातनिमित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्तापे
क्षत्वमित्येवमुक्तो दाल्भ्य आह हन्ताहमेतद्भगवत्तो वेदानीयत्त्वत्तः इत्युक्तः प्रत्युवाच शालावत्यो विद्धीति होवाचामुष्य लोकस्य कागतिरिति पृष्टः
शालावत्य प्रत्याह अयं लोक इति होवाचायं हि लोको यागदानहोमादिभिरमुं लोकं पुष्यतीति अतः प्रदानं देवा उपजीवन्तीति हि श्रुतयः प्रत्यक्षं हि सर्वभूतानां धरणी

नीति विद्धीति होवाचामुष्य लोकस्य कागतिरित्ययं लोक इति होवाचास्य लोकस्य कागतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं
लोकं सामाभिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति तं ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूया
न्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच ॥ ८ ॥ श्रीरामनामराम ॥ ७ ७ १

प्रतिष्ठेत्यतः सामाप्ययं लोकः प्रतिष्ठैवेति युक्तं अस्य लोकस्य कागतिरित्युक्त आह शालावत्यो न प्रतिष्ठामिमं लोकमतीत्य नयेत्साम कश्चित् अतो वयं प्रतिष्ठां लो
कं सामाभिसंस्थापयामो यस्मात्प्रतिष्ठासंस्तावं हि प्रतिष्ठात्वेन संस्तुतं सामेत्यर्थः इयं वै रथन्तरमिति च श्रुतिः तमेवमुक्तवन्तं प्रवाहणो जैवलिरुवाचान्तवद्वै कि
ल ते शालावत्य साम इत्यादि पूर्ववत्ततः शालावत्य आह हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाचेतरोनुज्ञात आह ८ ॥ श्रीरामरामराम नामराम
॥ श्रीरामराम श्री ॥ ७ ॥ ७ श्रीरामरामनाम ॥ ७ श्रीरामरामनाम ॥ ७ श्रीरामनामरामनाम श्रीराम

छां॰ शं॰
१५

अस्य लोकस्य का गतिरित्याकाश इति होवाच प्रवाहण आकाश इति च पर आत्माकाशो वै नामेति श्रुतेः। तस्य हि कर्म सर्वभूतोत्पादकत्वं तस्मिन्नेव हि भूतप्रलयः
तत्तेजोऽसृजत तत्तेजः परस्यां देवतायामिति च स्मृति सर्वाणि ह वा इमानि भूतानि स्थावरजंगमानि आकाशादेव समुत्पद्यन्ते तेजोऽबन्नादिक्रमेण सामर्थ्यात्
काशं प्रत्यस्तं यन्ति प्रलयकाले विपरीतक्रमेण हि यस्मादाकाशादेवं सर्वेभ्यो भूतेभ्यो ज्यायान्महत्तरोऽतः सर्वेषां भूतानां परमयनं परायणं प्रतिष्ठा त्रिषु
पिकालेषु त्यर्थः यस्मात्परं वरीयः परोवरीयः परेषु वरः परं श्च वरीयांश्च परोवरीयानुद्गीथः परमात्मसंपन्न इत्यर्थः अत एवं स एषोऽनन्तोऽविद्यमानोऽन्तोऽस्य परोवरीयांसं परमात्मभूतमनन्तमेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते तस्यैतत्फलमाह परोवरीयः परं विशिष्टतरं जीवनं हास्य विदुषो भवति दृष्टं फलमदृष्टं च प परं

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः
परायणम् १ स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते
२ तं हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति
तथामुष्मिँल्लोके लोक इति स य एतमेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथामुष्मिँल्लोके लोक इति लोके लोक इति १०

व रोवरीयस्त्वगुणैर्विशिष्टतरमेनं ब्रह्माकाशं ततो लोकाञ्जयति य एतदेवं विद्वानुद्गीथमुपास्ते किं च तमेतमुद्गीथं विद्वानतिधन्वा नामतः शुनकस्यापत्यं शौ
नक उदरशाण्डिल्याय शिष्यायैतमुद्गीथदर्शनमुक्त्वोवाच यावत्ते तव प्रजायां प्रजासन्तताविति यावत्सर्वे उद्गीथं तत्सन्ततिजाः वेदिष्यन्ते ज्ञास्यन्ति तावन्तं कालं प
रोवरीयो हैभ्यः प्रसिद्धेभ्यो लौकिकजीवनेभ्य उत्तरोत्तरविशिष्टतरं जीवनं तेभ्यो भविष्यति तथाऽदृष्टेऽपि परलोकेऽमुष्मिन्परोवरीयाँल्लोको भविष्यति
इत्युक्तवान्शाण्डिल्यायातिधन्वा शौनकः स्यादेतत्फलं पूर्वेषां महाभाग्यानां नैदंयुगीनानामित्याशंकानिवृत्तये आह स यः कश्चिदेतदेवं विद्वानुद्गी
थमेतर्ह्युपास्ते तस्याप्येवमेव परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथामुष्मिँल्लोके लोक इति ९ ॥ ७ ॥ ८ ॥ ९ ॥

उद्गीथोपासनप्रसंगेन प्रस्तावप्रतिहारविषयमप्युपासनं वक्ष्यामीतीदमारभ्यते आख्यायिका तु सुखावबोधार्था मटचीहतेषु मटच्योऽशनयस्ताभिर्हतेषु नाशितेषु
दे तेषु कुरुषु कुरुसस्येष्वित्यर्थः ततो दुर्भिक्षे जाते आटिक्या अनुपजातपयोधरादिस्त्रीव्यंजनया सह जायया उषस्तिर्ह नामतः चक्रस्यापत्यं चाक्रायणः इभो हस्ती तमर्हतीतीभ्य
तीभ्य ईश्वरो हस्त्यारोहो वा तस्य ग्राम इभ्यग्रामः तस्मिन्प्रद्राणकोऽन्नालाभात् द्राकुत्सायां गतौ कुत्सितां गतिं गतोऽन्त्यामवस्थां प्राप्त इत्यर्थः उवास उषि
तवान्कस्यचिद्गृहमाश्रित्य सोऽन्नार्थमटन्निभ्यं कुल्माषान्कुत्सितान्माषान्खादन्तं भक्षयन्तं यदृच्छयोपलभ्य विभिक्षे याचितवान् तमुषस्तिं होवाचेभ्यो नेतोऽस्मादन्य
मा याभक्ष्यमाणादुच्छिष्टराशेः कुल्माषा अन्ये न विद्यन्ते यच्च येऽस्मिन्मे मम भाजन उपनिहिता प्रक्षिप्ता इमे भाजने किं करोमीत्युक्तः प्रत्युवाचोषस्तिरेतेषामेतान्नित्यर्थः
तिह्रा मेमम देहीति वाचतान्स्मरभ्यो ऽस्मा उषस्तये प्रददौ प्रदत्तवान्नुपानीय समीपस्थमुदकं हन्त गृहाणानुपानमित्युक्तः प्रत्युवाचोच्छिष्टं वै मे मम स्यादुदकं पीतं स्यात्

मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास स हेभ्यं कुल्माषान्खादन्तं बिभिक्षे त होवाच नेतोऽन्ये विद्यन्ते य
च्च ये म इम उपनिहिता इति तेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतं स्यादिति होवाच न स्विदेतेऽप्युच्छिष्टा इति न वा अ
जीविष्यमिमानखादन्निति होवाच कामो म उदकपानमिति स ह खादित्वातिशेषाञ्जायाया आजहार साग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य
निदधौ स ह प्रातः संजिहान उवाच यद्बतान्नस्य लभेमहि लभेमहि ॥ ७

यदि पास्यामीत्युक्तवन्तं प्रत्युवाचेतरः किं न स्विदेते कुल्माषा अप्युच्छिष्टा इत्युक्त आहोषस्तिर्न वै अजीविष्यं न जीविष्यामीमान्कुल्माषानखादन्नभक्ष
पन्निति होवाच कामो यथेष्टो म ममोदकपानं लभ्यत इत्यर्थोऽतश्चैतामवस्थां प्राप्तस्य विद्यायशोधर्मयुक्तस्यात्मपरोपकारसमर्थस्यैतदपि कुर्वतो ना र
गः स्पर्श इत्यभिप्रायः तस्यापि जीवितं प्रत्युपायान्तरे सति जुगुप्सितमेतत्कर्म दोषाय ज्ञानावलेपेन कुर्वतो नरकपातः स्यादेवेत्यभिप्रायः प्रद्राणकशब्द
श्रवणात् तोऽस्य स खादित्वातिशेषानतिशिष्टाञ्जायायै कारुण्यादाजहार साटिक्याग्र एव कुल्माषप्राप्तेः सुभिक्षा शोभनभिक्षा लब्धान्ना इत्येतत्
बभूव संवृत्ता तथापि स्त्रीस्वाभाव्यादनवज्ञाय तान्कुल्माषान्पत्युर्हस्तात्प्रतिगृह्य निदधौ निक्षिप्तवती स ततस्तस्याः कर्म जानन्प्रातरुषःकाले संजिहानः॥

कर्म ४

शयनं निद्रां चपरिसज्जनुवाचपत्न्याः यद्यावं सान्ययदि वेतेति खिद्यमानो वयस्तोकं लभेमहि तमद्रुत्वां नयममर्थागत्वा लभेमहि धनमात्रां यनस्माल्लेते नो स्माकं जीवनं भविष्यति धनलाभे च कारणमाह राजासौ नातिदूरे स्थाने यक्ष्यते यजमानत्वात्तेनस्मात्मने पदम् स च राजा मां पात्रमुपलभ्य सर्वैरार्त्विज्यैः कर्मभिः वृणीत कर्मप्रयोजनायेत्यर्थः वृणीतेति एवमुक्तं वंतं जायोवाच हंत गृहाण हे पते इमे एव ये मद्धस्ते विनिक्षिप्ता स्तु याः कुल्माषा इति तान्वा दित्वा मुपजगाम वितत्वं विस्तारितं यज्ञं तत्र च गत्वोद्गातृन् उद्गातृपुरुषा नागत्य स्तुवंस्तुष्यन्ति आस्ताव स्तोष्यमाणानुपोपविवेश समीपउपविष्टस्तेषामित्यर्थः उपविश्य च प्रस्तोतारमुवाच हे प्रस्तोतरित्यामंत्र्याभिमुखीकरणाय या देवता प्रस्तावं प्रस्तावभक्तिमनुगता ऽन्वायत्ता

धनमात्रां राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति तं जायोवाच हंत पत इम एव कुल्माषा इति तान्खादित्वामुं यज्ञं विततमेयाय तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीत्येवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीत्येवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे १०

तां चेद्देवतां प्रस्तावभक्तेरविद्वान्प्रस्तोष्यसि विदुषो मम समीपे तत्सरोक्षेपि चेद्विपतेत्तस्य मूर्धा कर्ममात्रविदामनधिकार एव कर्मणि स्यात् तच्चानिष्टं अविदुषां कर्मदर्शनात् दक्षिणामार्गश्रुतेश्चानधिकारे चाविदुषामुत्तरएवैकोमार्गः श्रूयेत नचस्मात्तेकर्मनिमित्त एवदक्षिणः पंथाः यत्तेनदा ने नेसादिश्रुतेः तयोरुक्तसमं गतेश्च विशेषणात् विद्वत्समक्षस्यैव कर्मण्यनधिकारो न सर्वत्राग्निहोत्रस्वाध्यायनादिषु चानुज्ञातायास्तत्र तत्र दर्श नात्कर्ममात्रविदामप्यधिकारः सिद्धः कर्मणीति मूर्धा ते विपतिष्यतीत्येवमेवोद्गातारं प्रतिहर्तारमुवाचेत्यादि समानमन्यत् प्रस्तोत्रादयः कर्मभ्यः समारताउपरताः संतो मूर्धपातभयात्तूष्णीमासांचक्रिरे अन्यच्चाकुर्वंतः अर्थित्वात् १० ८ ९ ९ ९ ९ ९

32

अथानंतरं ह हैनं यजमानो राजोवाच भगवंतं प्रजानंतं वै अहं विविदिषाणि वेदितुमिच्छामीत्युक्त उषस्तिरस्मि चाक्रायण इत्युवाचापि श्रोत्रपथमागतोपदीति होवाचोक्तवान् स ह यजमानउवाच सत्यमेवं अहं भगवंतं वै हरामं अन्वैषं सर्वै आर्त्विज्यैः कर्मभिरार्त्विज्यैः पर्यैषिषं पर्यैषणं कृतवानस्मि न विष्य भगवतो वा अहमवित्त्वा ऽन्या नि मानन्वृषि वृत्तवानस्मि अद्यापि भगवांस्त्वेव मे सर्वैरार्त्विज्यैः सर्वैरार्त्विक्कर्मार्थमस्त्वित्युक्तस्तथेत्याहोषस्तिः किंतथैवं तर्ह्येतएव त्वया पूर्वं वृता अपि समतिसृष्टाः मया सम्यक्प्रसन्नेनानुज्ञाताः संतः स्तुवंतां त्वया त्वेते त्वत्काञ्चनं याव देभ्यः सर्वेभ्यो धनं दद्याः यावत्त्वमप्यदास्यसि तावन्ममदद्याः स्तुत्यर्थमित्युक्तस्तथेति ह यजमान उवाच अथ हैनमो

अथ हैनं यजमान उवाच भगवंतं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच स होवाच भगवंतं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगव तो वा अहमवित्त्यान्यानवृषि भगवांस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवतां यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या इति तथेति ह यजमान उवाच अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति सयहे नमुद्गातोप ८ ९ ९ ७ ९

33

षसंवस्व स्तावप्रस्तोतोपससारोषस्तिं विनयेनोपजगाम प्रस्तोतर्या देवतेत्यादि मा मां भगवानवोचत् पूर्वं कतमासा देवता या प्रस्तावभक्तिमन्वायत्तेति पृष्टः प्राण इति होवाच युक्तं प्रस्तावस्य प्राणो देवतेति कथं सर्वाणि स्थावरजंगमानि भूतानि प्राणमेवाभिसंविशंति प्रलयकाले प्राणमभिलक्ष्यापि ताप्राणा मनेवोज्जिहते प्राणादेवोद्गच्छंतीत्यर्थः उत्पत्तिकाले अतः सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यः ॥ ९ ७ ९ ३
श्रीरामनाम श्रीराम रामनाम ३ ३ ३ ३ ३ ३ ३

छां॰ शं॰ १६

प्रस्तवने प्रस्तावभक्तिं कृतवानसि यदि मह्यं शिरस्ते व्यपतिष्यत् विपतितमभविष्यत् तथोक्तस्य मया तत्काले मया युक्तं तत्पापं मया निषिद्धः कर्मणि प्रवृत्तः प्रमम कार्षीरित्यभिप्रायः तथो ज्ञातापप्रच्छ कतमा सोद्गीथभक्तिमनुगतान्वायत्ता देवतेति पृष्टस्त्वादित्य इति होवाच सर्वाणीमानि भूतान्यादित्यमु ८ च्चैः रुद्दं संतं गायंति शब्दं यंति स्तुवंतीत्यभिप्रायः उच्छब्दसामान्यात्मशब्दसामान्यादित्य प्राणो ५ ततः सैषा देवतेत्यादि पूर्ववत् एवमेवाथ हैनं प्रतिहर्ता

समाहोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेत्यादित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः संतं गायंति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद[...]गास्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेत्यथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेत्यन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवंति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिह ॥ रिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ११

छां॰ भा॰ १६

पूर्ववत् कतमा सा देवता प्रतिहारमन्वायत्तेति पृष्टोऽन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेवात्मानं प्रतिसर्वतः प्रतिहरमाणानि जीवंति सैषा देवता प्रतिशब्दसामान्यात्प्रतिहारभक्तिमनुगता समानमन्यत् तथोक्तस्य मयेति प्रस्तावोद्गीथप्रतिहारभक्तीः प्राणादित्यान्नदृष्ट्योपासीतेति समुदायार्थः प्राणाद्यापत्तिः कर्मसमृद्धिर्वा फलमिति ११

34

अतीते खंडेऽन्नाप्राप्तिनिमित्ता कष्टावस्थोक्ता उच्छिष्टपर्युषितभक्षणलक्षणा सा मा भूदित्यन्नलाभायानंतरं शौवः श्वभिर्दृष्ट उद्गीथ आरभ्यते तत् पते तत्तत्र ह किल बको नामतः दाल्भस्यापत्यं दाल्भ्यो ग्लावो वा नामतः मित्रायाश्चापत्यं मैत्रेयो वा शब्दश्चार्थे उभयामुष्यायणो ह्यसौ वस्तुविषये त्रिकालसिद्धविकल्पानुपपत्तेः द्विनामा द्विगोत्रो हि द्विनामा द्विगोत्र इति हि स्मृतिः दृश्यते चोभयतः पितृभाक्त्वमुद्गीथेऽपि यद्वा द्विनाम्नानावकारणाद्यामाश्चदः स्वाध्यायं स्वाध्यायार्थं स्वाध्यायं कर्तुं ग्रामाद्बहिरुद्वव्राज उद्गतवान् विविक्ते देशे उदकाभ्याशे उद्वव्राज प्रतिपालयांचकारेति चैकवचनाल्लिंगादेक एवासावृषिः श्वोद्गीथकालप्रतिपालनादृषेः

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति तान्होवाचेहैव मा प्रातरुप

स्वाध्यायकरणमन्नकामनयेति लक्ष्यतेऽभिप्रायोऽतः स्वाध्यायेन तोषिता देवता ऋषिर्वा श्वरूपं गृहीत्वा श्वा श्वेतः सन् तस्मा ऋषये तदनुग्रहार्थं प्रादुर्बभूव प्रादुश्चकार तमन्ये मुख्यं श्वानं क्षुल्लकाः श्वानः उपसमेत्योचुरुक्तवंतोऽन्नं नोऽस्मभ्यं भगवानागायत्वागानेन निष्पादयत्वित्यर्थः मुख्यप्राणं वागादयो वा प्राणमन्वन्नभुजः स्वाध्यायपरितोषिताः संतोऽनुगृह्णीयुः श्वरूपमादायेति युक्तमेवं प्रतिपत्तुमशनायाम वै बुभुक्षिताः स्मो वै इति स एवमुक्तः श्वा श्वेतस्तान्क्षुल्लकान् शुनः होवाचेहैवास्मिन्नेव देशे मा मां प्रातः प्रातःकाले उपसमीयातेति दैर्घ्यं छांदसं समीयातेति प्रमादपाठो वा प्रातःकालकरणं तत्काल ७ ः

35

छां॰ श॰
१०

रोवकर्तव्यार्थमन्नस्य वासविन्नुरपराह्णेऽनाभिमुख्यात्तत्रैव हवकोहाल्मौग्लावोवामैत्रेयः स्वषिः प्रतिपालयांचकार प्रतीक्षणं कृतवानित्यर्थः तेभ्यागतेभ्यो वागमस्तेषु समक्षयपथैव हकर्मणि ब हिष्पवमानेन स्तोष्यमाणा उद्गातृपुरुषाः संरब्धाः संलग्नाः श्रमोसमैव मुखेनान्योन्यस्य पुच्छं गृहीत्वा सर्पः आसन्नवंतः परिसर्पणं कृतवंतस्तस्थुः तावद्वंसमुपविश्योपविष्टाः संतो हिंचक्रुर्हिंकारं कृतवंतः ओ३मदा३मों पिबा३मों देवोवरुणः प्रजापतिः सविताऽन्नमिहाहरदन्नपतेऽन्नमिहाहराहरो३मिति १२

रणाद्वुगतः प्रजापतिः पालनात्प्रजानां सविता प्रसवितृत्वात्सर्वस्यादित्य उच्यते एतैः पर्यायैः स एवं भूत आदित्योऽन्नमस्मभ्यमिहाहरदाहरत्विति स एवं हिंकृत्वा पुनरप्यूचुः स त्वं हे अन्नपते स हि सर्वस्यान्नस्य प्रसवितृत्वात्पतिर्नहि तत्पाकेन विना प्रसूतमन्नमणुमात्रमपि जायते प्राणिनामतो अन्नमस्मभ्यमिहाहराहरेत्यभ्यास आदरार्थ ओमिति १२

रण॰
१०

भक्तिविषयोपासनं समस्तसामावयवसंबद्धमित्यतः सामावयवांतरस्तोभाक्षरविषयाण्युपासनांतराणि संहतान्युपदिश्यंतेऽनंतरं सामावयवसंबंधत्वाविशेषादयं वाव लोको हाउकारः स्तोभो रथंतरे साम्नि प्रसिद्धः इदं वै रथंतरमित्यस्मात्संबंधसामान्याद्धाउकारः स्तोभोऽयं लोकस्तमेवमुपासीत वायुर्हाइकारो वामदेव्ये साम्नि हाइकारः प्रसिद्धः वायुरप्संबंधश्च वामदेव्यस्य साम्नो योनिरित्यस्मात्सामान्याद्धाइकारं वायुदृष्ट्योपासीत चंद्रमा अथकारः चंद्रदृष्ट्याऽथकारमुपासीत अन्नेहीदं स्थितमन्नात्मा चंद्रः थकाराकारसामान्याच्च आत्मा इहकार इहेति स्तोभः प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते इहेति च स्तोभस्तत्सामान्यादग्निरीकार ईनिधना न्याग्नेयानि सर्वाणि सामानीत्यतस्तत्सामान्यादादित्य ऊकारः उच्चैरूर्ध्वं संतमादित्यं गायंत्यूकारश्चायं स्तोभ आदित्य देवत्ये साम्नि स्तोभ ऊरस्यादित्य ऊकारो निहव इत्येकारः स्तोभ एहीति च ह्वयंतीति तत्सामान्याद्विश्वेदेवा औहोयिकारः

अयं वाव लोको हाउकारो वायुर्हाइकारश्चंद्रमा अथकारः आत्मेहकारोऽग्निरीकारः आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोयिकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट् अनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारो दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवं साम्नामुपनिषदं वेदोपनिषदं वेद १३ इति छांदोग्योपनिषद्ब्राह्मणे तृतीयः प्रपाठकः ॥ ॐ ॐ ॐ ३

वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात् प्रजापतिर्हिंकार अनिरुक्तत्वाद्धिंकारस्य चाव्यक्तत्वात् प्राणः स्वर इति स्तोभः प्राणस्य स्वरहेतुत्वसामान्यात् अन्नं या इति स्तोभोऽन्नं अन्नेनहीदं यातीत्यतस्तत्सामान्यात् वागिति स्तोभो विराडन्नं देवताविशेषो वा वैराजे साम्नि स्तोभदर्शनात् अनिरुक्तोऽव्यक्तत्वादिदं चेदं चेति निर्वक्तुं न शक्यत इत्यतः संचरो विकल्प्यमानस्वरूप इत्यर्थः कोऽसावित्याह हुंकारोऽव्यक्तो ह्ययमतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः स्तोभाक्षरोपासनाफलमाह दुग्धेऽस्मै वाग्दोहमित्यादुक्तार्थम् य एतामेवं यथोक्तलक्षणां साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतद्यथोक्तं फलमित्यर्थो द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः सामावयवविषयोपासनापरिसमाप्त्यर्थो वेति १३ श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छांदोग्योपनिषद्विवरणे प्रथमः प्रपाठकः समाप्तः ॥ श्रीराम नाम नाम श्रीराम श्रीरामनाम ॥ ३ ३

छां०उ०
१९

ओमित्येतदक्षरमित्यादिना साम्नोऽवयवविषयमुपासनमनेकफलमुपदिष्टम् अनंतरं च स्तोभाक्षरविषयमुपासनमुक्तं सर्वथापि साम्नैकदेशसंबद्धमेवेति इदानीं समस्ते साम्नि समस्तसामविषयाण्युपासनानि वक्ष्यामीत्यारभते श्रुतिः युक्तं ह्येकदेशोपासनानंतरमेकदेशिविषयमुपासनमुच्यत इति समस्तस्य सर्वावयवविशिष्टस्य पांचभक्तिकस्य साप्तभक्तिकस्य चेत्यर्थः खल्विति वाक्यालंकारार्थः साम्न उपासनं साधु समस्ते साम्नि साधुदृष्टिविधिपरत्वान्न पूर्वोक्तोपासननिंदार्थत्वं साधुशब्दस्य ननु पूर्वत्राविद्यमानं साधुत्वं समस्ते साम्न्यभिधीयते न साधुसामेत्युपास्त इत्युपसंहारात् साधुशब्दः शोभनवाची कथमवगम्यत इत्याह यत्खलु लोके साधु शोभनमनवद्यं प्रसिद्धं तत्सामेत्याचक्षते कुशला यदसाधु विपरीतं तदसामेति तत्तत्रैव साध्वसाधुविवेककरणे उत अपि आहुः साम्ना आगात् राजानं सामानं तं उपागात् उपगतवान् कोऽसौ यतोऽसाधुत्वप्राप्त्याशंका स तस्मिन्नित्यभिप्रायः शोभनाभिप्रायेण साधुनैनमुपागादित्येवं तत्रा

समस्तस्य खलु साम्न उपासनं साधु यत्खलु साधु तत्सामेत्याचक्षते यदसाधु तदसामेति तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः स य एतदेवं विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनं साधवो धर्मा आ च गच्छेयुरुप च नमेयुः १

हु लौकिकाः बंधनाद्यसाधुकार्यं पश्यंतो यत्र पुनर्विपर्ययो बंधनाद्यसाधुकार्यं पश्यंति तत्रासाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः अथोताप्या-
हुः स्वसंवेद्यं साम नोऽस्माकं बतेत्यनुकंपयंतः संवृत्तमित्याहुः एतदुक्तं भवति यत्साधु भवति साधु बतेत्येव तदाहुः विपर्यये जातेऽसाम नो बतेति यदसा-
धु भवत्यसाधु बतेत्येव तदाहुः तस्मात्साम साधुशब्दयोरेकार्थत्वं सिद्धम् अतः स यः कश्चित्साधु सामेति साधुगुणवत्सामेत्युपास्ते समस्तं साम साधुगु-
णवद्दृष्टं तस्यैतत्फलम् अभ्याशो ह क्षिप्रं ह यदिति क्रियाविशेषणार्थम् एनमुपासकं साधवः शोभना धर्माः श्रुतिस्मृत्यविरुद्धाः आ च गच्छेयुः न केव-
लमागच्छेयुः उप च नमेयुः उपनमेयुः भोग्यत्वेनोपतिष्ठेयुरित्यर्थः १ ॥ २ ॥ ३ (गच्छेयुः)

मनो

राम०
१९

38

कानि पुनस्तानि साधुदृष्टिविशिष्टानि समस्तानि सामान्युपास्यानीति इमानि तान्युच्यंते लोकेषु पंचविधमित्यादीनि ननु लोकादिदृष्ट्या तान्युपास्यानि
साधुदृष्ट्या चेति विरुद्धम् न साध्वर्थस्य लोकादिकार्येषु कारणस्यानुगतत्वात् मृदादिवद्घटादिविकारेषु साधुशब्दवाच्योऽर्थो धर्मो ब्रह्म वा सर्वथापि
लोकादिकार्येष्वनुगतो यथा यत्र घटादिदृष्टिर्मृदादिदृष्ट्यनुगतैव तथा साधुदृष्ट्यनुगतैव लोकादिदृष्टिः धर्मादिकार्यत्वाल्लोकादीनां यद्यपि कारणा-
त्मविशिष्टं ब्रह्म धर्मो वा तथापि धर्मस्यैव साधुशब्दवाच्यत्वं प्रसिद्धतरम् साधुकारी साधुर्भवतीति कार्यविषये साधुशब्दप्रयोगात् ननु लोकादिकार्येषु
कारणस्यानुगतत्वात् तदर्थप्राप्तैव तद्दृष्टिरिति साधुसामेत्युपास्त इति न वक्तव्यं न शास्त्रगम्यत्वात् दृष्टेः सर्वत्र हि शास्त्रप्रापिता एव धर्मादिपासाः न वि-
द्यमाना अप्यशास्त्रीयाः लोकेषु पृथिव्यादिषु पंचविधं पंचभक्तिभेदेन पंचप्रकारं साधु समस्तं सामोपासीत कथं पृथिवी हिंकारः लोकेष्विति स

लोकेषु पंचविधं सामोपासीत पृथिवी हिंकारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु अथावृत्तेषु द्यौर्हिंकार आदि-
त्यः प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनं कल्पंते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवं विद्वाँल्लोकेषु पंचविधं सामोपास्ते २

प्तमीं तां प्रथमात्वेन विपरिणम्य पृथिवीदृष्ट्या हिंकारे पृथिवी हिंकार इत्युपासीत व्यस्तसप्तमीश्रुतिं लोकविषयां हिंकारादिषु पृ-
थिव्यादिदृष्टिं कृत्वोपासीत तत्र पृथिवी हिंकारः प्राथम्यसामान्यात् अग्निः प्रस्तावः अग्नौ हि कर्माणि प्रस्तूयंते प्रस्तावश्च भक्तिः अंतरिक्षमुद्गीथः अंतरिक्षं
गगनं गकारविशिष्टश्चोद्गीथः आदित्यः प्रतिहारः प्रतिप्राण्यभिमुखत्वान्मां प्रति मां प्रतीति द्यौर्निधनं दिवि निधीयंते हीतो गता इत्यूर्ध्वगतेषु
लोकदृष्ट्या सामोपासनं यथावृत्तेषु चावृत्तेषु पंचविधमुच्यते सामोपासनं गत्यागतिविशिष्टा हि लोकाः यथा तेन तथा दृष्ट्यैव सामोपासनं वि-
धीयते यतः आवृत्तेषु लोकेषु द्यौर्हिंकारः प्राथम्यादादित्यः प्रस्तावः उदिते ह्यादित्ये प्रस्तूयंते कर्माणि प्राणिनाम् अंतरिक्षमुद्गीथः पूर्ववत् अग्निः प्रति-
हारः प्राणिभिः प्रतिहरणादग्नेः पृथिवी निधनं तत आगतानामिह निधनात् उपासनफलं कल्पंते समर्था भवंति हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च
गत्यागतिविशिष्टा भोग्यत्वेन व्यवतिष्ठंत इत्यर्थः य एतदेवं विद्वाँल्लोकेषु पंचविधं समस्तं साधु सामेत्युपास्त इति सर्वत्र योजना पंचविधे सप्तविधे च २

हि

८

धर्म

39

वृष्टौ पंचविधं सामोपासीत लोकस्थितेर्वृष्टिनिमित्तत्वादानंतर्यं पुरोवातो हिंकारः पुरोवाताद्युद्ग्रहणांता हि वृष्टिर्यथा सामहिंकारादिनिधनांतमतः
पुरोवातो हिंकारः प्राथम्यान्मेघो जायते स प्रस्तावः प्रावृषि मेघजनने वृष्टेः प्रस्ताव इति हि प्रसिद्धिर्वर्षति स उद्गीथः श्रैष्ठ्याद्विद्योतते स्तनयति स प्रतिहारः
प्रतिहृतत्वादुद्गृह्णातीति तन्निधनं समाप्तिसामान्यात्फलमुपासनस्य वर्षति हास्मै इच्छातस्तथा वर्षयति हासत्यामपि वृष्टौ य एतमित्यादि पूर्ववत् ३

वृष्टौ पंचविधं सामोपासीत पुरोवातो हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनं
वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पंचविधं सामोपास्ते ३ सर्वास्वप्सु पंचविधं सामोपासीत मेघो यत्संप्लवते स हिंकारो यद्वर्ष
ति स प्रस्तावो याः प्राच्यः स्यंदंते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनं न हाप्सु प्रैत्यप्सुमान्भवति य एतदेवं विद्वान्सर्वास्वप्सु पंच
विधं सामोपास्ते ४

सर्वास्वप्सु पंचविधं सामोपासीत वृष्टिपूर्वकत्वात्सर्वासामपामानंतर्यं मेघो यत्संप्लवते एकीभावेनेतरेतरं घनीभवति मेघो यदा उन्नतस्तदा संप्लवत
इत्युच्यते तदापामारंभः स हिंकारो यद्वर्षति स प्रस्ताव आपः सर्वतो व्याप्तुं प्रस्तुता याः प्राच्यः स्यंदंते स उद्गीथः श्रैष्ठ्याद्याः प्रतीच्यः स प्रतिहारः प्रतिशब्द
सामान्यात्समुद्रो निधनं तन्निधनत्वादपां न हाप्सु प्रैति नेच्छति चेदप्सुमानस्माद्भवति फलम् ४

ऋतुषु पंचविधं सामोपासीत ऋतुव्यवस्थायाः पयोऽग्निमित्तत्वादानंतर्यं वसंतो हिंकारः प्राथम्याद्ग्रीष्मः प्रस्तावो यवादिसंग्रहः प्रस्तूयते हि प्रावृड्वर्षा उ
द्गीथः प्राधान्याच्छरत्प्रतिहारो रोगिणां मृतानां च प्रतिहरणाद्धेमंतो निधनं निवाते निधनात्प्राणिनां फलं कल्पंते ऋतव ऋत्ववस्थानुरूपभोग्यत्वेनास्मा उपासका ना
यर्तव ऋतुमानार्तवैर्भोगैश्च संपन्नो भवतीत्यर्थः ५ पशुषु पंचविधं सामोपासीत सम्यक्वृत्ते वृष्टे तु पशव्यः कालस्तस्मादानंतर्यमजा हिंकारः प्राधान्या

ऋतुषु पंचविधं सामोपासीत वसंतो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमंतो निधनं कल्पंते हास्मा ऋतव ऋतुमान्भवति य
एतदेवं विद्वानृतुषु पंचविधं सामोपास्ते ५ पशुषु पंचविधं सामोपासीताजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो
निधनं भवंति हास्य पशवः पशुमान्भवति य एतदेवं विद्वान्पशुषु पंचविधं सामोपास्ते ६

प्राथम्याद्ध्यजः पशूनामिति श्रुतेरवयः प्रस्तावः साहचर्यादजानां गाव उद्गीथः श्रैष्ठ्यादश्वाः प्रतिहारः प्रतिहरणात्पुरुषाणां पुरुषो निधनं पुरुषाश्रय
त्वात्पशूनां फलं भवति हास्य पशवः पशुमान्भवति पशुफलैश्च भोगयागादिभिर्युज्यत इत्यर्थः ६ श्रीरामनामनामः

छां॰ शं॰ २०

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत परं परं वरीयस्त्वगुणवत्त्वात् दृष्टिविशिष्टं सामोपासीतेत्यर्थः प्राणो हिंकारः उत्तरोत्तरवरीयस्त्वं प्राणस्याह्य तत्र तावद्वेवा प्राण॰
चाहि प्रस्तूयते सर्वदा वरीयसी प्राणादिप्राणं त्वस्पृशं तेवाचा प्राणं स्पेकृतु गंधस्य ग्राहकः प्राणो वा चो वह तरं विषयं प्रकाशमति चक्षुरतोवरीयो ~~चक्षुः श्रोत्रस्य~~ वा
चक्षुरी यः श्रोत्रादुत्तरः प्रतिहारः प्रतिहृतत्वाद्वरीयस्त्वं श्रोत्रस्य सर्वतः श्रवणात् मनो निधनं मनसि हि निधीयन्ते पुरुषस्य भोग्यत्वेन सर्वेन्द्रियाहृता विषया वरीयस्त्वं
८ च श्रोत्रान्मनसः सर्वेन्द्रियविषयव्यापकत्वात् इन्द्रियविषयोऽपि मनसो गोचरः एवेति यथोक्तहेतुभ्यः परोवरीयांसि प्राणादीनि वेदितान्येतद्दृष्ट्या विशिष्टं परोव

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयांसि वा एतानि परोवरीयो
हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य ७ अथ सप्तविधस्य
वाचि सप्तविधं सामोपासीत यत्किंच वाचो हुं इति स हिंकारो यत्प्रेति स प्रस्तावो यदेति स आदिः यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो
यदुपेति स उपद्रवो यन्नीति तन्निधनं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधं सामोपास्ते ८

वरीयः सामोपास्ते परोवरीयो हास्य जीवनं भवतीत्युक्तार्थमिति तु पञ्चविधस्य साम्न उपासनमुक्तमिति सप्तविधस्येदानीं समस्तस्य साम्न उपासनं तस्य विषये बुद्धिसमाधानार्थं नि
रपेक्षो हिंकारविशिष्टस्य साम्नो बुद्धिसमाधित्सति ७ अथानन्तरं सप्तविधस्य साम्न उपासनं साद्धिरारभ्यते वाचीति सप्तमी पूर्ववद्वाग्दृष्टिविशिष्टं
सप्तविधं सामोपासीत यत्किंच वाचः शब्दस्य हुमिति यो विशेषः स हिंकारो हकारसामान्यात् यत्प्रेति शब्दरूपं स प्रस्तावः प्रसामान्यात् यदा इति स
आदिराकारसामान्यादादिरित्योंकारः सर्वादित्वात् यदुदिति स उद्गीथ उत्पूर्वत्वात् यत्प्रतीति स प्रतिहारः प्रतिसामान्याद् यदुपेति स उपद्रवः उपोपक्रमत्वात्
उद्गीथ स्मा॰
उपद्रव॰
आदिराकारसामान्यादादिरित्योंकारः सर्वादित्वात् ... अन्यत्रवसद्यन्नीति तन्निधनं निशब्दसामान्यात् दुग्धेऽस्मै इत्याद्युक्तार्थम् ८

साम॰ २०

अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सप्तविधस्येदानीं समस्तस्य साम्न आदित्यदृष्ट्या उपासनमुच्यते आदित्ये मुखवीक्षणयुक्तानां नास्ति खल्वमुमादित्यं समस्तसाम्ना विषयव्यवविभागशो सप्तविधं सामोपासीत
कथं पुनः साम त्वमादित्यस्येत्युच्यते उद्गीथत्वे हेतुवत्साम्नो हेतुः कोऽसौ सर्वदा समः वृद्धिक्षयाभावात्तेन हेतुना सामादित्यो मां प्रति मां प्रतीति वा
तुल्यां बुद्धिमुत्पादयत्यतः ~~सर्वदा समत्वात्~~ सर्वैः सम इति सामसमत्वादित्यस्य उद्गीथसामान्यवचनात् लोकादिषूक्तसामान्यात् हिंकारादित्वं गम्यते र मक्ति
२७ ति हिंकारादित्वेऽकारादीनां निरुक्तसामत्वे पुनः सर्वितृ उकारादीनां समत्वे प्रमितिसमत्वसमत्वात्तस्मिन्नादित्ये वयव विभागशस्तस्मात्तिरस्मादादानि सप्तविधानि
भक्तानि स्यात्प्रभृतानि गतान्यादित्यमुपजीवन्त्येनेनेति विद्यात्कथं तस्मादित्यस्य यत्पुरोदयाद्धर्मरूपं स हिंकारो भक्तिस्तत्रेदं सामान्यं यत्तस्य हिंकारभक्तिरूपं

अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम तस्मिन्निमानि सर्वाणि भूतान्यन्वा
यत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिंकारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिं कुर्वन्ति हिंकारभाजिनो ह्येतस्य साम्नोऽथ यत्प्रथमोदिते स प्र
स्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशंसाकामाः प्रस्तावभाजिनो ह्येतस्य साम्नोऽथ यत्संगववेलायां स आदि
स्तदस्य वयांस्यन्वायत्तानि तस्मात्तान्यन्तरिक्षे

तदस्यादित्यस्य साम्नः पशवो गवादयोऽन्वायत्ता अनुगतास्तद्भक्तिरूपमुपजीवन्तीत्यर्थो यस्मादेवं तस्मात्ते हिं कुर्वन्ति पशवः प्रागुदयात्तस्माद्धिंकारभाजि
नो ह्येतस्यादित्याख्यस्य साम्नस्तद्भक्तिभजनशीला हि ते वर्तन्ते अथ यत्प्रथमोदिते सवितृरूपं तदस्यादित्याख्यस्य साम्नः प्रस्तावस्तदस्य मनुष्या अन्वा
यत्ताः पूर्ववत्तस्मात्ते प्रस्तुतिं प्रशंसां कामयन्ते यस्मात्प्रस्तावभाजिनो ह्येतस्य साम्नोऽथ यत्संगववेलायां गवां रश्मीनां संगमनं संगवो यस्यां वेलायां ग
वां वा वत्सैः सह सा संगववेला तस्मिन्काले यत्सावित्रं रूपं स आदिर्भक्तिविशेष ओंकारस्तदस्य वयांसि पक्षिणोऽन्वायत्तानि यत एवं तस्मात्तानि ॥ ३

छां॰ श॰
२२

005542

योस्यंतरिक्षे अनारंबणानि अनालंबनानि आत्मानमादायात्मानमेवालंबनेन गृहीत्वा परिपतंतीति गच्छंति तस्मात्कारणात्ते आदिभक्तिभाजीनि सेत
स्मात्साम्नो यथयत्सं प्रतिमध्यंदिने स उद्गीथभक्तिस्तदस्य देवा अन्वायत्ता श्रेष्ठतमा हि ते प्राजापत्यानां तस्मात्ते सत्तमा विशिष्टतमाः प्रा
जापत्यानां प्रजापतेरपत्यानामुद्गीथभाजिनो ह्येतस्य साम्नो यथयदूर्ध्वं मध्यंदिनात्प्रागपराह्णात्सह्यप्रतिहारस्तदस्य गर्भा अन्वायत्ताः अत
स्ते सवितुः प्रतिहारेणापहृता ऊर्ध्वं प्रतिहृताः संतो नावपद्यंते नाधः पततीति हारे सतिपतन्ययोयतः प्रतिहारभाजिनो ह्येतस्य साम्नो गर्भा अथयदूर्ध्वमपराह्णा

प्रति

44

नारंवरणामादायात्मानं परिपतंत आदिभाजीनि ह्येतस्य साम्नो यथयत्संप्रतिमध्यंदिने स उद्गीथस्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्या
नामुद्गीथभाजिनो ह्येतस्य साम्नो यथयदूर्ध्वं मध्यंदिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यंते प्रति
हारभाजिनो ह्येतस्य साम्नो यथयदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षं श्वभ्रमित्युपद्र
वंत्युपद्रवभाजिनो ह्येतस्य साम्नो यथयत्प्रथमास्तमिते तन्निधनं तदस्य पितरोन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एवं खलु
मुमादित्यं सप्तविधं सामोपास्ते ९

अथयदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा भीताः कक्षं श्वभ्रं भयशून्यमित्युपद्रवंत्युपगच्छंति दृष्ट्वोपद्रवणादुप
द्रवभाजिनो ह्येतस्य साम्नो यथयत्प्रथमास्तमिते दर्शनं जिगमिषु सवितरि तन्निधनं तदस्य पितरोन्वायत्तास्तस्मात्तान्निदधति पितृपितामहप्रपिता
महरूपेणादर्भेषु निक्षिपंतितान्तदर्थं पिंडान्वा स्थापयंतीति निधनसंबंधान्निधनभाजिनो ह्येतस्य साम्नः पितर एवमेवावयवशः सप्तधा विभक्तं खल्व
मुमादित्यं सप्तविधं सामोपास्ते तस्य तदापत्तिः फलमिति वाक्यशेषः ९ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

साम॰
२२

मृत्युरादित्यः अहोरात्रादिकालेन जगतः प्रमायितृत्वात्तस्यातितरणायेदं सामोपासनमुपदिश्यते अथ खल्वनंतरमादित्यविषयसामोपासन
स्यात्मसंमितं स्वावयवतुल्यतया मितं परमात्मतुल्यतया वा संमितं अतिमृत्युमृत्युसमंपहेतुत्वात्प्रथमे उपेयोद्गीथभक्तिनामाक्षराण्युद्गीथ इ
त्युपास्ते नोक्तानि तथेह साम्नः सप्तभक्तिनामाक्षराणि समाहृत्य त्रिभिस्त्रिभिः समतया साम तत्परिकल्प्य तदुपासनेन मृत्युगोचराक्षरसंख्यासा
मान्येन तं मृत्युं प्राप्य तदतिरिक्ताक्षरेण तस्यादित्यस्य मृत्योरतिक्रमणाय एवं संक्रमणं कल्पयतीति मृत्युसप्तविधं सामोपासीत मृत्युमतिक्रांतमति

45

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधं सामोपासीत हिंकार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम् ॥ आदिरिति द्व्यक्षरं प्रतिहार इति च
तुरक्षरं तत इहैकं तत्समम् ॥ उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं ॥ ॥ ॥ २

रिक्ताक्षरसंख्यपेक्षतिमृत्युसाम तस्य प्रथमभक्तिनामाक्षराणि हिंकार इत्येतत्त्र्यक्षरं भक्तिनाम प्रस्ताव इति च भक्तेस्त्र्यक्षरमेव नाम तत्पूर्वेण स
ममादिरिति द्व्यक्षरं सप्तविधस्य साम्नः संख्यापूरणा ओंकार आदिरित्युच्यते प्रतिहार इति चतुरक्षरं तत इहैकमक्षरमपच्छिद्याद्यक्षरयोः प्रक्षिप्यते
तेन तत्सममेव भवती उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षर ॥ श्रीसामवेदाय ॥ ॥ २ श्रीरामनाः

मतिशिष्यते इति गीयते तेनैव षष्ठ्यै प्रास्तावाम्नः समलं कारणायाह तदेकं सप्त सत्यस्य रमितिमेव भवति अत तत्त्वस्मिन् निधन मिति अक्षरं तत्सममेव भवति एवं अक्षर समतया साम सं संपाद्य यथा प्रागाम्न्यैवा क्षराणि संख्याप्यते तानि हवा एतानि सप्त भक्तिनामाक्षराणि द्वाविंशतिस्तेनैकविंशत्यक्षरं स्यापादि समाप्नोति मन्तेयु यस्मादेकविंशतितो मा ज्ञिकादित्या वदित्यः संख्यया द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंशः इत्यादि ते

तत्समं निधन मिति अक्षरं तत्सममेव भवति तानि हवा एतानि द्वाविंशतिरक्षराणि एकविंशत्यादित्यमाप्नोत्येकविंशो वा इतोसावा दित्यो द्वाविंशेन परमादित्या ज्जयति तन्नाकं तद्विशोकं माप्नोति हादित्यस्य जयं परो हास्यादित्यजयाज्जयो भवति य एतदेवं विद्वानात्म संमितमतिमृत्यु सप्तविधं सामोपास्ते सामोपास्ते १०

तिशिष्टेन द्वाविंशेनाक्षरेणापरं सत्य एतादित्याज्जुयसामोतीत्यर्थः यच्च तदादित्या त्परं तत्किं तन्नाकं कमिति सुखं तस्य प्रतिषेधो ऽकं तन्न भवतीति नाकं कमेव स यः तद्विषयत्वादुःखस्य विशोकं च तद्विगतशोकं मानसदुःखरहितमित्यर्थः तदाप्नोतीत्युक्तस्यैव पिंडार्थमाह एकविंशति संख्यया दित्यस्य जयं परो हास्यैवं विदः आदित्यजयात्सुखो वराय्य रोज यो भवति द्वाविंशत्यक्षर संख्ययेत्यर्थोपर तदेवं विद्वानित्साधु कार्थं तस्यैतद्य

माप्नोतिध्ये

विनानामग्रहणं पंचविधस्य सप्तविधस्य च साम्न उपासनमुक्तं मथेदानीं गायत्रादिनामग्रहण पूर्वकं विशिष्टफलानि सामोपासनान्तराण्युच्यंते यथाक्रमं गायत्री दीनां कर्मणि प्रयोगस्तथैव मनो हिंकारो मनसः सर्वकरणप्रवृत्तीनां प्राथम्यात्तदानंतर्याद्वाक्प्रस्तावश्चक्षुरुद्गीथः श्रेष्ठ्यात् श्रोत्रं प्रतिहारः प्रतिहृतत्वात्प्राणो निधनं यथोक्तानां प्राणे निधानात्स्वापकाले एतद्गायत्रं साम प्राणेषु प्रोतं गायत्र्याः प्राणसंस्तुतत्वात् स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति अविकलकरणो भवतीत्येतत् सर्वमायुरेति शतं वर्षाणि सर्वमायुः पुरुषस्य श्रुतेः ज्योग्ज्वलं जीवति महान्भवति प्रजादिभिर्महांश्च कीर्त्या गायत्रोपासकस्य

मनो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतं स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या महामनाः स्यात्तद्व्रतं ११ अभिमंथति स हिंकारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽंगारा भवंति स प्रतिहार उपशाम्यति तन्निधनं संशाम्यति तन्निधनमेतद्रथंतरमग्नौ प्रोतं स य एवमेतद्रथंतरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतं १२

तद्व्रतं भवति यन्महामनस्त्वं महामना अक्षुद्रचित्तः स्यादित्यर्थः ११ अभिमंथति स हिंकारः प्राथम्यात् धूमो जायते स प्रस्ताव आनंतर्यात् ज्वलति स उद्गीथो हविःसंबंधाच्छ्रैष्ठ्याज्ज्वलनस्य अंगारा भवंति स प्रतिहारोंऽगाराणां प्रतिहृतत्वात् उपशमः सावशेषत्वादग्नेः संशमो निःशेषोपशमः समाप्तिसामान्यान्निधनमेतद्रथंतरमग्नौ प्रोतं मथने ह्यग्निर्गीयते स य एवमेतद्रथंतरमग्नौ प्रोतं वेद ब्रह्मवर्चसी वृत्तस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसं तेजस्तु केवलं त्विड्भावः अन्नादो दीप्ताग्निः प्रत्यङ्ङग्निरभिमुखो नाचामेन्न भक्षयेत् किंचिन्न च निष्ठीवेत् श्लेष्मनिरसनं च न कुर्यात्तद्व्रतं १२ १२ १२ १२ १२

व॰

छां॰ उ॰
२८

५८

उपमंत्रयते संकेतं करोति प्राथम्यात् हिंकारो ज्ञपयते तोषयति स प्रस्तावः सह शयनमेकपर्यंकगमनमुद्गीथः श्रेष्ठत्वात् प्रति स्त्रीं शयनं स्त्रियोऽभिमुखीभा
वः स प्रतिहारः कालं गच्छति मैथुनेन पारं समाप्तिं च गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतं वायुवं मिथुनसंबंधात् स य एवमित्यादि पूर्ववन्मिथुनी भवति
विधुरो भवतीत्यर्थः मिथुनान्मिथुनात्प्रजायते ऽमोघरेतस्त्वमुच्यते न कांचन कांचिदपि स्त्रियं स्वात्मतल्पप्राप्तां न परिहरेत् सामोपासनांगत्वेन विधानात्

उपमंत्रयते स हिंकारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेत
द्वामदेव्यं मिथुने प्रोतं॰ स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनी भवति मिथुनान्मिथुनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्रजया
पशुभिर्भवति महान्कीर्त्या न कांचन परिहरेत्तद्व्रतं १३ उद्यन्हिंकार उदितः प्रस्तावो मध्यंदिन उद्गीथो ऽपराह्णः प्रतिहारोऽस्तं यन्निधनमेत
द्बृहदादित्ये प्रोतं॰ स य एवमेतद्बृहदादित्ये प्रोतं वेद तेजस्व्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या
तपन्तं न निंदेत्तद्व्रतं १४

पासनांगत्वेन विधानादेतस्मादन्यत्र प्रतिषेधस्मृतयः वचनप्रामाण्याच्च धर्मावगतेर्न प्रतिषेधशास्त्रेणास्य विरोधः ॐ उद्यन्सविता हिंकारः प्राथ
म्यात् दर्शनस्य उदितः प्रस्तावः प्रस्तवनहेतुत्वाल्लोकानां मध्यंदिन उद्गीथः श्रैष्ठ्यादपराह्णः प्रतिहारः पश्वादीनां गृहान्प्रतिहरणादस्तं यत्तन्नि
धनं रात्रौ गृहे निधानात्प्राणिनामेतद्बृहदादित्ये प्रोतं बृहत आदित्यदैवत्यत्वात् स य इत्यादि पूर्ववत्तपन्तं न निंदेत्तद्व्रतं १४ ॥ ॥ ४१

वा
सं

अभ्रात्प्लवते ... एतद्वैरूपं नाम साम पर्जन्ये प्रोतमनेकरूपत्वादभ्रादिभिः पर्जन्यस्य वैरूप्यं विरूपांश्च सुरूपांश्च जाविप्रभृ
तीन्पशूनवरुंधे प्रोती स य इत्यादि तं न निंदेत्तद्व्रतम् १५ वसंतो हिंकारः प्राथम्यात् ग्रीष्मः प्रस्तावः समानमन्यत् पूर्ववत् एतद्वैराजमृतुषु प्रोतं वेद विराजति ऋतुवद्य

अभ्राणि संप्लवंते स हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतं॰
स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपांश्च सुरूपांश्च पशूनवरुंधे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या वर्षंतं न
निंदेत्तद्व्रतम् १५ वसंतो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमंतो निधनमेतद्वैराजमृतुषु प्रोतं॰ स य एवमेतद्वैराजमृतु
षु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ऋतून्न निंदेत्तद्व्रतम् १६ पृ
थिवी हिंकारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः स य एवमेताः शक्वर्यो लोकेषु प्रोता
वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निंदेत्तद्व्रतं १७ अजा हिंकारोऽवयः प्रस्तावो गाव
उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः स य एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान्भवति सर्वमायुरेति ज्योग्जीव
ति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पशून्न निंदेत्तद्व्रतं १८

र्त्विग्वा आर्तवैर्द्वैमैर्विराजते तथैवं प्रजादिभिर्विद्वानित्युक्तमन्यदृतून्न निंदेत्तद्व्रतं १६ पृथिवी हिंकार इत्यादि पूर्ववच्छक्वर्य इति नित्यं बहुवचनं रेवत्य इव लोकेषु
प्रोता लोकी भवति लोकफलेन संयुज्यते इत्यर्थो लोकान्न निंदेत्तद्व्रतं १७ अजा हिंकार इत्यादि पूर्ववत्पशुषु प्रोताः पशून्न निंदेत्तद्व्रतम् १८ १८

५९

छां० शं०
२५

लोमहिंकारो देहावयवानां प्राथम्यात्त्वक्प्रस्ताव आनंतर्यान्मांसमुद्गीथः श्रेष्ठ्यादस्थि प्रतिहारः प्रतिहृततान्मज्जा निधनमंत्यत्वादेतद्यज्ञायज्ञीयं नाम सामदेहा-
वयवेषु प्रोतं स य एवमेतद्यज्ञायज्ञीयमंगेषु प्रोतं वेद अंगीभवति समग्रांगो भवति अंगैर्न विहूर्छति न कुटिलो भवति पंगुः कुणिर्वेत्यर्थः सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ज्ञो नाश्नीयान्मज्जानं नाश्नीयात्सर्वमेव मासं नाश्नीयादिति वा व्रतम् १९ अग्निर्हिंकारः प्रथमस्थानत्वात् वायुः प्रस्ताव आनंतर्यसामा-
न्यात् ...

लोम हिंकारस्त्वक्प्रस्तावो मांसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमंगेषु प्रोतं स य एवमेतद्यज्ञायज्ञीयमंगेषु प्रोतं वेदांगी भ-
वति नांगेन विहूर्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ज्ञो नाश्नीयात्तद्व्रतं मज्ज्ञो नाश्नीयादिति वा १९
अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चंद्रमा निधनमेतद्राजनं देवतासु प्रोतं स य एवमेतद्राजनं देवता-
सु प्रोतं वेदैतासामेव देवतानां सलोकतां सार्ष्टितां सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या
ब्राह्मणान्न निंदेत्तद्व्रतम् २० ति

माहात्म्यादुद्गीथः श्रेष्ठ्यान्नक्षत्राणि प्रतिहारः प्रतिहृतत्वाच्चंद्रमा निधनं कर्मिणां तन्निधानादेतद्राजनं देवतासु प्रोतं देवतानां दीप्तिमत्त्वाद्धि राजनं
लमेतासामेव ... देवतानां सलोकतां समानलोकतां सार्ष्टितां समानर्द्धित्वं सायुज्यं सयुग्भावमेकदेहदेहित्वमित्येतत् ...
ष्यः सलोकतां वेत्सादिभावनाविशेषतः फलविशेषोपपत्तेर्गच्छति प्राप्नोति समुच्चयानुपपत्तेः ब्राह्मणान्न निंदेत्तद्व्रतमेते वै देवाः प्रत्यक्ष-
तो ब्राह्मणा इति श्रुतेर्ब्राह्मणनिंदा देवतानिंदैवेति २०

रा० २५

त्रयी विद्या हिंकारः अग्न्यादिसाम्न आनंतर्यं त्रयी विद्याया अग्न्यादिकार्यत्वश्रुतेर्हिंकारः प्राथम्यात्सर्वकर्तव्यानां त्रय इमे लोकास्तत्कार्यत्वादनंतराः इति प्रस्तावः
अग्न्यादीनामुद्गीथत्वं श्रेष्ठ्यान्नक्षत्राणीनां प्रतिहृतत्वात्प्रतिहारत्वं सर्पादीनां ... साम्नामान्निधनत्वमेतत्साम नामविशेषाभावात् साम समुदायः साम सा-
मान्यं सर्वस्मिन्प्रोतं त्रयी विद्यादि हि सर्वं त्रयी विद्या हि हिंकारादि साम भक्त्यपि ... एतेष्वपि सामोपासनेषु यत्र यत्र प्रोतं यत्साम तद्दृष्ट्या तदुपास्य-
मिति कर्मांगानां दृष्टिविशेषेण ... सर्वविषयसामवित् फलं सर्वं ह भवति सर्वेश्वरो भवतीत्यर्थो निरुपचरितसर्वभावे हि दिक्स्थेभ्यो

त्रयी विद्या हिंकारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयांसि मरीचयः स प्रतिहारः सर्पा गंधर्वाः पितरस्तन्निधनमेत-
त्साम सर्वस्मिन्प्रोतं स य एवमेतत्साम सर्वस्मिन्प्रोतं वेद सर्वं ह भवति तदेष श्लोको यानि पंचधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति य-
स्तद्वेद स वेद सर्वं सर्वा दिशो बलिमस्मै हरंतीति सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतं २१ ७ २१ ७ ॥२

बलिमस्मै उपपत्तिस्तदेतस्मिन्नर्थे एष श्लोको मंत्रोऽप्यस्ति यानि पंचधा पंचप्रकारेण हिंकारादिविभागैः प्रोक्तानि त्रीणि त्रीणि त्रयी विद्यादीनि तेभ्यः पं-
चत्रिकेभ्यो ज्यायो महत्तरं परं व्यतिरिक्तमन्यद्वस्त्वंतरं नास्ति न विद्यत इत्यर्थः तत्रैवं हि सर्वं संतर्भावोपपत्तेर्यथोक्तं सर्वात्मकं साम वेद स वेद सर्वं स सर्वज्ञः सर्व-
ज्ञो भवतीत्यर्थः सर्वा दिशः सर्वदिक्स्था अस्मा एवंविदे बलिं भोगं हरंति प्रापयंतीत्येतत्सर्वमस्मि भवामीत्येवमेतत्सामोपासीत तस्यैतदेव व्रतं द्विरुक्ति-
ः सामोपासनसमाप्त्यर्था २१ ७ ७

छां॰ शं॰
२६

सामोपासनप्रसङ्गेन गानविशेषादिसंपदुद्गातुरुपदिश्यते फलविशेषसंबन्धात् विनर्दि विशिष्टो नर्दः स्वरविशेष ऋषभकूजितसमोऽस्यास्तीति विनर्दि गानमिति वाक्यशेषः तच्च साम्नः संबन्धि पशुभ्यो हितं पशव्यमग्नेरग्निदेवत्यं चोद्गीथ उद्गानं तदहमेवंविशिष्टं वृणे प्रार्थय इति कश्चिद्यजमान उद्गाता वा मन्यते अनिरुक्तोऽमुकसम इत्यविशेषितः प्रजापतेः प्रजापतिदेवत्यः स गानविशेषः अनिरुक्तत्वात्प्रजापतेर्निरुक्तः स्पष्टः सोमस्य सोमदेवत्यः स उद्गीथ इत्यर्थः मृदु श्लक्ष्णं च गानं वायोर्वायुदेवत्यं तत् श्लक्ष्णं बलवच्च प्रयत्नाधिक्योपेतं चेन्द्रस्यैन्द्रं तद्गानं क्रौञ्चं क्रौञ्चपक्षिनिनादसमं बृहस्पतेर्बार्हस्पत्यं तदपध्वान्तं भिन्नकांस्यस्वनसमं वरुणस्य तद्गानं

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तं वरुणस्य तान्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत् ॥ अमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्तः स्तुवीत ॥ सर्वे स्वरा इन्द्रस्यात्मानः ॥ २ ॥

सर्वे स्वरा इन्द्रस्यात्मानः तान्सर्वानेवोपसेवेत प्रयुञ्जीत वारुणं त्वेवैकं वर्जयेत् अमृतत्वं देवेभ्य आगायानि साधयानि स्वधां पितृभ्य आगायानि आशां मनुष्येभ्य आशां प्रार्थनां प्रार्थितमित्येतत् तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मने मह्यमागायानीत्येतानि मनसा चिन्तयन् ध्यायन्नप्रमत्तः स्वरोष्मव्यञ्जनादिभ्यः स्तुवीत सर्वे स्वरा अकारादय इन्द्रस्य बलकर्मणः प्राणस्यात्मानो देहावयवस्थानीयाः सर्व ऊष्माणः शष ॥ ॥ ॥ ३
सहादयः प्रजापतेर्विराजः कश्यपस्य वात्मानः सर्वे स्पर्शाः ॥ ४ ॥

राम॰
२६

52

ककारादयो व्यञ्जनानि मृत्योरात्मानस्तमेवंविदमुद्गातारं यदि कश्चित्स्वरेषूपालभेत स्वरस्त्वया दुष्टः प्रयुक्त इत्येवमुपालब्ध इन्द्रं प्राणमीश्वरं शरणमाश्रयं प्रपन्नोऽभूवं स्वरान्प्रयुञ्जानोऽहं स इन्द्रो यत्तव वक्तव्यं तत्त्वा त्वां प्रति वक्ष्यति स एव देव उत्तरं दास्यतीत्येनं ब्रूयादथ यद्येनमूष्मसु तथैवोपालभेत प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रतिपेक्ष्यति संचूर्णयिष्यतीत्येनं ब्रूयादथ यद्येनं स्पर्शेषूपालभेत मृत्युं शरणं प्रपन्नोऽभूवं स त्वा प्रतिधक्ष्यति भस्मीकरिष्यति

53

सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेन्द्रं शरणं प्रपन्नोऽभूवं स त्वा प्रति वक्ष्यतीत्येनं ब्रूयात् अथ यद्येनमूष्मसूपालभेत प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रति पेक्ष्यतीत्येनं ब्रूयादथ यद्येनं स्पर्शेषूपालभेत मृत्युं शरणं प्रपन्नोऽभूवं स त्वा प्रति धक्ष्यतीत्येनं ब्रूयात् सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति सर्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति २२ ४ ३ ५

सेनं ब्रूयात् यत इन्द्राद्यात्मानः स्वरादयोऽतः सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्यास्तथाहमिन्द्रे बलं ददानीति तथा सर्व ऊष्माणोऽग्रस्ता अन्तरप्रवेशिता अनिरस्ता बहिरप्रक्षिप्ता विवृता विवृतप्रयत्नोपेताः प्रजापतेरात्मानं परिददानि प्रयच्छानीति सर्वे स्पर्शा लेशेन शनकैरनभिनिहिता अनभिक्षिप्ता वक्तव्या मृत्योरात्मानं परिहराणि बालानिव शनकैः परिहरन्मृत्योरात्मानं परिहराणीति २२ ॥ ३ ॥

ॐकारस्योपासनविध्यर्थं त्रयो धर्मस्कंधा इत्याद्यारभ्यते नैवं मंतव्यं सामावयवभूतस्यैवोद्गीथादिलक्षणस्योंकारस्योपासनात्फलं प्राप्य
त इति किं तर्हि यत्सर्वैरपि सामोपासनैः कर्मभिश्चाप्राप्यं तत्फलममृतत्वं केवलादोंकारोपासनात्प्राप्यत इति तत्स्तुत्यर्थं सामप्रकरणे तदुप
न्यासः त्रयः त्रिसंख्याका धर्मस्य स्कंधा धर्मस्कंधा धर्मप्रविभागा इत्यर्थः के ते इत्याह यज्ञोऽग्निहोत्रादिः अध्ययनं सनियमस्यर्गादेरभ्यासो दानं बहि
र्वेदि यथाशक्ति द्रव्यसंविभागो भिक्षमाणेभ्य इत्येष प्रथमो धर्मस्कंधो गृहस्थसमवेतत्वात्तन्निर्वर्त्तकेन गृहस्थेन निर्दिश्यते प्रथम एक इत्य

त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यंतमात्मानमाचार्यकुलेवसादयन्स
र्व एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेति ॥१॥ प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयीविद्या संप्रास्रवत्तामभ्यतपत्त
स्या अभितप्ताया एतान्यक्षराणि संप्रास्रवंत भूर्भुवः स्वरिति ॥२॥ तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओंकारः संप्रास्रवत्तद्यथा शंकुना सर्वाणि
पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णोंकार एवेदं सर्वमोंकार एवेदं सर्वं ॥३॥ २३

र्थो द्वितीयतृतीयश्रवणान्नाद्यार्थस्तप एव द्वितीय [illegible] स्तप इति कृच्छ्रचांद्रायणादि तद्वांस्तापसः
परिव्राड्वा न ब्रह्मसंस्थः आश्रमधर्ममात्रसंस्थः ब्रह्मसंस्थस्त्वमृतत्वश्रवणात् द्वितीयो धर्मस्कंधो ब्रह्मचार्याचार्यकुले वस्तुं शीलमस्ये
ति आचार्यकुलवासी अत्यंतं यावज्जीवमात्मानं नियमैराचार्यकुले वसादयन्क्षपयन्देहं तृतीयो धर्मस्कंधो अत्यंतमित्यादिविशेषणान्नैष्ठिक इति गम्य

ति पुण्यो लोको येषां त इमे पुण्यलोका आश्रमिणो भवंति अवशिष्टस्त्वनुक्तः परिव्राट् ब्रह्मसंस्थो ब्रह्मणि सम्यक्स्थितः सोऽमृतत्वं पुण्यलोकविलक्षण
ममरणमात्यंतिकं नापेक्षिकं देवाद्यमृतत्ववत् पुण्यलोकात्पृथगमृतत्वस्य विभागकरणात् यदि च पुण्यलोकातिशयमात्रममृतत्वमभविष्यत्ततः पु
ण्यलोकाद्विभक्तं नावक्ष्यत् विभक्तोपदेशाच्चात्यंतिकममृतत्वमिति गम्यते अत्र चाश्रमधर्मफलोपन्यासः प्रणवसेवास्तुत्यर्थं न तत्फलविध्यर्थं स्तु
तये च प्रणवसेवाया आश्रमधर्मफलविधये चेति हि भिद्येत वाक्यं तस्मात्स्मृतिप्रसिद्धाश्रमफलानुवादेन प्रणवसेवाफलममृतत्वं ब्रुवन्प्रण
वसेवां स्तौति यथा पूर्णवर्मणः सेवा भक्तपरिधानमात्रफला राजवर्मणस्तु सेवा राज्यफलेति तद्वत् प्रणवश्च तत्सत्यं परं ब्रह्म तत्प्रतीकत्वात् [illegible]
ध्येवास्य ब्रह्मतरां तद्ब्रह्म परमित्याद्याम्नायात्काठके युक्तं तत्सेवातोऽमृतत्वं अत्राहुः केचिच्चतुर्णामाश्रमिणामविशेषेण स्वकर्मानुष्ठानात्पु
ण्यलोकता ज्ञानवर्जितानां सर्व एते पुण्यलोका भवंतीति नात्र परिव्राडवशेषितः परिव्राजकस्यापि ज्ञानं यमनियमाश्च तप एवेति तप एव द्वि
तीयः तत्र तपःशब्देन परिव्राडुपसंगृहीतः अत एषामेव चतुर्णां यो ब्रह्मसंस्थः प्रणवसेवकः सोऽमृतत्वमेतीति चतुर्णामधिकृतत्वाविशेषाद्ब्रह्म
संस्थत्वेऽप्रतिषेधाच्च स्वधर्मच्छिद्रेषु च ब्रह्मसंस्थतायां सामर्थ्योपपत्तेः न च यववराहादिशब्दवद्ब्रह्मसंस्थशब्दः परिव्राजके रूढो ब्रह्मणि स्थितिनिमि
त्तमुपादाय प्रवृत्तत्वात् न हि रूढिशब्दा निमित्तमुपाददते सर्वेषां च ब्रह्मणि स्थितिरुपपद्यते यत्र यत्र निमित्तमस्ति ब्रह्मणि स्थितिस्तत्र तत्र निमित्त
वत्तो वाचकं संतं ब्रह्मसंस्थशब्दं परिव्राडेकविषये संकोचे कारणाभावान्निरोद्धुमयुक्तं न च पारिव्राज्याश्रमधर्ममात्रेणामृतत्वं ज्ञानानर्थक्यप्रसं
गात् पारिव्राज्यधर्मयुक्तमेव ज्ञानममृतत्वसाधनमिति चेत् न आश्रमधर्मत्वाविशेषात् धर्मो वा ज्ञानविशिष्टोऽमृतत्वसाधनमित्येतदपि सर्वाश्रम
धर्माणामविशिष्टं [illegible] न च वचनमस्ति परिव्राजकस्यैव ब्रह्मसंस्थस्य मोक्षो नान्येषामिति ज्ञानान्मोक्ष इति च सर्वोपनिषत्सु सिद्धं त
स्माद्य एव ब्रह्मसंस्थः स्वाश्रमविहितकर्मवान्सोऽमृतत्वमेतीति न कर्मनिमित्तप्रत्ययविषययोर्विरोधात् कर्त्रादिकारकक्रियाफलभेदप्रत्ययवत्त्वं हि

छां॰ शं॰ २९

निमित्तमुपादायेदं कुर्विदं मा कार्षीरिति कर्मविधयः प्रवृत्तास्तच्च निमित्तं न शास्त्रकृतं सर्वप्राणिषु दर्शनात् सदेकमेवाद्वितीयमात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमिति
शास्त्रजन्यः प्रत्ययो विद्यारूपः स्वाभाविकं क्रियाकारकफलभेदप्रत्ययं कर्मनिमित्तमनुपमृद्य न जायते भेदाभेदप्रत्यययोर्विरोधात् न हि तैमिरिकद्विचन्द्रादिभे-
दप्रत्ययमनुपमृद्य तिमिरापगमे चन्द्रैकत्वप्रत्यय उपजायते विद्याविद्याप्रत्यययोर्विरोधात् तत्रैवं सति यं भेदप्रत्ययमुपादाय सर्वकर्मविधयः प्रवृत्ताः स
यस्योपमर्दितः सदेकमेवाद्वितीयं तत्सत्यं विकारभेदोऽनृतमिति तद्वाक्यप्रमाणजनितेनैकत्वप्रत्ययेन सर्वकर्मभ्यो निवृत्तो निमित्तनिवृत्तेः स च निवृत्तकर्मा
ब्रह्मसंस्थ उच्यते स च परिव्राडेवान्यस्यासंभवात् अन्यो ह्यनिवृत्तभेदप्रत्ययः सोऽन्यत्पश्यञ्छृण्वन्मन्वानो विजानन्निदं कृत्वेदमाप्नुयामिति हि मन्यते तस्यै-
वं कुर्वतो न ब्रह्मसंस्थता वाचारम्भणमात्रविकारानृताभिसंधिप्रत्ययवत्त्वात् न चासत्यमित्युपमर्दिते भेदप्रत्यये सत्यमिदमनेन कर्तव्यं मयेति प्रमाणप्रमे-
यवद्बुद्धिरुपपद्यते आकाश इव तलवद्बुद्धिर्विवेकिनः उपमर्दितेऽपि भेदप्रत्यये कर्मभ्यो न निवर्तते चेत् प्रागिव भेदप्रत्ययोपमर्दनादेकत्वप्रत्ययविधायकं वाक्यम-
प्रामाणीकृतं स्यात् अभक्ष्यभक्षणादिप्रतिषेधवाक्यानां प्रामाण्यवद्युक्तमेकत्ववाक्यस्यापि प्रामाण्यं सर्वोपनिषदां तत्परत्वात् कर्मविधीनामप्रामाण्यप्रसं-
ग इति चेन्नानुपमर्दितभेदप्रत्ययवत्पुरुषविषये प्रामाण्योपपत्तेः स्वप्नादिप्रत्यय इव प्राक्प्रबोधात् विवेकिनामकरणात् कर्मविधिप्रामाण्योच्छेद इति चेन्न का-
म्यविध्यनुच्छेददर्शनात् न हि काममात्मतानप्रशस्तेत्येवं विज्ञानवद्भिः काम्यानि कर्माणि नानुष्ठीयन्त इति काम्यकर्मविधय उच्छिद्यन्तेऽनुष्ठीयन्त एव कामिभि-
रिति तथा ब्रह्मसंस्थैर्ब्रह्मविद्भिर्नानुष्ठीयन्ते कर्माणीति न तद्विधय उच्छिद्यन्तेऽब्रह्मविद्भिरनुष्ठीयन्त एवेति परिव्राजकानां भिक्षाचरणादिवदुत्पन्नैकत्वप्रत्य-
यानामपि गृहस्थादीनामग्निहोत्रादिधर्मानिवृत्तिरिति चेत् न प्रामाण्यचिन्तायां पुरुषप्रवृत्तेरदृष्टान्तत्वात् न हि नाभिचरेदिति प्रतिषिद्धमप्यभिचर-
णां कश्चित्कुर्वन्दृष्ट इति शत्रौ द्वेषरहितेनापि विवेकिनाभिचरणं क्रियते न च कर्मविधिप्रवृत्तिनिमित्ते भेदप्रत्यये बाधितेऽग्निहोत्रादौ प्रवर्तकं निमित्तमस्ति
परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षादि प्रवर्तकमिहाप्यकरणे प्रत्यवायभयं प्रवर्तकमिति चेत् न भेदप्रत्ययवतोऽधिकृतत्वात् भेदप्रत्ययवाननुपम-

विष

राम॰ २९

र्दितभेदबुद्धिर्विधिप्रामाण्यात्कर्मण्यधिकृतः तस्यैवाकरणे प्रत्यवायोत्पत्तिः कर्मणि तस्मात्तदकरणे प्रत्यवायो न निवृत्ताधिकारस्य गृहस्थस्येव ब्रह्मचारिणो विशेषधर्मा-
नन्विष्टानेऽस्वं तर्हि सर्वः स्वाश्रमस्थ उत्पन्नैकत्वप्रत्ययः परिव्राडिति चेन्न स्वस्वामित्वभेदबुद्ध्यनिवृत्तेः कर्मार्थत्वाच्चेतराश्रमाणामिज्यकर्म कुर्वीतेति श्रुतेः स्वा-
त्वस्वामित्वाभावाद्भिक्षुरेव परिव्राट् न गृहस्थादिरेकत्वप्रत्ययविधिजनितेन प्रत्ययेन भेदप्रत्ययस्योपमर्दितत्वाद्यमनियमाद्यनुपपत्तिः परिव्राजकस्येति चेन्न बु-
भुक्षादिनैकत्वप्रत्ययात्प्रच्यावितस्योपपत्तेर्निवृत्त्यर्थत्वात् प्रतिषेधमेवाप्राप्तिरेकत्वप्रत्ययोत्पत्तेः प्रागेव प्रतिषिद्धत्वान्न ह्यहिराज्ञौ कूपकण्टकेष्वापतित-
उदितेऽपि सर्वितपिततिततस्मिन्नेव तस्मात्सिद्धं निवृत्तकर्मा भिक्षुरेव ब्रह्मसंस्थ इति यत्तु नरुक्तं सर्वेषां ज्ञानवर्जितानां पुण्यलोकतेति स समेत-
घर्षो कं तपःशब्देन परिव्राडस्य कस्मात्तिरस्कृतस्मात् परिव्राजकस्यैव ब्रह्मसंस्थतासंभवात् स एव चावशेषितः इत्यस्यैवामृतत्वविज्ञानवतोऽग्नि-
होत्रादिस्वकर्मणो निवृत्तस्य भेदबुद्धिमत एव हि तपः कर्तव्यतासादृतेन कर्मच्छिद्रब्रह्मसंस्थतासामर्थ्यमप्रतिषेधश्च प्रसक्तस्य तथा ज्ञानवानेव निवृ-
त्तकर्मा परिव्राडिति ज्ञानवैयर्थ्यप्रसक्तम् यत्तु नरुक्तं वराहादिशब्दवत्परिव्राजकेन रूढो ब्रह्मसंस्थशब्द इति परिहृतमेतत् तस्यैव ब्रह्मसंस्थता-
संभवात्तस्येति यत्तु नरुक्तं रूढिशब्दानिमित्तं नोपादद्वरदीति तत्र गृहस्थतस्य परिव्राजकादिशब्ददर्शनात् गृहस्थितिप्रवृत्तमात्रत्वात् तत्त्रसगा-
हि निमित्तोपादानात् अपि गृहस्थपरिव्राजकावाश्रमविशेषे विशिष्टजातिमति च गृहस्थ इति परिव्राजिति तत्सेनिरूढगृहशब्दे तेशब्दाः न
यत्र यत्र तानि निमित्तानि तत्र वर्तन्ते प्रसिद्ध्यभावात् तथेहापि ब्रह्मसंस्थशब्दो निवृत्तसर्वकर्मतत्साधनपरिव्राडेकविषये आश्रमिणि परमहंसा-
ख्ये वृत्त इह भवितुमर्हति मुख्यामृतत्वफलश्रवणात् अतश्चेदमेवैकं वेदोक्तं पारिव्राज्यं न यज्ञोपवीतत्रिदण्डकमण्डल्वादिपरिग्रह इति मुण्डो-
ऽपरिग्रहोऽसंग इति च श्रुतिरत्याश्रमिभ्यः परमं पवित्रमित्यादि च श्वेताश्वतरीये न स्तुतिर्न नमस्कार इत्यादिस्मृतिभ्यश्च तस्मात्कर्म न कुर्वीतिय-
तयः पारदर्शिनः तस्मादलिङ्गो धर्मज्ञोऽव्यक्तलिङ्ग इत्यादिस्मृतिभ्यश्च यत्तु सांख्यैः कर्मत्यागोऽभ्युपगम्यते क्रियाकारकफलभेदबुद्धेः सत्यता

त्रिः

छां॰ भा॰ ३०

यदि विसिद्धं रसादि समानमन्यच्छिंदतापहतेव हुवचनमात्रविशेषो यजमानं लेतदेतास्मत्त्रयजमानं रसादिर्लिंगादेषहदेवयजमानएवं विषयोक्तस्सामा दोर्विद्वान्यज्ञस्समात्रायत्तयायात्संवेदयथोक्तमेवंवेदयएवंवेदेतिद्विरुक्तिरध्यायपरिसमाप्त्यर्था २४ ॥ ॥ ॥ ॥

सस्मितं लोकक्षितं लोकं मे यजमानाय विंदैषवैयजमानस्य लोक एतास्मत्त्रयजमानः परस्तादायुषः स्वाहापजहि परिघमित्युक्तो त्तिष्ठति तस्मै रुद्रामाध्यंदिनं सवनं संप्रयच्छंति पुरात्तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख उपविश्य स आदित्यं स वैश्वदेवं सामाभिगायति लो३ कद्वारमपावा३र्णू २ पश्येम त्वा वयं स्वारा३ ३ ३ ३ हुं आ ३३ ज्या ३ यो ३ आ ३२१११ इति अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विंदतैष वै यजमानस्य लोक एतास्मत्त्रयजमानः परस्तादायुषः स्वाहापहत परिघमित्युक्त्वोत्तिष्ठति तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवनं संप्रयच्छंत्येष ह वै यज्ञस्य मात्रां वेद य एवं वेद य एवं वेद॥ २४ इति छांदोग्योपनिषद्ब्राह्मणे चतुर्थः प्रपाठकः ॥ ३ ३ ३ ३ ३ ३ ३ ३ ३

इति छांदोग्योपनिषद्विवरणे द्वितीयः प्रपाठकः समाप्तः २

इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शंकरभगवतः कृतौ छांदोग्योपनिषद्विवरणे द्वितीयः प्रपाठकः समाप्तः

असौ वा आदित्य इत्याद्यध्यायारंभे संबंधो तीतानंतराध्याये तेऽन्ते यज्ञस्य मात्रां वेदेति यज्ञविषयाणि च सामहोममंत्रोपस्थानानि विशिष्टफलप्राप्तये यज्ञांगभू तान्युपदिष्टानि सर्वेषां यज्ञानां च कार्यं निर्वृत्तिः सविता महत्या श्रिया दीप्यते स एष सर्वप्राणिकर्मफलभूतं प्रत्यक्षं सर्वैरूपजीव्यते तो यज्ञव्यपदेशानंतरं तत्कार्यभू तं सवितृविषयमुपासनं सर्वपुरुषार्थेभ्यः श्रेष्ठतमफलं विधास्यामीत्येवमारभते श्रुतिरसौ वा आदित्यो देवमध्वित्यादि देवानां मोदनान्मध्विव मध्वसावा दित्यो वस्वादीनां च मोदनहेतुत्वं वक्ष्यति सर्वयज्ञफलरूपत्वादादित्यस्य कथं मधुत्वमित्याह तस्य मधुनो द्यौरेव भ्रामरसेव मधुनस्तिरश्चीनवंशस्तिरश्चीनश्चा

असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशोंतरिक्षमपूपो मरीचयः पुत्राः ॥ तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः ऋच एव मधुकृत ऋग्वेद एव ॥ ३

सौ वंश आतिरश्चीनवंशस्तिर्यग्गतेव हि द्यौर्लक्ष्यते तंतरिक्षं च मध्वपूपो द्युवंशे लग्नस्सन्लंबत इवातो मध्वपूपसामान्यादंतरिक्षं मध्वपूपो मधुनः सवितुराश्र यत्वान्मरीचयो रश्मयो रश्मिस्था आपो भौमाः सवित्राकृष्टा एता वा आपः स्वराजो यन्मरीचय इति हि विज्ञापतेताअंतरिक्षमध्वपूपस्थरश्म्यंतर्गता भ्रमर बीजभूताः पुत्राइव हिताः लक्ष्यंत इति पुत्रा इव पुत्रा मध्वपूपनाडीगता हि भ्रमरपुत्रास्तस्य सवितुर्मध्वाश्रयस्य मधुनो ये प्राञ्चः प्राच्यां दिशि गता रश्मयस्ता एवास्य प्राच्यः प्रागंचनान्मधुनो नाड्यो मधुनाड्य इव मध्वाधारच्छिद्राणीत्यर्थः तत्र ऋच एव मधुकृतो लोहितरूपं मधु वि॥ ४ ३ ४ ३ ४ ३ ४

छा॰ शं॰
३१

त्वा अयं मधु कुर्वन्तीति मधुकृतो भ्रमरा इव यतो रसानाददाना मधु कुर्वन्तीति तत्पुष्पमिव पुष्पम् ऋग्वेद एव तत्र ऋग्ब्राह्मणसमुदायस्य वेदशब्दवाच्यत्वात्तद्भो
ग्यरूपरसनिःस्रावकं भवति ऋग्वेदशब्देनात्र ऋग्वेदविहितं कर्मोच्यते कर्मफलमत एवं मधुरसनिःस्रावकं भवत्यतः मधुकरैरिव पुष्पस्थानीयाः ऋग्वेदविहितानि कर्माणि
ता आप आदाय प्रक्षिप्तं मधु निवर्तते का स्ता आप इत्याह ताः कर्मणि प्रयुक्ताः सोमाज्यपयोरूपा अग्नौ प्रक्षिप्तास्तत्पाका भिनिर्वृत्ता अमृता अत्यन्तरसवत्य
आपो भवन्तीति ता रसानादाय तावारादेता ऋचः पुष्पेभ्यो रसमादददाना इव भ्रमरास्तथा एता ऋग्वेदे ऋग्वेदविहितं कर्मपुष्पस्थानीयममृतमप्यमृतिपरं कृतव
सदेवेता ऋचः कर्मणि प्रयुक्ताः अभितापितं ह्यं ऋचः शस्त्रा द्यङ्गभावमुपगताः क्रियमाणं कर्म मधुनिर्वर्तकं रसं सञ्चीसुपपद्यते तथ्या स्यां च भ्रमरेराकृष्य

अमृता
८

वपुष्यं ता अमृता आपस्ता वा एता ऋचः एतमृग्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳरसोऽजायत तद्व्यक्षरत्तदादित्यमभि
तोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितꣳरूपं १

माराणि तदेतदाह तस्यमृग्वेदस्याभितप्तस्य को सौ रसो यस्तु मधुकराभितापनिःसृतस्तस्य उच्यते यशो विश्रुतत्वं तेजो देहगता दीप्तिरिन्द्रियं सामर्थ्योपेतैरिन्द्रियैर्वीर्यं बलं वीर्यं सामर्थ्यं बलमित्यर्थः अन्नाद्यमन्नं तदाद्यं च येनोपयुज्यमानेनाहमहनि देवानां स्थितिः स्यात्तदन्नाद्यमेव रसोऽजायतेया
गादिलक्षणात्कर्मणो यशआद्यन्नाद्यपर्यन्तं तत्तद्व्यक्षरद्विशेषेण गत्वा सरन्मधुकुल्यवत्तदादित्यमभितः पार्श्वतः पूर्वभागं सवितुराश्रयदाश्रितवदित्य
र्थो मुष्मिन्नादित्ये सञ्चितं कर्मफलाख्यं मधु भोक्ष्यामह इत्येवं हि यशआदिलक्षणं फलं प्राप्यते कर्मणि क्रियन्ते मनुष्यैः केदारनिःपालनमिव कर्ष

राम॰
३१

केणेत्यत्र संप्रदर्शयते अधुनाहे तद्वै किं तदित्याह तदेतदादित्यस्य आधृतोद्यत्सुरोहितं रूपं १

सद्वा एतत् १

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूꣳष्येव मधुकृतो यजुर्वेद विहिते कर्माणि प्रयुक्तानि पूर्ववन्मधुकृतश्च यजुर्वेदविहितं कर्मपुष्पस्थानीयं
पुष्पमित्युच्यते ता एव सोमाद्या अमृता आपस्ता निवा एता नियजूꣳष्येतं यजुर्वेदमभ्यतपꣳस्तस्य वा एतस्य दक्षिणा नं मद्व्येत यदेतदादित्यस्य दृश्यते शुक्लꣳरू
पं २ अथ येऽस्य प्रत्यञ्चो रश्मयस्ता दित्यमानेत यास्तामन्यां मध्वेतदादित्यस्य कृष्णꣳरूपं ३ अथ येऽस्योदञ्चो रश्मयस्तादित्यमानमथर्वाङ्गिरसो ह्यथर्वाङ्गि

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूꣳष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपस्ता वा एता नियजूꣳष्येतं
यजुर्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳरसोऽजायत तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लꣳ
रूपं २ अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता आपस्ता नि वा एता नि सा
मान्येतꣳसामवेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳरसोऽजायत तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्य
देतदादित्यस्य कृष्णꣳरूपं ३ अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता
अमृता आपस्ते वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳरसोऽजायत तद्व्यक्षर
त्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्णꣳरूपं ४ ६ ६ ६

९

रसा वद्दृष्टा मन्त्रा अथर्वाङ्गिरसः कर्मणि प्रयुक्ता मधुकृत इतिहासपुराणं पुष्पं तयोश्चेतिहासपुराणयोरश्वमेधे पारिप्लवासु रात्रिषु कर्माङ्गत्वे
न विनियोगः सिद्धो मध्वेतदादित्यस्य परं कृष्णं रूपमतिशयेन कृष्णमित्यर्थः ४ श्रीरामनाम श्रीरामः ॥ ७ श्रीरामः श्रीरामनामः ॥ ६

62

63

छा॰शं॰
३१

त्रा अयं मधु कुर्वन्तीति मधुकृतो भ्रमरा इव यतो रसानादाय मधु कुर्वन्तीति तत्सामान्यमिव पुष्पमृग्वेद एव तत्र ऋग्ब्राह्मणसमुदायः सर्वो वेदः ऋग्लक्षणः समानात्त्वभो
ग्यरूपरसनिःस्रावसंभवादृग्वेद शब्देनात्रर्ग्वेदविहितं कर्म तं तो हि कर्मफलभूतरश्मिमधुरसनिःस्रावसंभवान्मधुकरैरिव पुष्पस्थानीया ऋग्वेदविहिताः कर्माणि
अपः आदायपर्यग्निमधुनिर्वर्तन्ते काम्ताः आपः तस्माद्धेताः कर्मणि प्रयुक्ताः सोमाज्यपयोरूपात्र्याग्नौ प्रक्षिप्ताः पाकाभिनिर्वृत्ता अमृता अत्यन्तरसवत्तरस्तस्मा
आपो भवन्तीति तद्रसानादाय ता वा एता ऋचः पुष्पेभ्यो रसमादादाना इव भ्रमरास्ता ऋचः एतमृग्वेदमृग्वेदविहितं कर्मपुष्पस्थानीयमभ्यतपन्नभितापं कृतव
सर्वे एता ऋचः कर्मणि प्रयुक्ताः अग्निहोत्रे शस्त्राद्यङ्गभावमुपगतैः क्षिप्यमाणां कर्ममधुनिर्वर्तकं रसं मुञ्चीत उपपद्यते पुष्पाणीव भ्रमरैराकृष्य २

तपुष्पं ता अमृता आपस्ता वा एता ऋचस्तमृग्वेदमभ्यतपँस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यँ रसोऽजायत तद्व्यक्षरत्तदादित्यमभि
तो अश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितँ रूपं १

माणानि तदेतदाह तस्मादृग्वेदस्याभितप्तस्य कोऽसौ रसो य ऋग्भिर्मधुकराभितापनिःसृत इत्युच्यते यशो विश्रुतत्वं तेजो देहगता दीप्तिरिन्द्रियं सामर्थ्यो
पेतैरिन्द्रियैरवैकल्यं वीर्यं सामर्थ्यं बलमित्यर्थः अन्नाद्यमन्नं येनाद्यते येनोपयुज्यमानेनाहन्यहनि देवानां स्थितिः स्यात् स एवान्नाद्यमेव रसोऽजायते या
गादिलक्षणात्कर्मणो यशआद्यन्नाद्यपर्यन्तं तत्तद्व्यक्षरत्तद्विशेषेण क्षरदगमदुत्तदात्तदादित्यमभितः पार्श्वतः पूर्वभागे सवितुराश्रयदाश्रितवदित्य
र्थो मुष्मिन्नादित्ये संचितं कर्मफलाख्यं मधु भोक्ष्याम इत्येवंविधपशुश्रादिलक्षणाफलप्राप्तये कर्माणि क्रियन्ते मनुष्यैः केदारनिःपालनमिव कर्ष
केस्तत्सर्वं प्रदर्श्यते अश्रयत्तद्वा एतत्किं तद्यदेतदादित्यस्य रोहितं रूपं १

लद्याऐतत १

राम॰
३१

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूँष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपस्ता वा एता यजूँषि एतं
पुष्पमित्युच्यते ता एव सोमाद्या अमृता आपस्ता निवारा ता नियजूँष्येतं यजुर्वेदमभ्यतपन्निति समाना दिसमानं सर्व समानं मध्येत घटे तदादित्यस्य दक्षिणे शुक्लं रू
भो इति तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुःश
तागा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तेयेति स ह वर्षगणं प्रोवास ता यदा सहस्रं संपेदुः ४

धं सोम्याहरेत्युक्त्वा तमुपनीय कृशानामबलानां गोयूथान्निराकृत्यापकृष्य चतुःशता चत्वारि शतानि गवामुवाचेमा गाः सोम्यानुसंव्रज अनुगच्छेत्युक्तस्ता
अरण्यं प्रत्यभिप्रस्थापयन्नुवाच नासहस्रेण पूर्णेन सहस्रेण नावर्तेय न प्रत्यागच्छेयं स तदेवमुक्त्वा गा अरण्यं तृणोदकबहुलं द्वंद्वरहितं प्रवेश्य स ह वर्षगणं दी
र्घं प्रोवास प्रोषितवान् ताः सम्यग्रक्षिताः गावो यदा यस्मिन्काले सहस्रं संपेदुः संपन्ना बभूवुः ४

छां॰ अ॰ ४
५०

तमेनं श्रद्धातपोभ्यां सिद्धं वायुदेवता दिक्संबन्धिनी तुष्टा सत्यृषभमनुप्रविश्यर्षभापन्नानुग्रहायाथैनमृषभोऽभ्युवादाभ्युक्तवान् सत्यकाम३ इति संबो-
धनं तमसौ सत्यकामो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ प्राप्ताः सोम्य सहस्रं स्मः पूर्णा तव प्रतिज्ञातः प्रापय नोऽस्मानाचार्यकुले किं चाहं ब्रह्मणः पादस्ते
तेतुभ्यं पादं ब्रवाणि कथयानीत्युक्तः प्रत्युवाच ब्रवीतु कथयतु मे मह्यं भगवानित्युक्त ऋषभस्तस्मै सत्यकामाय ह उवाच प्राची दिक्कला ब्रह्मणः पादस्य चतु-
र्थो भागस्तथा प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य ब्रह्मणः पादश्चतुष्कलश्चतस्रः कला अवयवा यस्य सोऽयं चतुष्कलः पादो ब्रह्मणः +

अथ हैनमृषभोऽभ्युवाद सत्यकामा३ इति भगव इति ह प्रतिशुश्राव प्राप्ताः सोम्य सहस्रꣳ स्मः प्रापय न आचार्यकुलं ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवी-
तु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम
स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्च-
तुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ५ ॥ ६ ॥ + प्रकाशवान्नाम प्रकाशवानित्येवं नामाभिधानं यस्य + ॥ २ ॥ ॥

तथोत्तरेऽपि पादास्त्रयश्चतुष्कला ब्रह्मणः स यः कश्चिदेवं यथोक्तमेतं ब्रह्मणश्चतुष्कलं पादं विद्वान्प्रकाशवानित्यनेन गुणेन विशिष्टमुपास्ते तस्येदं फलं
प्रकाशवानस्मिँल्लोके भवति प्रख्यातो भवतीत्यर्थः तथा दृष्टफलं प्रकाशवतो ह लोकान्देवादिसंबन्धिनो मृतः सञ्जयति प्राप्नोति य एतमेवं विद्वांश्चतुष्कलं
पादं ब्रह्मणः प्रकाशवानित्युपास्ते ५ ॥ ६ ॥ ॥ ६ ॥ ॥

छां॰
५०

सोऽग्निष्टे पादं वक्तेत्युपरराम ऋषभः सत्यकामो ह श्वोभूते परेद्युर्गाः प्रस्थापयांचकाराचार्यकुलं प्रति ताः शनैश्चरन्त्य आचार्यकुलाभि-
मुख्यः प्रस्थिता यत्र यस्मिन्देशेऽभिसायं सायंकालेऽभिसंबभूवुः एकत्राभिसंबद्धाः संभूताः तत्राग्निमुपसमाधायोपसमिध्य समिधमाधाय पश्चा-
दग्नेः प्राङ्मुखोपविवेश ऋषिभक्त्योपविष्टं तमग्निरभ्युवाद सत्यकाम३ इति संबोधनं तमसौ सत्यकामो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ तस्मै होवाच

अग्निष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधा-
य पश्चादग्नेः प्राङुपोपविवेश तमग्निरभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति
तस्मै होवाच पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम स य एतमेवं विद्वाꣳश्चतुष्कलं पादं
ब्रह्मणोऽनन्तवानित्युपास्तेऽनन्तवानस्मिँल्लोके भवत्यनन्तवतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्यु-
पास्ते ६ हꣳसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिध-
माधाय पश्चादग्नेः प्राङुपोपविवेश तꣳ हꣳस उपनिपत्याभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ब्रह्मणः सोम्य ते पादं ब्र-
वाणीति ब्रवीतु मे भगवानिति तस्मै हो ॥ ७ ॥ + हंसो ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति +

पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कला ॥
लेमाग्निर्गोचरदर्शनमेव दर्शनमग्निरब्रवीदब्रवीदेष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम स यः कश्चिद्यथोक्तं पादमनन्तवत्त्वेन गुणेनोपास्ते
स तथैव तद्गुणो भवति अस्मिँल्लोके मृतश्चानन्तवतो ह लोकाञ्जयति य एतमेवं यथोक्तमित्यादि पूर्ववत् ६ सोऽग्निर्हंसस्ते पादं वक्तेत्युपरराम हंसश्चादि-

छां॰ उ॰ ५२

102

लाग्ग्येवै सोम्येति ज्योतिर्विषयमेव दर्शनं प्रोवाचातो हंसस्यादित्यत्वं पतीपतेर्विहंगमत्वं ज्योतिष्मानुदीप्तियुक्तोऽस्मिंल्लोके भवति चंद्रादित्यादीनां ज्योतिष्मत
एवंचमत्वाल्लोकाञ्जयति समानमुत्तरम् ॥ ६ ॥ हंसोपि मद्गुष्टे पादं वक्तेत्युपरराम मद्गुरुदकचरः पक्षी स च प्राणसंबंधात्प्राणः स हश्वोभूत इत्यादि पूर्वक

वा चाग्निः कला सूर्यः कला चंद्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम स य एतमेवं विद्वाँ५श्चतुष्कलं पादं ब्र
ह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वाँ५श्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्यु
पास्ते ॥ ७ मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चा
दग्नेः प्राङुपोपविवेश तं मद्गुरुपनिपत्याभ्युवाद सत्यकाम ३ इति भगव इति ह प्रतिशुश्राव ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भग
वानिति तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान्नाम स य एतमेवं विद्वाँ५
श्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्त आयतनवानस्मिँल्लोके भवत्यायतनवतो ह लोकाञ्जयति य एतमेवं विद्वाँ५श्चतुष्कलं
श्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ८ ॥ ७ ॥ + एवमस्य मद्गुः प्राणः स्वविषयमेव दर्शनमुवाच प्राणः + ॥ ७
पादं ब्रह्मण आयतनवानित्युपास्ते

स्पा

लेस्यायायतनवानित्येवं नामायतनं नाम मनः सर्वकरणोपहृतानां भोगानां तद्यस्मिन्पादे विद्यत इत्यायतनवान्नाम पादस्तं पादं तथैवोपास्ते यः
आयतनवान्नामाश्रयवानस्मिंल्लोके भवति तथायतनवत एव सावकाशांल्लोकाञ्जयति य एतमेवं विद्वानित्यादि पूर्ववत् ॥ ८

एम॰ ५१

103

स एवं ब्रह्मवित्सन्प्राप ह प्राप्य वा नाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम ३ इति भगव इति ह प्रतिशुश्राव ब्रह्मविदिव वै सोम्य भासीति प्रसन्नेन्द्रियः सहसितवदन
श्च निश्चिंतः कृतार्थो ब्रह्मविद्भवन्यतः आचार्यो ब्रह्मविदिव भासीत्युक्तोऽनुशास्तीति वितर्कयन्नुवाच कस्त्वानुशशासेति स चाह सत्यकामोऽन्ये मनु
ष्येभ्यो देवता मामनुशिष्टवत्यः को मां भगवच्छिष्यं मनुष्यः सन्ननुशासितुमुत्सहेत इत्यभिप्रायः अतोऽन्ये मनुष्येभ्य इति ह प्रतिजज्ञे प्र

प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम ३ इति भगव इति ह प्रतिशुश्राव ब्रह्मविदिव वै सोम्य भासि को नु त्वानु
शशासेत्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवांस्त्वेव मे कामे ५ भगवद्दृशेभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं प्रा
पतीति तस्मै हैतदेवोवाचात्र ह न किंचन वीयायेति वीयायेति ॥ ९

ब्रूयाच्छ्रुतं ह्येव मे

तिज्ञातवान् भगवांस्त्वेव मे कामे मम मेच्छायां ब्रूयात्किमन्यैरुक्तेन नाहं तद्गणयामीत्यभिप्रायः किंच श्रुतं हि यस्मान्मम विद्यत एव मा समिल्लर्थे
भगवद्दृशेभ्यो भवत्समेभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं साधुतमत्वं प्राप्यति प्राप्नोतीत्यतो भगवानेव ब्रूयादित्युक्त आचार्योऽब्रवीत्तस्मै य
तामेव दैवतैरुक्तां विद्यामत्र ह न किंचन षोडशकलविद्यायाः किंचिदेकदेशमात्रमपि न वीयाय न विगतमित्यर्थो द्विरभ्यासो विद्यापरिसमाप्त्यर्थः ॥ ९

छां॰उ॰
५२

पुनर्ब्रह्मविद्यां प्रकारान्तरेण वक्ष्यामो ग्न्यादिदृष्टिविशिष्टां चाख्यायिकया पर्युक्त ब्रह्मदूतपत्रोऽर्थं ब्रह्मविद्यास्तवनत्वप्रदर्शनार्थो उपकोसलो ह वै नाम
तः कमलस्यापत्यं कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादश वर्षाण्यग्नीन्परिचचार अग्नीनां परिच
रणं कृतवान् स ह स्माचार्योऽन्यानन्तेवासिनः स्वाध्यायं ग्राहयित्वा समावर्तयंस्तमेवोपकोसलमेकं न समावर्तयति स्म तमाचार्यजायोवा
च तप्तो ब्रह्मचारी कुशलं सम्यगग्नीन्परिचचारी परिचरितवान् भगवांश्चाग्निषु भक्तं न समावर्तयसि यस्मात्तस्माद्भक्तं न समावर्तयते पतीति जाया

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादश वर्षाण्यग्नीन्परिचचार स ह स्मान्यानन्तेवासिनः
समावर्तयंस्तं ह स्मैव न समावर्तयति तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन्परिचचारीन्मा त्वाग्नयः परिप्रवोचन्प्रब्रू
ह्यस्मा इति तस्मै हाप्रोच्यैव प्रवासांचक्रे

न

मा त्वा त्वामग्नयः परिप्रवोचन् गर्हितवमाकुर्युरतः प्रब्रूह्यस्मै विद्यामिष्टामुपकोसलायेति तथा जायया उक्तोऽपि हाप्रोच्यैवानुक्त्वैव किं
चित्प्रवासांचक्रे प्रवासितवान् स होपकोसलो व्याधिना मानसेन दुःखेनानशितुमशनं कर्तुं दध्रे धृतवाननुमनस्तवान् तं ह अग्न्यागारे वसिष्ठा मा
चार्यजायोवाच हे ब्रह्मचारिन्नशान भुंक्ष्व किं नु कस्मात्कारणान्नाश्नासीति स होवाच बहव इमेऽस्मिन्पुरुषे कामा इच्छाः ॥ छ
राक्षः कर्तव्यं प्रति नानात्ययाः नानाविधाः पर्यायो अतिशया नानात्यया व्याधिभिः कर्तव्यचिन्तानन्तैः नानाप्राप्त्याघ्नैः कर्तव्यप्राप्तिनि ॥

राम॰
५२

104

मिता नि चिन्तादुःखानीत्यर्थः प्रतिपूर्णोऽस्मि अतो नाशिष्यामीत्युक्ते तूष्णीं भूते ब्रह्मचारिणि अथ ह अग्नयः श्रुश्रूषया आवर्जिताः कारुण्याविष्टाः सन्तः सं
पिता इत्यर्थः संभूय ऊचुः तप्तो ब्रह्मचारी कुशलं नः पर्यचारीत् परिचरितवानित्यस्मै ब्रह्मविद्यां प्रब्रवामेति तस्मै होचुः प्रधानानीत्यस्य
हो चुः कं च खं च प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच ब्रह्मचारी विजानाम्यहं यत्प्राणो ब्रह्मेति यस्मिन्सति जीवनं यदपगमे च न
भवति तस्मिन्वायुविशेषे लोके रूढत्वात् युक्तं प्राणस्य ब्रह्मत्वं विजानामीति कं च तु खं च न विजानामीति ननु कं खशब्दयोरपि
सुखाकाशविषयत्वेन प्रसिद्धत्वात् कस्माद्ब्रह्मचारिणो न ज्ञातत्वं सुखस्य कं शब्दवाच्यस्य क्षणप्रध्वंसित्वात् खशब्दवाच्यस्य चाकाशस्याचेतन

सति

105

स ह व्याधिनाऽनशितुं दध्रे तमाचार्यजायोवाच ब्रह्मचारिन्नशान किं नु नाश्नासीति स होवाच बहव इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः
प्रतिपूर्णोऽस्मि नाशिष्यामीति अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः ॥ छ ॥

त्वात् कथं ब्रह्मत्वमिति मन्यते कथं च भगवतां वाक्यप्रामाण्यात्प्राप्तं तोऽन्विजानामीत्याह तमेवं ब्रह्मचारिणं ते ह्यग्नयः ऊचुः यद्वाव यदेव व
यं कमवोचाम तदेव खं माकाश इति सम्बन्धे खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजात् सुखान्निवर्तितं स्यान्नीलेन विशेष्यमाणमुत्पलं रक्तादिभ्यो
यदेव खमित्याकाशमवोचाम तदेव च कं सुखमिति जानीहि एवं च सुखेन विशेष्यमाणं खं भौतिकादचेतनादाकाशान्निवर्तितं स्यान्नीलोत्पलवदेव सु
खमाकाशं भौतिकमाकाशं च सुखाश्रयः नेतरत् भौतिकमिति अर्थो ननु आकाशं चेत्सुखेन विशेषयितुमिष्टमलं नान्तरं खविशेषणं
ब्रह्म वर्णनं तदेव खमित्यभिधानं वक्ष्यति मिति

छां॰ उ॰
५२

तयद्वकं तदेव कमिति एवं विशेषणं वानन्दं खाकाशयोरपि लौकिकसुखाकाशाभ्यां व्यावृत्तिरिष्टैव चाम सुखेन आकाशे विशेषिते व्यावृत्तिरस्य यो सु
रर्थ्यमाग्नौ चेति चेत्सममेवं किं तु सुखेन विशेषितस्पेवाकाशस्य ध्येयत्वं विवक्षितम् न त्वाकाशगुणस्य विशेषणस्य सुखस्य ध्येयत्वं विवक्षितं तस्माद्विशेषणोस्य
पादानस्य विशेष्यनियंतृत्वेनैवोपक्षयात् अतः सुखेन खमपि विशेष्यनियंतृत्वेनैवोपक्षयादतः सुखेन सुखमपि विशेष्यते ध्येयत्वापकृत इति त्रि
ष्वोपते कं शब्दस्यापि ब्रह्मशब्दसंबन्धनात्कं ब्रह्मेति यदि हि सुखगुणविशिष्टस्य खस्य ध्येयत्वं विवक्षितं स्यात्कं खं ब्रह्मेति ब्रूयुः अग्नयः प्रथमं न चैवमुक्ते

प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव क
मिति प्राणं च हास्मै तदाकाशं चोचुः १०

दा

वंनः किं तर्हि कं ब्रह्म खं ब्रह्मेत्यसतो ब्रह्मचारिणो मोहापनयाय एवं शङ्कापोरितरेत्सुविशेषणविशेष्यत्वनिर्देशो युक्त एव यद्वाव कमित्यादिस्तदे
तद्दृष्टिभिरुक्ते वाक्यार्थे मत्स्य दूद्धापन्नेति एतह प्राणं च हास्मै ब्रह्मचारिणे तस्याकाशस्तदाकाशः प्राणस्य संबंधात्मत्वेन हृद् आकाशस्य
सुखगुणवत्त्वनिर्देशात्तच्चाकाशं सुखगुणविशिष्टं ब्रह्म तत्स्थं प्राणं ब्रह्म संपर्कादेरेव ब्रह्मेत्युभयं प्राणं चाकाशं च समुच्चित्य ब्रह्म
स्पर्थः
तो उचुरग्नय इति १०

कं

उ॰ ५२

106

संभूयाग्नयो ब्रह्मचारिणो ब्रह्मोक्तवंतो यथानं तत्र प्रत्येकं स्वस्वविषयां विद्यां वक्तुमारेभिरे तत्रादौ वेनं ब्रह्मचारिणं गार्हपत्योऽग्निरनुशशास पृथिव्य
ग्निरन्नमादित्य इति ममैतास्तनवस्तत्र य आदित्ये एष पुरुषो दृश्यते सोऽहमस्मि यश्च गार्हपत्योऽग्निः स एवाहमादित्ये पुरुषोऽस्मीति पुनरावृत्त्या
स एवाहमस्मीति वचनं पृथिव्यन्नयोरिव भोज्यत्वलक्षणायोः संबंधो नगार्हपत्यादित्ययोः किंतर्हि तुल्यमेव प्रकाशनधर्मत्वमविशिष्टमेकत्वमेवा
नयोरत्यंतं पृथिव्यन्नयोस्तु भोज्यत्वेनात्वाम्यां संबंधः स्यात्कश्चिद्देवयोस्तं गार्हपत्यमग्निमन्नाचारत्वेन चतुर्धा प्रविभज्य उपास्ते सोऽपहते विनाशयति

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति स य एतमेवं विद्वानुपास्ते
पहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुंजामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एतमेवं वि
द्वानुपास्ते ११

107

पापकृत्यां पापं च कर्म लोकी लोकवांश्चास्माकं यत्तो लोकेनाग्नेयेन तद्धान्भवति यथा वयमिह च लोके सर्वं वर्षशतमायुरेति मायोति ज्योगुज्ज्वलं जीवति नामस्त्वान्त
रमेतन्नचास्यावरपुरुषाश्चास्यपुरुषाश्चास्य विडू क्षीयन्तिजाः सर्थः नक्षीयन्ते सन्तत्युच्छेदेन भवतीत्यर्थः किं चतं वयमुपभुंजामः पालयामोऽस्मिंश्च लोके जीवंतममुष्मिं
श्च परे लोके य एतमेवं विद्वानुपास्ते यथोक्तं तस्यैतत्फलमित्यर्थः ११ ७ ॥ ७ ॥ ॥

ग

अथ हैनमन्वाहार्यपचनोऽनुशशास दक्षिणाग्निरापो दिशो नक्षत्राणि चन्द्रमा इति एता मम चतस्रस्तनवः अन्नं दृष्ट्वा हमन्वाहार्यपचन आत्मा चतुर्धा प्रविभज्य व्यवस्थित
स्तत्र य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति पूर्ववत् अन्नसंबन्धाज्ज्योतिष्ट्वसामान्याच्चान्वाहार्यपचनचन्द्रमसोरेकत्वं दक्षिणदिक्संबन्धाद्दक्षिणा
पांक्तत्वाणां च पूर्ववदुत्तरत्र नैव संबन्धो नक्षत्राणां च ससोमोपभोग्यत्वप्रसिद्धेरपामन्नोत्पादकत्वात् संबन्धः दक्षिणाग्नेः पृथिवीवदन्नहेतुत्वसामान्यात् ११

अथ हैनमन्वाहार्यपचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा इति य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति स य एतमे
वं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एत
मेवं विद्वानुपास्ते १२ अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाह
मस्मीति स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिंश्च
लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते १३

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति मम ताश्चतस्रस्तनवो य एष विद्युति पुरुषो दृश्यते सोऽहमस्मीत्यादि पूर्ववत् सामान्यादि
वाकाशाद्योः स्वाश्रयविषयत्वाद्विद्युदाहवनीययोस्तापत्वेनैव संबन्धः समानमन्यत् १३

ते पुनः संभूयोचुरुपकोसल एषा सोम्य ते तवास्मद्विद्याग्निविद्येत्यर्थः आत्मविद्या पूर्वोक्ता प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति चाचार्यस्तु ते आख्याता गतिं वक्ता
इत्युक्त्वा उपरेमुरग्नयः आजगाम ह अस्याचार्यः कालेन तं च शिष्यमाचार्योऽभ्युवादोपकोसला३ इति भगव इति ह प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं प्रसन्नं
भाति को नु त्वानुशशासेत्युक्तः प्रत्याह को नु मानुशिष्याद्भो ... इति ह अपेव निह्नुत इव ... इमे ... अग्नयः ... अन्यादृशा ... अग्नीन् ...
... अभ्यूदे ... किं नु सोम्य किल ते ... अवोचन् ... इति ... सर्वमिदमुक्तं ... प्रतिजज्ञे ... लोकान्वाव ... मे ... अग्नयः

ते होचुरुपकोसलैषा सोम्य तेऽस्मद्विद्यात्मविद्या चाचार्यस्तु ते गतिं वक्तेत्याजगाम हास्याचार्यस्तमाचार्योऽभ्युवादोपकोसला३ इति भगव
इति ह प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं भाति को नु त्वानुशशासेति को नु मानुशिष्याद्भो इतीहापेव निह्नुत इमे नूनमीदृशा अन्यादृशा इतीहाग्नी
नभ्यूदे किं नु सोम्य किल तेऽवोचन्निति इदमिति ह प्रतिजज्ञे लोकान्वाव किल सोम्य तेऽवोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवमे
वंविदि पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति तस्मै होवाच १४

यत्किंचिन्न सर्वं पश्यो ... अभिरुक्तमवोचन् यत आह आचार्यो लोकान्वाव पृथिव्यादीन् हे सोम्य किल ते अवोचन् ब्रह्म साकल्येन अहं तु ते तुभ्यं तद्ब्रह्म यदिच्छ
सि श्रोतुं वक्ष्यामि ... यथा पुष्करपलाश आपो न श्लिष्यन्ते एवं यथा वक्ष्यामि ब्रह्म तदेवंविदि पापं
कर्म न श्लिष्यते न संबध्यते ... ब्रवीतु मे भगवानिति तस्मै होवाचाचार्यः १४ ५ ॥ ५॥

छां॰शं॰
५८

116

स गुणब्रह्मविद्याया उत्तरा गतिरुक्ता अथेदानीं पंचमेऽध्याये पंचाग्निविदो गृहस्थस्योर्ध्वरेतसां च श्रद्धालूनां विद्यांतरशीलिनां तामेव गतिमनूद्याऽन्या दक्षिणा
दिक्संबंधिनी केवलकर्मिणां धूमादिलक्षणा पुनरावृत्तिरूपा तृतीया च ततः कष्टतरा संसारगतिर्वैराग्यहेतोर्वक्तव्येत्यारभ्यते प्राणः श्रेष्ठो वागादिभ्यः प्राणो
वाव संवर्गः प्राणो ब्रह्म प्राण आकाश इत्यादि बहुशोऽतीते ग्रंथे प्राणग्रहणं कृतं स कथं श्रेष्ठो वागादिषु समैः संहत्य कारित्वाविशेषे कथं च तस्योपासनमि
ति तस्य श्रेष्ठत्वादिगुणविधित्सयेदमनंतरमारभ्यते यो ह वै कश्चिज्ज्येष्ठं प्रथमं वयसा श्रेष्ठं च गुणैरभ्यधिकं वेद स ज्येष्ठश्च ह वै श्रेष्ठश्च भवति फलेन पु
रुषं प्रलोभ्याभिमुखीकृत्याह प्राणो वाव ज्येष्ठश्च वयसा वागादिभ्यः गर्भस्थे हि पुरुषे प्राणस्य वृत्तिर्वागादिभ्यः पूर्वं लब्धात्मिका भवति यया गर्भो विवर्द्धते

ॐ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च यो ह वै वसिष्ठं वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठः
यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिंश्च लोकेऽमुष्मिंश्च चक्षुर्वाव प्रतिष्ठा यो ह वै संपदं वेद सं हास्मै कामाः पद्यंते दैवाश्च मानुषाश्च
श्रोत्रं वाव संपद्यो ह वा आयतनं वेदायतनं ह स्वानां भवति मनो ह वा आयतनमथ ह प्राणा अहं श्रेयसि व्यूदिरेऽहं श्रेयानस्म्यहं
श्रेयानस्मीति ते ह प्राणाः प्रजाप... विध्यति सुह्यपरस्मादिति निरशनेनातः प्राणो ज्येष्ठश्च श्रेष्ठश्चास्मिन् ... वसिष्ठो वा स्मिन्नोहि पुरु

...वागादीनां वृत्तिलाभ इति प्राणो ज्येष्ठो वयसा भवति श्रेष्ठस्तु प्रतिपादयिष्यते सुहयः ... समानसुमनसं ज्यो
चक्षुरादिस्थानावयवनिष्पत्तौ सत्यां पश्चाद्वागादीनां वृत्तिलाभ इति ... प्रतिष्ठा च ... वसिष्ठः ... प्रतितिष्ठ
ति वाग्वसिष्ठो यो ह वै प्रतिष्ठां वेद स चास्मिंल्लोकेऽमुष्मिंश्च प्रतितिष्ठति ... कामाः संपद्यंते ... संपदिति ... श्रोत्रं वाव संपद्यस्मात् श्रोत्रेण वेदा
ति यस्मात्ततः प्रतिष्ठा च चक्षुर्यो ह वै संपदं वेद तस्मा आस्मै दैवाश्च मानुषाश्च कामाः संपद्यंते ... श्रोत्रं वाव संपद्यो ह वा आयतनं वेदायतनं ह स्वानां भवति आयतनमा
श्रयस्तदेवं ... वेदायतनं ह स्वानां ... वसिष्ठो ह भवति स्वानां ज्ञातीनां कस्तर्हि वसिष्ठ इत्याह वाग्वाव ...

ति
रम॰ ५८

किं तदायतनमित्याह मनो ह वा आयतनं ... इंद्रियोपहृतानां विषयाणां ... मन आयतनमाश्रयो ऽतो मनो ह वा आयतनमित्युक्त
मथ ह प्राणा एवं यथोक्तगुणाः संतो ऽहं श्रेयसि अहं श्रेयानस्म्यहं श्रेयानस्मीति तस्मिन्प्रयोजने व्यूदिरे नाना विरुद्धं चोदिरे ... एवं विवदमा
ना आत्मनः श्रेष्ठत्वविज्ञानाय ते ह प्राणाः प्रजापतिं पितरं जनयितारं ... भगवन्को नोऽस्माकं मध्ये श्रेष्ठोऽभ्यधिको गुणैरित्येवं पृष्टवंतस्तान्पि
ता होवाच ह यस्मिन्वो युष्माकं मध्ये उत्क्रांते शरीरमिदं पापिष्ठमिवातिशयेन जीवतोऽपि ... पापिष्ठतरमिवातिशयेन दृश्येत कुण
प ... स वो युष्माकं श्रेष्ठ ... दुःखं परिजिहीर्षया ... पिता प्राणो ... वागुच्चक्राम ... व

तं पितरमेत्योचुर्भगवन्को नः श्रेष्ठ इति तान्होवाच यस्मिन्व उत्क्रांते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति सा ह वागुच्चक्राम
सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा कला अवदंतः प्राणंतः प्राणेन पश्यंतश्चक्षुषा शृण्वंतः श्रोत्रेण
ध्यायंतो मनसैवमिति प्रविवेश ह वाक् चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथांधा अपश्य
तः प्राणंतः प्राणेन वदंतो वाचा शृण्वंतः श्रोत्रेण ध्यायंतो मनसैवमिति प्रविवेश ह चक्षुः श्रोत्रं होच्चक्राम तत्संवत्सरं प्रो ७२

तेष्वेवं ... संवत्सरमात्रं प्रोष्य स्वव्यापारान्निवृत्ता सती पुनः पर्येत्येतरान् प्राणानुवाच कथं केन प्रकारेण अशकत शक्तवंतो यूयं मदृते मां विना
जीवितुं धारयितुमात्मानमिति ते होचुर्यथा कला ... यथा लोके अवदंतो वाचा जीवंति कथं प्राणंतः प्राणेन पश्यंतश्चक्षुषा शृण्वं
तः श्रोत्रेण ध्यायंतो मनसा सर्वकरणचेष्टां कुर्वंत इत्यर्थः आत्मनोऽश्रेष्ठतां प्राणेषु बुद्ध्वा पुनः प्रविवेश वाक् पुनः स्वव्यापारे प्रवृत्ता बभूवे
त्यर्थः समानमन्यत् ... चक्षुर्होच्चक्राम श्रोत्रं होच्चक्राम मनो होच्चक्राम यथा बाला अमनसो ऽप्ररूढमनस इत्यर्थः एवं परीक्षितेषु वागा

प्राण
117
तर

तस्येदं कर्म विधीयते महत्त्वे हि सति श्रीरुपनमते श्रीमतो ह्यर्थप्राप्तं धनं ततः कर्मानुष्ठानं ततश्च देवयानं पितृयाणं वा पन्थानं प्रतिपत्स्यते तस्य योजनं मंथे कर्म महत्त्वप्रेप्सोरिदं कर्म न विषयोपभोगकामस्य तस्यायं कालादिविधिरुच्यते मावास्यायां दीक्षितो दीक्षितव्रत उपसद्व्रती भूत्वा पौर्णमास्यां रात्रौ कर्म आरभेत सर्वौषधस्य यावदुपलब्धं दधिमधुनी औदुम्बरे कंसाकारे चमसाकारे वा पात्रे श्रपयित्वा ...

वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदं स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यं श्रैष्ठ्यं राज्यमाधिपत्यं

वसिष्ठाय स्वाहेत्यादि प्रत्येकं तथैव संपातमवनयेत् हुत्वा प्रतिसृप्याग्नेरीषदपसृत्य ... सर्वं मन्थं मन्त्रेण आयतनाय स्वाहेति प्रत्येकं संपातमवनयेत् ... हे इदं सर्वमिदं प्राणस्य ... अञ्जलौ मन्थमाधाय जपति मन्त्रम् अमो नामास्यमा हि ते इति प्राणस्य नाम अन्नेन हि प्राणः प्राणितीति अमो नामासीति कुतो यतो मा सह हि यस्मात्ते तव प्राणभूतस्य सर्वं समस्तं जगदिदम् अतः स हि प्राणभूतो मन्थो ज्येष्ठः श्रेष्ठश्च अतो राजा दीप्तिमानधिपतिश्चाधिष्ठाय पालयिता सर्वस्य स मा मामपि मन्थः प्राणो ज्यैष्ठ्यादिगुणपूगमात्मनो गमयत्वहमेव ... सर्वं जगदसानि भवानि प्राणवदिति शब्दो मन्त्रपरिसमाप्त्यर्थः

मन्थ श्रीरामः

तमतिशयेन विधातन २

अथैकैकेन पादेनैकैकं ग्रासं भक्षयति तत्सवितुर्वृणीमह इत्याचामति ... भोजनं सवितुः सर्वस्य प्रसवितुः ... श्रेष्ठं प्रशस्यतमं सर्वधातमं सर्वस्य जगतो धारयितृतममिति ... तुरं त्वरं ... भगस्य सवितुः स्वरूपमिति शेषः धीमहि चिन्तयेमहि विशिष्टभोजनेन संस्कृताः शुद्धात्मानः ... सर्वं च मन्थलेपं पिबति निर्णिज्य प्रक्षाल्य कंसं कंसाकारं चमसं वा पात्रं पीत्वा चमसं पश्चादग्नेः प्राक्शिराः संविशति च

गमयत्वहमेवेदं सर्वमसानीति अथ खल्वेतयर्चा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य भोजनमित्याचामति श्रेष्ठं सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं पिबति निर्णिज्य कंसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात् तदेष श्लोकः यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने तस्मिन्स्वप्ननिदर्शने २

चर्मणि वा स्थण्डिले केवलायां वा भूमौ वाचंयमो वाग्यतः सन्नित्यर्थः अप्रसाहः अप्रसाहो न प्रसह्यते नाभिभूयते स्त्रियाद्यनिष्टस्वप्नदर्शनेन यथा तथा संयतचित्तः सन्नित्यर्थः अप्रसाह इति सुपां सुलुगिति छान्दसः स एवंभूतो यदि स्त्रियं पश्येत्स्वप्ने तदा विद्यात्समृद्धं ममेदं कर्मेति तदेतस्मिन्नर्थे एष श्लोको मन्त्रोऽपि भवति यदा कर्मसु काम्येषु कामार्थेषु स्त्रियं स्वप्नेषु स्वप्नकालेषु वा पश्यति समृद्धिं तत्र जानीयात्कर्मणां फलनिष्पत्तिर्भविष्यतीति जानीयादित्यर्थः तस्मिन्स्त्र्यादिप्रशस्तस्वप्नदर्शने सतीत्यभिप्रायो द्विरुक्तिः कर्मपरिसमाप्त्यर्थः २ ॥

श्रीरामः परमात्मने श्रीरामाय नमः ॥

दर्शनेषु २

मारुणिस्तस्यापत्यम्

छां०शं०
६२

ब्रह्मादिस्तंबपर्यंताः संसारगतयो वक्तव्या वैराग्यहेतोर्मुमुक्षूणामित्यत आख्यायिकारभ्यते श्वेतकेतुर्नामतो ह स्मेति स्यात्यैरक्
रुणास्यापत्यम् आरुणेयः पंचालानां जनपदानां समितिं सभामेयाय आजगाम तं गतवंतं ह प्रवाहणो नामतो जीवलस्यापत्यं जैवलिरुवाचो
क्तवान् हे कुमारानु त्वा त्वामशिषत् त्वामशिषत् पिता किं मनुशिष्टस्त्वं पित्रेत्यर्थः इत्युक्तः स आहानु हि अनुशिष्टोस्मि भगव इति सूचय
न्नाह तं होवाच यद्यनुशिष्टोसि वेत्थ यदितोस्माल्लोकाद्धर्ध्वं यत् प्रजाः प्रयंति यद्गच्छंति तत्किं जानीष इत्यर्थः न भगव इत्याह
हे तराज्ञ जाने हं तद्यत् पृच्छसि एवं तर्हि वेत्थ जानीषे यथा येन क्रमेण पुनरावर्त्तंत इति न भगव इति प्रत्याह वेत्थ पथोर्मार्गयोः
सह प्रयाणयोर्देवयानस्य पितृयाणस्य च व्यावर्त्तनाव्यावर्त्तनमितरेतर वियोगस्थानं सह गच्छतामित्यर्थो न भगव इति वेत्थ यथासौ

श्वेतकेतुर्हारुणेयः पंचालानां समितिमेयाय तं ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाशिषत्पितेत्यनु हि भगव इ
ति वेत्थ यदितोऽधि प्रजाः प्रयंतीति न भगव इति वेत्थ यथा पुनरावर्त्तंत३ इति न भगव इति वेत्थ पथोर्देवयानस्य पितृया
णस्य च व्यावर्त्तना३ इति न भगव इति वेत्थ यथासौ लोको न संपूर्यता३ इति न भगव इति वेत्थ यथा पंचम्यामाहुतावापः पुरुषव
चसो भवंतीति नैव भगव इत्यथानु किमनुशिष्टोऽवोचथा यो हीमानि न विद्यात् कथं सोऽनुशिष्टो ब्रुवीतेति स हायस्तः पितुरर्धमे

लोकः पितृसंबंधी यं प्राप्य पुनरावर्त्तंते न च बहुभिः प्रयद्भिरपि येन कारणेन न संपूर्यता इति न भगव इति प्रत्याह वेत्थ यथा येन क्रमेण पं
चम्यां पंचसंख्याकायामाहुतौ हुतायामाहुतिनिर्वृत्ताः श्राहुतिसाधनाश्चापः पुरुषवचसः पुरुषशब्दवाच्या भवंति पुरुषाख्यां लभंत इत्यर्थः इत्युक्तो नैव भगव इत्याह नैवाहमत्र किंचन जानामीत्यर्थः
मेराषष्ठाहुतिमृतानां ताः पुरुषशब्दवाच्या भवंति पुरुषाख्यां लभंत इत्यर्थः इत्युक्तो नैव भगव इत्याह नैवाहमत्र किंचन जानामीत्यर्थः
अथैवमज्ञः सन् किमनु कस्मात्त्वमनुशिष्टोस्मीत्यवोचथा उक्तवानसि यो हीमानि यान्पृष्टान्यर्थजातानि न विद्या

न्न विजानीयात् कथं स विद्वत्स्वनुशिष्टोस्मीति ब्रुवीतेत्येवं स श्वेतकेतू राज्ञायस्त आयासितः सन् पितुरर्धं स्थानमेयायागतवांस्तं पितर
मुवाचाननुशिष्यानुशासनमकृत्वैव मा मां किल भगवान् समावर्त्तनकाले ब्रवीदुक्तवाननु त्वाशिषमन्वशिषं त्वामिति यतः पंचपंचसं
ख्याकान् प्रश्नान् राजन्यबंधू राजन्या बंधवो यस्य स राजन्यबंधुः स्वयं दुर्वृत्त इत्यर्थः प्राक्षीत्पृष्टवांस्तेषां प्रश्नानां नैकंचनैकमपि नाशकं
न शक्तवानहं विवक्तुं विशेषेणार्थतो निर्णेतुमित्यर्थः स होवाच पिता यथा मा मां वत्स त्वं तदागतमात्र एवैतान् प्रश्नानवद उक्तवानसि

याय तं होवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाशिषमिति पंच मा राजन्यबंधुः प्रश्नानप्राक्षीत्तेषां नैकंचनाश
कं विवक्तुमिति स होवाच यथा मा त्वं तदैतानवदो यथाहमेषां नैकंचन वेद यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यमिति स ह गौत
मो राज्ञोऽर्धमेयाय तस्मै ह प्राप्तायार्हांचकार स ह प्रातः सभाग उदेयाय तं होवाच मानुषस्य भगवन्गौतम वित्तस्य वरं वृणीथा
इति स होवाच तवैव राजन्मानुषं वित्तं यामेव कुमारस्यान्ते वाचमभाषथास्तामेव मे ॥

तेषां नैकंचनाशकं विवक्तुमिति तथा मां जानीहि त्वदीयाज्ञानेन लिंगेन ममतद्विषयमज्ञानं जानीहीत्यर्थो यथाहमेषां प्रश्नानामेकंचनै
कमपि न वेद न जाने यद्यहमिमान् प्रश्नानवेदिष्यं विदितवानस्मि कथं ते तुभ्यं प्रियाय पुत्राय समावर्त्तनकाले पुरा नावक्ष्यं नोक्तवानस्मी
त्युक्त्वा स ह गौतमो गोत्रतो राज्ञो जैवलेरर्धं स्थानमेयाय गतवांस्तस्मै ह गौतमाय प्राप्तायार्हांचकार अर्हणं चकार सत्कृतवान् स च गौतमः कृतातिथ्यउ
षित्वा परेद्युः प्रातःकाले सभागे सभां गते राज्ञि उदेयाय भजनं भागः पूजा सेवा सह भागेन वर्त्तमानो वा सभागः पूजां प्राप्नुवन् स ह गौतमउदे
याय राजानमुद्गतवांस्तं होवाच श्रीरामपरमात्मने देवतायै नमः श्रीरामायनमः श्रीराजराजेश्वराय ॥

छां० शं०
६३

गौतमं राजा मानुषस्य भगवन् गौतम मनुष्यसंबंधिनो वित्तस्य ग्रामादेर्वरं वरणीयं कामं वृणीथाः प्रार्थयेथाः स होवाच गौतमस्तवैव तिष्ठतु राजन् मानुषं वित्तं यामेव कुमारस्यान्ते मे पुत्रस्यान्ते समीपे वाचं पञ्चप्रश्नलक्षणामभाषथास्तामेव वाचं मे मह्यं ब्रूहि कथयेत्युक्तो गौतमेन राजा स ह कृच्छ्री दुःखी बभूव कथं त्विदमिति स कृच्छ्रीभूतोऽप्रत्याख्येयं ब्राह्मणं मन्वानो न्यायेन विद्या वक्तव्येति मत्वा तं ह गौतमं चिरं दीर्घकालं वसेत्येवमाज्ञापयांचकार राजा यत्तदाचिरं वसेत्याज्ञप्तवान् तन्निमित्तं ब्राह्मणं क्षमयति हेतुवचनेन राजा तं होवाच ...

कृच्छ्री बभूव तं ह चिरं वसेत्याज्ञापयांचकार तं होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक्त्वत्तः पुरा विद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ३ ॥

यथा मा त्वं गौतमावदः त्वं तत्र ... वाचं मे ब्रूहीत्यज्ञानात्तेन त्वं क्षन्तुमर्हसि ... यथा येन प्रकारेण मां हे गौतमावदस्त्वं नामेव विद्यालक्षणां वाचं मे ब्रूहीत्यज्ञानात्तेन त्वं क्षमनीयोऽस्मि ... राजा सर्वविद्यो ब्राह्मणोऽपि सन्नयथा येन प्रकारेण ... इयं विद्या प्राक्त्वत्तस्तु न ब्राह्मणान् गच्छति न च ब्राह्मणा अनया विद्ययानुशिष्टवन्तो यतस्तस्मादु पुरा पूर्वं सर्वेषु लोकेषु क्षत्रस्यैव ... प्रशासनं प्रशास्तृत्वं शिष्याणामभूदभवत् क्षत्रियपरम्परयैवेयं विद्यैतावन्तं कालमागता तथाप्यहमेतां तुभ्यं वक्ष्यामि त्वत्संप्रदानादूर्ध्वं ब्राह्मणान् गमिष्यति अतो मया यदुक्तं तत्क्षन्तुमर्हसीत्युक्त्वा तस्मै होवाच विद्यां राजा ३ ॥ श्रीरामायनम

पञ्चम्यामाहुतावित्ययं प्रश्नः प्राथम्येनापाक्रियते तेन ... पाकरणमन्वितरेषामपाकरणमनुकूलं भवेदित्यग्निहोत्राहुत्योः कार्यारम्भायः ... ते आहुती ... यजमानमाविशतस्तेन ... अत्राग्निहोत्राहुत्योः कार्यारम्भक्रमेणैवं प्रकारं भवतीत्युक्तमिह तु तं कार्यारम्भमग्निहोत्रापूर्वविपरिणामलक्षणं पञ्चधा प्रविभज्याग्नित्वेनोपासनमुत्तरमार्गप्रतिपत्तिसा ...

असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः

धनं विधित्सन्नाह असौ वाव लोकोऽग्निरिह ... प्रातरग्निहोत्राहुती ... श्रद्धापुरःसरे आहवनीयाग्निसमिद्धूमार्चिरङ्गारविस्फुलिङ्गभाविते ... द्युलोकं प्रविश्य ... अप्समवायित्वादापउच्यन्ते यास्तासां ... भावना ... असौ वाव लोको ... अग्निहोत्राधिकरणमाहवनीयस्तस्यादित्य एव समित् ... रश्मयो धूमस्तदुत्थानात् समिधो हि धूम उत्तिष्ठति अहरर्चिः प्रकाशसामान्यात् ... चन्द्रमा अङ्गाराः ... अर्चिषो हि प्रशमेऽङ्गारा अभिव्यज्यन्ते नक्षत्राणि विस्फुलिङ्गाश्चन्द्रमसोऽवयवा इव विप्रकीर्णत्वसामान्यात् ... ॥

छां० शां०
६४

लक्षणेऽग्नौ देवा यजमानप्राणा अग्न्यादिरूपा अधिदैवतं श्रद्धामग्निहोत्राहुतिपरिणामावस्थारूपाः सूक्ष्मा आपः श्रद्धाभावि
ताः श्रद्धा उच्यन्ते पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति अपां होम्यतया प्राधान्यात् श्रद्धा वा आपः श्रद्धामेवारभ्य प्रणीय प्रच
रन्तीति च विज्ञायते तां श्रद्धामब्रूपां जुह्वति तस्या आहुतेः सोमो राजा संभवति ता अपः श्रद्धाशब्दवाच्या द्युलोकाग्नौ हुता नाम परिणामं सोमो राजा सं
भवति यथर्ग्वेदादिपुष्परसा ऋगादिमधुकरोपनीतास्ते आदित्ये यश आदिकार्यं रोहितादिरूपलक्षणमारभंत इत्युक्तं तथेमा आ

128

तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति ४ ॥

ग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः श्रद्धाशब्दवाच्या आपो द्युलोकमनुप्रविश्य चांद्रं कार्यमारंभंते फलरूपमग्निहोत्राहुत्यो यजमानाश्च
तत्कर्तार आहुतिमया आहुतिभावनाभाविता आहुतिरूपेण कर्मणा कृष्टाः श्रद्धाप्समवायिनो द्युलोकमनुप्रविश्य सोमभूता भवंतीति तन
दृष्टे हि तैरग्निहोत्रे हुतमत्र त्वाहुतिपरिणाम एव पंचाग्निसंबंधक्रमेण प्राधान्येन विवक्षित उपासनार्थं न यजमानानां गतिः तोल
विदुषां धूमादिक्रमेणोत्तरत्र वक्ष्यति विदुषां चोत्तरां विद्याकृतां द्वितीयहोमपर्यायार्थमाह ४ ॥

राम०
६४

पर्जन्यो वाव पर्जन्य एव गौतमाग्निः पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवताविशेषस्तस्य वायुरेव समित् वायुना हि पर्जन्योऽग्निः समिध्यते पु
रोवातादिप्राबल्ये वृष्टिदर्शनात् अभ्रं धूमो धूमकार्यत्वाद्धूमवदुपलक्ष्यत्वाद्वा विद्युदर्चिः प्रकाशसामान्यादशनिरंगाराः काठिन्याद्विद्युत्संबंधा
द्वा ह्रादनयो विस्फुलिंगा ह्रादनयो गर्जितशब्दा मेघानां विप्रकीर्णत्वसामान्यात्तस्मिन्नेतस्मिन्नग्नौ देवाः पूर्ववत् सोमं राजानं जुह्वति तस्या
आहुतेर्वर्षं संभवति श्रद्धाख्या आपः सोमाकारपरिणता द्वितीये पर्याये पर्जन्याग्निं प्राप्य वृष्टित्वेन परिणमंते ५ पृथिवी वाव गौतमा

129

पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्चिरशनिरंगारा ह्रादनयो विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ दे
वाः सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं संभवति ५ पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो
रात्रिरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नं संभवति ६ ॥

ग्निरित्यादि पूर्ववत्तस्याः पृथिव्याख्यस्याग्नेः संवत्सर एव समित् संवत्सरेण हि कालेन समिद्धा पृथिवी व्रीह्यादिनिष्पत्तये भवति आकाशो
धूमः पृथिव्या इवोत्थित आकाशो दृश्यते यथाग्नेर्धूमो रात्रिरर्चिः पृथिव्या अप्रकाशिकात्मिकाया अनुरूपा रात्रिस्तमोरूपत्वादग्नेरिवा
नुरूपमर्चिर्दिशोऽङ्गारा उपशान्तत्वसामान्यात् अवान्तरदिशो विस्फुलिंगाः क्षुद्रत्वसामान्यात्तस्मिन्नित्यादि समानं तस्या आहुतेरन्नं व्री
हियवादि संभवति ॥ ६

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित् वाचा हि मुखेन समिध्यते पुरुषो न मूकः प्राणो धूमो धूम इव मुखान्निर्गमनात् जिह्वार्चिर्लोहितत्वा चक्षुरंगारा भासश्रयत्वा श्रोत्रं विस्फुलिंगा विप्रकीर्णत्वात्समानमन्यदन्नं जुह्वति व्रीह्यादिसंस्कृतं तस्या आहुते रेतः संभवति ७ योषा वाव गौतमाग्निस्तस्या उपस्थ एव समित्तेन हि सा पुत्राद्युत्पादनाय समिध्यते यदुपमंत्रयते स धूमः स्त्रीसंभवादुपमंत्रणस्य योनिरर्चिर्लोहि-तत्वाद्यदंतः करोति तेंगारा अग्निसंबंधादभिनंदाः सुखलवा विस्फुलिंगाः क्षुद्रत्वात्तस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः संभवति

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वार्चिश्चक्षुरंगाराः श्रोत्रं विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रेतः संभवति ७ योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमंत्रयते स धूमो योनिरर्चिर्यदंतः करोति तेंगारा अभिनंदा विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः संभवति ८ ॥

प

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति यः प्रश्नः स एष परिहृतः ... समवायित्वात् श्रद्धाख्यानामपां पञ्चम्यामाहुतौ पुरुषशब्दवाच्यत्वम् ...

तिरस्येवं श्रद्धासोमवर्षान्नरेतोहवनपर्यायक्रमेण या पञ्चमी आहुतिस्तस्यां हुतायामापो गर्भभूता आपो माहुतिसमवायित्वात्प्राधान्यविवक्षाऽपां पञ्चम्यामाहुतौ पु-रुषवचस्त्वं न त्वाप एव केवलाः सोमादिकार्यमारभन्ते न चापोऽत्रिवृत्कृताः सन्ति त्रिवृत्कृतत्वेपि विशेषसंज्ञालाभो दृष्टः पृथिवी-यमिमा आपो यमग्निरयमित्यन्यमन्यं वा हुतत्वनिमित्तः तस्मात्सर्वेषामेव भूतानां वाहुल्यात्कर्मसमवायित्वात्सोमादिकार्यारंभकत्वमपां पञ्च-म्यामाहुतौ हुतायां रेतोभूता आपो गर्भभूता उच्यंते तद्दृश्यते च द्रवबाहुल्यं सोमवृष्ट्यन्नरेतो देहेषु वहुद्रवं च शरीरं यद्यपि पार्थिवं तत्र पञ्चम्यामाहुतौ हुतायां रेतो भूता आपो गर्भभूताः

वे२

इति त्वेवं पंचम्यामाहुतावापः पुरुषवचसो भवंतीति व्याख्यात एकः प्रश्नः यत्तु द्युलोकादिमां प्रत्यावृत्तयोराहुत्योः पृथिवीं पुरुषं स्त्रियं क्रमे-णाविश्य लोकं प्रत्युत्थायी भवतीति वाजसनेयक उक्तं तत्प्रासंगिकमिहोच्यते इह च प्रथमे प्रश्ने उक्तं लभेवं ... प्रजाः प्रयंतीति तत्-स्यायमुपक्रमः स गर्भोपां पंचमपरिणामविशेष आहुतिक्रमेण समवायिनीनां श्रद्धाशब्दवाच्यानामुल्बावृत उल्बेन जरायुणा वेष्टि-तो दश वा नव वा मासानंतर्मातुः कुक्षौ शयित्वा यावद्वा यावता कालेन न्यूनेनातिरिक्तेन वाथानंतरं जायते उल्बावृत इत्यादि वैराग्यहेतोरिद-मुच्यते कष्टं हि मातुः कुक्षौ मूत्रपुरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य गर्भस्योल्बाशुचिपटावृतस्य लोहितरेतोशुचिबीजस्य मातु-रशितपीतरसानुप्रवेशेन विवर्द्धमानस्य निरुद्धशक्तिबलवीर्यतेजःप्रज्ञाचेष्टस्य शयनं ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्म

इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति स उल्बावृतो गर्भो दश वा मासानंतः शयित्वा यावद्वाथ जायते स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोग्नय एव हरंति यत एवेतो यतः संभूतो भवति ९ ॥

ति वैराग्यं ग्राहयति मुहूर्तमप्यसह्यं दश वा मासानतिदीर्घकालमंतः शयित्वेति च स एवं जातो यावदायुषं पुनर्घटीयंत्रवद्गमनागमनाय कर्म कु-र्वन् कुलालचक्रवद्वा तिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायुस्तावज्जीवति तमेवं क्षीणायुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्रति य-दि चेज्जीवन्वैदिके कर्मणि विज्ञाने वाधिकृतस्तं इतोस्माद्ग्रामादग्नयेग्न्यर्थमृत्विजो हरंति पुत्रा वांत्यकर्मणे यत एवेत आगतोग्नेः सकाशाच्छ्रद्धाद्याहुतिक्रमेण यतश्च पंचभ्योग्निभ्यः संभूत उत्पन्नो भवति तस्मा एवाग्नये हरंति स्वामेव योनिमग्निमापादयं-तीत्यर्थः ९ ॥

छां०शं०
६६

132

वेदस्य परित्तोधि प्रजाः प्रयंतीत्ययं प्रश्नः प्रसुप्तस्येतेनोऽपाक[...]तेव्यनयानतत्रलोकंप्रसुच्छितानामधिकृतानां गृहमेधिनां येस्थमेवं पंथानौ
पंचाग्निदर्शनं द्युलोकाद्यग्निभ्यो वयं क्रमेण जाता अग्निस्वरूपाः पंचाग्न्यात्मान इत्येवं विदुर्जानीयुः कथमवगम्यत इत्थं विदुरिति गृहस्था
एवोच्यंते नान्य इति गृहस्थानां ये त्वनित्थंविदः केवलेष्टापूर्तदत्तपरास्ते धूमादिना चंद्रं गच्छंतीति वक्ष्यति ये चारण्योपलक्षिता वैखानसाः प
रिव्राजकाश्च श्रद्धा तप इत्युपासते तेषां चेत्थंविद्भिः सहार्चिरादिना गमनं वक्ष्यति यापारिशेष्यादग्निहोत्राहुतिसंबंधाच्च गृहस्था एव गृह्यंत इ
त्थंविदुरिति ननु ब्रह्मचारिणोऽप्यगृहीता ग्रामश्रुत्यारण्यश्रुत्या चानुपलक्षिता विद्यंते कथं पारिशेष्यसिद्धिर्नैष दोषः पुराणस्मृतिप्रामा
ण्यादूर्ध्वरेतसां नैष्ठिकब्रह्मचारिणामुत्तरेणार्यम्णः पंथाः प्रसिद्धोऽतस्तेऽप्यरण्यवासिभिः सह गमिष्यंत्युपकुर्वाणकास्तु स्वाध्यायग्रहणा

तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्ष
मापूर्यमाणपक्षाद्यान्षडुदङ्ङेति॥

र्थोऽस्तीति न विशेषणमिदं शाह्लैः ननूर्ध्वरेतस्त्वं चेदुत्तरमार्गे[...] प्रतिपत्तिकारणं पुराणस्मृतिप्रामाण्यादिष्यत इत्थंवित्त्वमनर्थकं प्राप्तं न गृह
स्थाप्रत्यर्थवत्वात् ये गृहस्था अनित्थंविदः स्वभावतो दक्षिणेनो धूमादिः पंथाः प्रसिद्धस्तेषां य इत्थं विदुः सगुणं वा अमृतत्वं ब्रह्मविदुरथ पडुचै
वास्मिंस्थ्यं कुर्वंति पडुचनार्चिषमेवेति लिंगादुत्तरेण ते गच्छंति नन्वूर्ध्वरेतसां गृहस्थानां च समानेऽग्राम्यत्वेऽप्यूर्ध्वरेतसामेवोत्तरेण पथा
गमनं न गृहस्थानामिति न युक्तमग्निहोत्रादिकर्मबाहुल्ये च सति नैष दोषोऽपूता हि ते शत्रुमित्रसंयोगनिमित्तं हि तेषां रागद्वेषौ तन्नौ धर्माध
र्मौ हिंसानुग्रहनिमित्तौ हिंसानृतमायाऽब्रह्मचर्यादि च बहुशुद्धिकारणमपरिहार्यं तेषामतोऽपूतास्त्वपूतत्वान्नोत्तरेण यथा गमनं हिंसा
नृतमायाऽब्रह्मचर्यादिपरिहाराच्च श्रद्धालमानो हीनतरे शत्रुमित्ररागद्वेषादिपरिहाराद्विरजसस्तेषां युक्त उत्तरः पंथास्तथा च योरणि॥

पा

रां०
६६

कायेप्रजामीषिरे चात्र ते श्मशानानि भेजिरे ये प्रजां नेषिरे धीरास्तेऽमृतत्वं हि भेजिर इत्यादि इत्थंविदां गृहस्थानामरण्यवासिनां च समानमार्गोऽप्यमृ
तत्वफले च सत्यरण्यवासिनां विधानमनर्थकं प्राप्तं तथा च श्रुतिविरोधः न तत्र दक्षिणा यंति नाविद्वांसस्तपस्विन इति न ह्यविदितेन भुनक्तीति
च विरुद्धं नामृतत्वं संप्लवस्थानस्यामृतत्वेन विवक्षितत्वात्तत्रैवोक्तं पौराणिकैराभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति यच्चापेक्षिकममृतत्वं तद
पेक्ष्य न तत्र दक्षिणा यंति स्प्राप्त्वामाविदितेन भुनक्तीत्याद्याः श्रुतयः अतो न विरोधो न च पुनरावर्तंत इतीमं मानवमावर्तं नावर्तंत इत्यादिश्रुतिविरो
ध इति चेन्नेमं मानवमिति विशेषणात्तेषामिह न पुनरावृत्तिरस्तीति च यदि ह्येकांतेनैव नावर्तेरन्निमं मानवमिहेति च विशेषणमनर्थकं
स्यादिममिहेत्याकृतिमात्रमुच्यत इति चेन्नानावृत्तिशब्देनैव नित्यानावृत्त्यर्थस्य प्रतीतत्वादाकृतिकल्पनानिरर्थिका अतस्तस्मिन्निहेति च विशेषणार्थ
वत्वायान्यत्रावृत्तिः कल्पनीया न च सदेकमेवाद्वितीयमित्येवं प्रत्ययवतां मूर्धन्यनाड्यार्चिरादिमार्गेण गमनं ब्रह्मैव सन्ब्रह्माप्येतीति तस्मात्

मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः॥

त्संवत्सरमभवत्तत्साधारणात्क्रामंत्सत्रैव समवनीयं तत्पुत्रादिश्रुतिशतेभ्यः ननु तस्माज्जीवात्कुक्षिक्रमिषोः प्राणानोक्रामंतीति सहैव गच्छंतीत्यर्थः कल्प
त इति चेन्नात्रैव समवनीयंत इति विशेषणानर्थक्यात्सर्वे प्राणा अनूत्क्रामंतीति च प्राणगमनस्य प्राप्तत्वात्तस्मादुत्क्रामंतीति अनाशंकैवैषा महापि मो
क्षस्य संसारगतिवैलक्षण्यात्प्राणानां जीवेन सहागमनमाशंकमानस्मात्नोत्क्रामंतीत्युच्यते तदाप्यत्रैव समवनीयंत इति विशेषणमनर्थकं स्यान्न
च प्राणैर्वियुक्तस्य गतिरुपपद्यते जीवत्वं वा सर्वगतत्वात्स्वात्मनो निरवयवत्वात्प्राणसंबंधमात्रमेव ह्यग्निविस्फुलिंगवज्जीवत्वं भेदकारणमि
त्यतस्तद्वियोगे जीवत्वं गतिर्वा न शक्या कल्पयितुं श्रुतयश्चेत्प्रमाणं न च सतोऽणुरवयवः स्फुटितो जीवाख्यः सद्रूपं छिद्रीकुर्वन्गच्छतीति शक्यं कल्प
यितुं तस्मात्तयोर्द्धमायत्रमतत्वमेतीति सगुणब्रह्मोपासकस्य प्राणैः सहनाड्या गमनं सापेक्षमेव चामृतत्वं न साक्षान्मोक्ष इति गम्यते तदपराजि

133

पा
प्य
ली
स
सहैवगच्छंतीत्यर्थः
१

नापस्तदेहं मरीयं सरइत्याद्युक्तान्तेषामेवैष ब्रह्मलोक इति विशेषणात् तत्पंचाग्निविदो गृहस्था ये चेमेऽरण्ये वानप्रस्थाः परिव्राजकाश्च सह नैष्ठिकब्रह्मचारिभिः श्रद्धा तप इत्येवमाद्युपासते श्रद्धालवस्तपस्विन इत्यर्थः उपासनशब्दस्तात्पर्यार्थः इष्टापूर्ते दत्तमित्युपासत इति यद्वद्गृहस्थाः ये च सत्यं ब्रह्म हिरण्यगर्भाख्यमुपासते ते सर्वेऽर्चिषमर्चिरभिमानिनीं देवतामभिसंभवन्ति प्रतिपद्यन्ते समानमन्यच्चतुर्थेन व्याख्याने नैष देवयानः पंथा व्याख्यातः सत्यलोकावसानो नांडाद्बहिः यैरन्तरा पितरं मातरं चेति मन्त्रवर्णात् अथ तत्र प्रस्तावनार्थः पश्चमे यद्गृहस्था ग्रामे ग्राम इति गृहस्थानामसाधारणं विशेषणं गामरण्यवासिभ्यो व्यावर्त्यर्थं यथा वानप्रस्थपरिव्राजकानामरण्यं विशेषणं गृहस्थेभ्यो व्यावर्त्यर्थं तद्वदिष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म पूर्तं वापीकूपतडागारामादिकरणं दत्तं बहिर्वेदि यथाशक्त्यर्हेभ्यो द्रव्यसंवि

स एतान्ब्रह्म गमयत्येष देवयानः पंथा इत्यथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति॥

गा दत्तमित्येवं विधं परिचरणं परित्राणाद्युपासते इति शब्दः प्रकारदर्शनार्थः ज्ञानदर्शनवर्जितत्वात् धूमं धूमाभिमानिनीं देवतामभिमुखेन संभवन्ति प्रतिपद्यन्ते तया ऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां रात्रेरपरपक्षं देवतामेवमेव कृष्णपक्षाभिमानिनीमपरपक्षाद्यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान् दक्षिणायनषण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः संघचारिण्यो हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तास्तु नैते कर्मिणः प्रकृताः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति कुतः पुनः संवत्सरप्राप्तिप्रसंगो यतः प्रतिषिध्यते ऽस्ति प्रसंगः संवत्सरस्य ह्येकस्यावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रवृत्तानामुदगयनमासेभ्यो ऽवयविनः संवत्सरस्य प्रा॥

प्तिरुक्ता ऽतस्तु इहापि तद्वदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि प्राप्तिरापन्नेत्यतस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसं कोऽसौ यस्तैः प्राप्यते चंद्रमाः परोक्ष दृश्यते ऽन्तरिक्षे सोमो राजा ब्राह्मणानां तद्देवानामन्नं तं चंद्रमसमन्नं देवा इन्द्रादयो भक्षयन्त्यतस्ते धूमादिना गत्वा चंद्रमसं कर्मिणो देवैर्भक्ष्यन्ते ननु अनर्थायेष्टादिकारिणां यद्यन्नभूतास्ते देवैर्भक्ष्यन्ते नैष दोषो ऽन्नमित्युपकरणमात्रस्य विवक्षितत्वान्नहि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते स्त्रीपशुभृत्यादिवद् दृष्टश्चान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं विशोऽन्नं राज्ञामित्यादि न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति तस्मात्कर्मिणो देवानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ति शरीरं च तेषां सुखोपभोगयोग्यं चंद्रमंडले आ

धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति॥

प्यमारभ्यते तच्च उक्तं पुरस्तात् श्रद्धाशब्दा आपो द्युलोकाग्नौ हुताः सोमो राजा संभवतीति ता आपः कर्मसमवायिन्यः इतरैश्च भूतैरनुगता द्युलोकं प्राप्य चंद्रत्वमापन्नाः शरीराद्यारंभिका इष्टाद्युपासकानां यावदस्मिँल्लोके शरीरारंभिका भवन्तीति तदारब्धेन च शरीरेणेष्टादिफलमुपभुंजाना आसते यावत्तदुपभोगनिमित्तस्य कर्मणः क्षयः संपतन्ति येनेति संपातः कर्मणः क्षयो यावत्संपातं यावत्कर्मणः क्षय इत्यर्थः तावत्तस्मिंश्चन्द्रमण्डले उषित्वाथानन्तरमेतमेव वक्ष्यमाणमध्वानं मार्गं पुनर्निवर्तन्त इति प्रयोगात्पूर्वमप्यसकृच्चंद्रमंडलं गता निवृत्ताश्चासन्निति गम्यते तस्मादिह लोके इष्टादिकर्मोपचित्य चंद्रं गच्छन्ति ततः क्षये चावर्तन्ते क्षणमात्रमपि तत्र स्थातुं न लभ्यन्ते स्थितिनिमित्तकर्मक्षयात् स्नेहक्षयादिव दीपस्य तत्राकिं ये नंकृमणा चंद्र॥

मंडुलमारूढस्य सर्वस्य क्षयेन तस्मादवरोहंतिं किंवा सावशेषा इति किं ततो यदि सर्वस्यैव क्षयः कर्मणश्चंद्रमंडलस्थस्यैव मोक्षः प्राप्नोति
निष्टनुतावत्तत्रैव मोक्षः स्यात्लवेतिनतत्र आगतस्येह शरीरोपभोगादिन भवति ततः शेषेणात्मादिस्थितिविरोधश्च स्यात नविषापर्तेर
नव्यतिरेकेणापि मनुष्यलोके शरीरोपभोगनिमित्तानि कर्माण्यनेकानि संभवंति नचतेषां चंद्रमंडले उपभोगः अतो ऽ क्षीणानितानि
यन्निमित्तं चंद्रमंडलमारूढःतान्येव क्षीणानि सविरोधो शेषश्चेन्न सर्वेषां कर्मणां साम्यादविरुद्धोऽतएव चंद्राद्वमोक्षः स्यादिति रो
धाभावः विरुद्धानेकयोनुपभोगफलानां च कर्मणामेकैकस्य जन्मारंभकत्वसंभवान्न चैकस्मिन्जन्मनि सर्वकर्मणां क्षयतत्प
घनेवक्षयहस्मादेकैकस्य कर्मणोनेकजन्मारंभकत्वस्मरणात्तस्यावरादि प्राप्तानां चासंतमूढानामुत्कर्षहेतोः कर्मणः आरंभक

यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा॥

त्वासंभवात् गर्भभूतानां च स्वसमानानां कर्मणां संभवे संसारानुपपत्तिस्तस्मान्नैकस्मिन्जन्मनि सर्वेषां कर्मणामुपभोगः यत्तु कैश्चिदुच्य
ते सर्वकर्मणां प्रायोपभर्दनप्रायणे कर्मणां जन्मारंभकत्वं तत्र कानिचित्कर्माण्यपनारंभकत्वेनैव तिष्ठंति कानिचित्जन्मांतरमारभंतेऽरति
तेसर्वकर्मणां प्रायोपमर्दनप्रायणे कर्मणां जन्मारंभकत्वं तत्र कानिचित्कर्माण्यपनारंभकत्वेनैव तिष्ठति [illegible] मुपगमात न
नोपपद्यते मरणस्य सर्वकर्माभिव्यंजकत्वात् स्वगोचराभिव्यंजकप्रदीपवदिति नदसत्सर्वस्य सर्वबलकत्वा[illegible]कर्मणामपिवाश्र
हि सर्वस्य सर्वबलकत्वे दृशकालनिमित्तावरुद्धत्वात् सर्वोपमनो पमर्दकस्य चित्तत्वचिदृश्यमक्तिर्नोपपद्यते तथा कर्मणामर्कजन्मप्रा
प्तानांभवेत पश्चाच पूर्वानुभूतमनुष्यमयपरमर्कोदादिजन्माभिसंस्कृता विरुद्धानेकावासनास्मर्कत्वप्रापकेनकर्मणामर्कजन्म प्रा
ईषमाणानेनोपमर्द्यते तथा कर्मोत्पत्त्यनन्तमप्राप्तिनिमित्तानेनोपमर्द्यते रतियुक्तं यदिहि सर्वाण्येवजन्मानुभववा॥

उपसर्ग

रामर्क

सजातपमर्द्यतेरनभकर्जन्मनिमित्तेनकर्मर्णा जन्मवार्द्धभर्कस्यजातमात्रस्य शावांतरगमने मांकरसंलग्नत्वादिकौशलेनप्रा उ
प्तोतोहजन्मन्यनभ्यस्तत्वात्तन्न चातीतानां तरजन्मनि मर्कदजन्मे वासीत्तस्य इति शक्यं वक्तुं तं विपाककर्मणां समन्वारभेतपूर्वप्रज्ञा चेति
श्रुतेः तस्माद्वासनावत्शेषकर्मोपमर्द इति शेषकर्मसंभवोयत्तरावंततः शेषेणायमुक्तात्कर्मणः संसार उपपद्यते इति नकश्चिद्विरोधः
कोसावनुशयः प्रतिनिवर्तते इत्युच्यते यथेतं यथा गतं निवर्तंते ननु मासेभ्यः पितृलोकं पितृलोकादाकाशं आकाशाच्चंद्रमसं इतिगम
नक्रमउक्तो नतथा निवृत्तिः किंतर्ह्याकाशाद्वायुमित्याद्याकथं यथेतमित्यु[illegible]च्यते नैषदोषः आकाशप्राप्तेस्तुल्यत्वात पृथिवीप्राप्तेश्चन
चात्र यथेतमेवेति नियमो ऽनेवमपि निवर्तते इति पुनर्निवर्तन्त इति तु नियमोऽतउपलक्षणार्थमेतत यथेतमिति अतो भौतिकमाकाशंता

अभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमा
षा इति जायंते अतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति॥

वद्भवंति पद्यंते याः तेषां च चंद्रमंडले शरीरारंभिका आप आसुस्ताः तेषां तत्रोपभोगनिमित्तानां कर्मणां क्षये विलीयंते घृतसंस्थानमिवाग्निसं
योगे ता विलीना अंतरिक्षस्था आकाशभूता इव सूक्ष्मा भवंति ता अंतरिक्षात्वायुर्भवंति वायुप्रतिष्ठा वायुभूता इत आमुत श्चोद्यमानास्ता
भिः सह क्षीणकर्मा वायुभूतो भवति वायुर्भूत्वा ताभिः सहैव धूमो भवति धूमो भूत्वा अभ्रं भवति अभ्रं रणमात्ररूपो भवति अभ्रं भूत्वा
ततः सेचनसमर्थो मेघो भवति मेघो भूत्वा उन्नतेषु प्रदेशेषु वर्षति धारारूपेणानुशयवान्पतति इत्यर्थः त इह व्रीहियवा ओषधीवनस्पतयस्ति
लमाषाश्चादय एवंप्रकारा जायंते क्षीणकर्मणामनेकत्वादिह बहुवचनं निर्देशो मेघादिषु पूर्वेषु एकरूपत्वादेकवचनं निर्देशः यस्माद्गिरितटदुर्गन
दीसमुद्रारण्यमरुदेशादिसन्निवेशसहस्राणि वर्षधाराभिः पतितानामतस्तस्मात्वै खलु दुर्निःप्रपतरं दुर्निष्क्रमणं दुर्निःसरणं यतो गि
रितयदुदकस्रोतसोह्यमानारीः॥

षा

नि

त्वात् अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य इति श्रुतेः शास्त्रचोदितायाः हिंसाया नाधर्महेतुत्वमुपगम्यते अस्याप्यधर्महेतुत्वे मंत्रैर्विषादिभ
क्षणवत् दर्शनयोरुपपत्तेर्न दुःखकार्यारंभकत्वोपपत्तिर्वैदिकानां कर्मणां मंत्रेणेव विषभक्षणस्येति तत्र तेष्वनुशयिनो ये इह लोके रमणी
यं शोभनं चरणं शीलं येषां ते रमणीयचरणाः रमणीयचरणेनोपलक्षितः शोभनोऽनुशयः पुण्यं कर्म विशिष्टं येषां ते रमणीयचरणास्त
थं तेऽक्रोधानृततमामायावर्जितानां हि शकाउपलक्षितेऽभ्मानुशयस्त्वावस्थानानुशये न पुण्येन कर्मणा चंद्रमंडले भुक्तशेषेणाभ्याशो ह।
क्षिप्रं यदिति क्रियाविशेषणं ते रमणीयां क्रौर्यादिवर्जितां योनिमापद्येरन् प्राप्नुयुः ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा स्वकर्मानु

गुप्सेत तदेष श्लोकः स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमावसन्ब्रह्महा चैते पतन्ति चत्वारः पंचमश्चाचरंस्तैरिति अथ ह य एता
नेवं पंचाग्नीन्वेद न सह तैरप्या॥

सारेण अथ पुनर्ये विपरीताः कपूयचरणोपलक्षितकर्माणोऽशुभानुशया अभ्याशो ह यत्ते कपूयां यथाकर्म योनिमापद्येरन् कपूयामेव धर्म २
संबंधवर्जितां जुगुप्सितां योनिमापद्येरन् श्वयोनिं वा चांडालयोनिं वा स्वकर्मानुरूपेणैव ये तु रमणीयचरणा द्विजातयः स्वकर्मस्था इष्टादि
कारिणस्ते धूमादिगत्या गच्छंत्यायंति च पुनः पुनर्घटीयंत्रवत् विद्यां चो प्राप्नुवंति तौ अर्चिरादिना गच्छंति यदा तु न विद्यासेविनो नापीष्टादिकर्मसेवंते त
दा अथैतयोः पथोर्यथोक्तयोरर्चिर्धूमादिलक्षणयोर्न कतरेणाप्यतरेणाप्युभाभ्यामपि यंति तानि मानि क्षुद्राणि दंशमशककीटादीनि
असकृदावर्तीनि भवंति तत उभयमार्गपरिभ्रष्टा असकृज्जायंते म्रियंते चेत्यर्थः तेषां जननमरणसंततेरनुकरणमिदमुच्यते जायस्व।
म्रियस्वेति जननमरणलक्षणेनैव कालयापिनो भवंति न च तत्र क्रियायुक्तिः ॥

मनेषु प्रयोगेषु वा कालो गच्छतीत्यतः क्षुद्रजंतुलक्षणां तृतीयं पूर्वोक्तौ पंथानावपेक्ष्य स्थानं संसरतां येनैवं दक्षिणमार्गगा अपि पुनरागच्छं
ति अनधिकृतानां ज्ञानकर्मणोरगमनमेव दक्षिणेन पथेति तेनासौ लोको न संपूर्यते पंचमस्तु प्रश्नः पंचाग्निविद्यायां व्याख्यातः प्रथमो दक्षि
णोत्तरमार्गयोर्व्यावृत्तौ दक्षिणोत्तरयोः पथोर्व्यावर्तनायां मृतानामग्नौ प्रक्षेपः समानः ततो व्यावर्तना अन्ये अर्चिरादिना यंति अन्ये धूमादिना पु
नरुत्तरदक्षिणायने षण्मासान्प्राप्नुवंतः संयुज्य पुनर्व्यावर्तंते अन्ये संवत्सरमासेभ्यः पितृलोकमिति व्याख्याता पुनरावृत्तिरपि क्षीणानुशया
नां चंद्रमंडलादाकाशादिक्रमेणोक्ता अमुष्य लोकस्यापूरणं स्वशब्देनोक्तं तेनासौ लोको न संपूर्यत इति यस्मादेवं कष्टा संसारगतिः तस्माज्जुगुप्से

चरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वेद १०॥

तस्माज्जन्ममरणजनितवेदनानुभवकृतक्लेशात् क्षुद्रजंतवो नु घोरे ध्वांते दुस्तरे प्रवेशिता सागरे वागाधे उप्लवे निराशाश्चोत्तरणं प्रति
तस्माच्चैवंविधां संसारगतिं जुगुप्सेत बीभत्सेत घृणी भवेत् मा भूदेवंविधसंसारमहोदधौ घोरे पातः इति एतस्मिन्नर्थे एष श्लोकः पंचा
ग्निविद्यास्तुतये स्तेनो हिरण्यस्य ब्राह्मणसुवर्णस्य हर्ता सुरां पिबन् ब्राह्मणः सन् गुरोश्च तल्पं दारानावसन् ब्रह्महा ब्राह्मणस्य हंता चेत्येते
पतंति चत्वारः पंचमश्च यस्तैः सहाचरन्निति अथ पुनर्यो यथोक्तान्पंचाग्नीन्वेद स ह तैरप्याचरन् महापातकिभिः सह पाप्मना लिप्य
ते शुद्ध एव तेन पंचाग्निदर्शनेन यस्मात्पूतः पुण्यो लोकः प्राजापत्यादिर्यस्य सोऽयं पुण्यलोको भवति य एवं यथोक्तं समस्तं पंचप्रश्नैः सार्थ
मर्थजातं वेद द्विरुक्तिः समस्तप्रश्ननिर्णयार्थः १० ॥

छां० शं०
७१

दस्त्रितो न पश्याग घृतामलमाव तज्ञास्ते देवागमनं तं देवाम ति ह्यं यतीं तु सुइंज्ञलद्दरागाचकष्टां संसारगतिरू क्षान्तु भयरोषपरिजिहीर्षया वैश्वानरात्मभावप्रतिपत्त्यर्थमुत्तरो ग्रंथ आरभ्यते अस्य लोपशपसिप्रियं द्रूत्यादिलिंगात् आख्यायिका तु सुखावबोधार्था विद्यासंप्रदानन्यायप्रदर्शनार्था चेति प्राचीनशाल इति नामतः उपमन्योरपत्यमौपमन्यवः सत्ययज्ञो नामतः पुलुषस्यापत्यं पौलुषिस्तथेन्द्रद्युम्नो नामतः भल्लवेरपत्यं भाल्लवेयो जन इति नामतः शार्कराक्ष्यस्यापत्यं शार्कराक्ष्यो बुडिलो नामतः अश्वतराश्वस्यापत्यं आश्वतराश्विः पंचापि ते हैते महा

142

प्राचीनशालः औपमन्यवः सत्ययज्ञः पौलुषिरिंद्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमांसां चक्रुः को न आत्मा किं ब्रह्मेति ते ह संपादयांचक्रुरुद्दालको वै भगवंतोऽयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति तं हंताभ्यागच्छामेति तं हाभ्याजग्मुः सह संपादयांचकार

शाला महागृहस्था विस्तीर्णाभिः शालाभिः संयुक्ताः संपन्ना इत्यर्थः महाश्रोत्रियाः श्रुताध्ययनवृत्तसंपन्ना इत्यर्थः ते एवंभूताः संतः समेत्य संभूय क्वचिन्मीमांसां विचारणां चक्रुः कृतवंत इत्यर्थः कथं को नोऽस्माकमात्मा किं ब्रह्मेति आत्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वं ब्रह्मेत्यध्यात्मपरिच्छिन्नमात्मानं निवर्तयत्यात्मेति चात्मव्यतिरिक्तस्यादित्यादिब्रह्मण उपास्यत्वं निवर्तयत्यभेदेन आत्मैव ब्रह्म ब्रह्मैवात्मेत्येवं सर्वात्मा वैश्वानरो ब्रह्म स आत्मेत्येतत्सिद्धं मूर्द्धा॥
भवति

५
स्व
राम०
७१

तेऽप्यतिष्ठत् अधरा वो मूर्द्धाभिप्रायेत्यादिलिंगात् ते मीमांसंतो निश्चयमलभमानाः संपादयांचक्रुः संपादितवंत आत्मनः प्रदेष्टारमुद्दालको वै प्रसिद्धो नामतः हे भगवंतः पूजावंतोऽयमारुणिररुणस्यापत्यं संप्रतीममात्मानं वैश्वानरमस्मदभिप्रेतमध्येति स्मरतीत्यर्थः तं हंत इदानीमभ्यागच्छाम इत्येवं निश्चित्य तं हाभ्याजग्मुः तं गतवंतः स तानाह्वाशारूढ दृष्ट्वैव तेषामागमनप्रयोजनं बुद्ध्वा संपादयांचकार कथं प्रक्ष्यंति मामिमे महाशाला महाश्रोत्रियास्तेभ्योऽहं न सर्वमिव पृष्टं प्रतिपत्स्ये वक्तुं न शक्ष्यामि अतो हंताहमन्यमभ्यनुशासानि वक्ष्याम्युपदेष्टारमित्ये

त ३
ति
ह

प्रक्ष्यंति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये हंताहमन्यमभ्यनुशासानीति तान्होवाचाश्वपतिर्वै भगवंतोऽयं कैकेयः संप्रतीममात्मानं वैश्वानरमध्येति तं हंताभ्यागच्छामेति तं हाभ्याजग्मुस्तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयांचकार स ह प्रातः संजिहान उवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतो यक्ष्यमाणो वै भगवंतोऽहमस्मि याव॥

143

एवं संपाद्य तान्होवाच अश्वपतिर्वै नामतो भगवंतोऽयं केकयस्यापत्यं कैकेयः संप्रति सम्यगिममात्मानं वैश्वानरमध्येतीत्यादि समानं तेभ्यो ह राजा प्राप्तेभ्यः पृथक्पृथगर्हाणि पृथगर्हणानि पुरोहितैर्भृत्यैश्च कारयांचक्रे कारितवान् स ह अन्येद्यू राजा प्रातः संजिहान उवाच विनयेनोपगम्येदं धनं मत्त उपादध्वमिति तैः प्रत्याख्यातो मयि दोषं पश्यंति नूनं यतो न प्रतिगृह्णंति धनं मत्त इति मन्वान आत्मनः सद्वृत्ततां प्रतिपिपादयिषन्नाह न मे मम जनपदे स्तेनः परस्वहर्ता विद्यते न कदर्यो दाता सति विभवे न मद्यपो द्विजोत्तमः सन् नानाहिताग्निः शतगुर्नाविद्वानधिकारानुरूपं न स्वैरी परदारेषु गंता अत एव

स्या

त्वेति शौनकौ सन्तुष्टचा रिणोमिन संभवतीत्यर्थः ते अनवयं धनेनार्थिन इत्युक्त आह राज्यं मे वै ते धनं प्राजिग हतो मीति । यस्य समा शोभे विकतिय यो रोगिन न
हे भगवं तोऽस्मिन देर्थ कृपृष्ठ धनं मया यावदे कैकस्मै यथोक्तम्वत्विजे धनं दास्यामि तावत्प्रत्येकं भगवद्भ्यो दास्यामि वसन्तु भगवन्तः पश्यन्तु च
मम यागमित्युक्तास्ते होचुर्येन हैवार्थेन प्रयोजनेन पुरुषं यं प्रति चरेत गच्छेत् पुरुषः तं हैवार्थं वदेदिदं मे प्रयोजनमागमनस्येत्येवं सतां
पुरुषवैश्वानरज्ञानार्थिन आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि स्मरसि जानासि अतस्तमेव नोऽस्मभ्यं ब्रूहीत्युक्तस्तान् होवाच प्रातर्वः युष्मभ्यं

देकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति ते होचुर्येन हैवार्थेन पुरुषश्चरेत्तं हैव वदेदात्मान
मेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति तान्होवाच प्रातर्वः प्रतिवक्तास्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हा
नुपनीयैवैतदुवाच ॥११॥

प्रतिवक्तास्मि प्रतिवाक्यं दातास्मीत्युक्तास्ते ह राज्ञोऽभिप्रायज्ञाः समित्पाणयः समिद्भारहस्ताः अपरेद्युः पूर्वाह्णे राजानमुपचक्रमिरे गतवन्तो यत
एवं महाशाला महाश्रोत्रिया ब्राह्मणाः सन्तो महाशालत्वाद्यभिमानं हित्वा समिद्भारहस्ता जातितो हीनं राजानं विद्यार्थिनो विनयेनोपजग्मु
स्तथान्यैर्विद्योपादित्सुभिर्भवितव्यं तेभ्यश्चादात् विद्यामनुपनीयैव तानुपनयनमकृत्वैव यथा योग्येभ्यो विद्यामदात्तथान्येनापि विद्या
दातव्या इत्याख्यापिकार्थः एतद्वैश्वानरविज्ञानमुवाचेति वक्ष्यमाणेन संबन्धः ॥ ११ ॥

स कथं उवाचेत्याह औपमन्यव हे कमात्मानं वैश्वानरमुपास्स इति पप्रच्छ ननु अयमन्याय आचार्यः सन् शिष्यं पृच्छति नैष दोषः यदि उपदेशेन
मोपसीदन्नतस्तं ऊहं दत्वा स्यामीति न्यायदर्शनात् अप्रतिभानवति शिष्ये प्रतिभोत्पादनार्थं अन्यत्रापि आचार्यस्य प्रश्नो दृष्टः अजातशत्रोः क्वैष
तदाभूदित्यादि एतदागादिति दिवमेव द्युलोकमेव वैश्वानरमुपासे भगवो राजन्निति होवाच एष वै सुतेजाः शोभनं तेजोऽस्येति सुतेजा
इति प्रसिद्धो वैश्वानर आत्मा आत्मनोऽवयवभूतत्वात् यं त्वमात्मानमात्मैकदेशमुपास्से तस्मात्सुतेजसो वैश्वानरस्योपासनात्तव सु

औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मान
मुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कु
ले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति ॥१२॥

तमभिषुतं सोमरूपं कर्मणि प्रसुतं प्रकर्षेण सुतमासुतं चाहर्गणादिषु तव कुले दृश्यते अतीव कर्मिणस्त्वत्कुलीना इत्यर्थः अत्स्यन्नं दी
प्ताग्निः सन् पश्यसि च पुत्रपौत्रादि प्रियमिष्टमन्योऽप्यत्त्यन्नं पश्यति च प्रियं भवत्यस्यापि सुतं प्रसुतमासुतमित्यादि कर्मित्वं ब्रह्मवर्चसं कु
लेऽयं कश्चिदेतमेवं वैश्वानरमुपास्ते मूर्धा तु वैश्वानरस्यैष न समस्तो वैश्वानरोऽतः समस्तबुद्ध्या वैश्वानरस्योपासनात् मूर्धा शि
रस्ते विपरीतग्राहिणो व्यपतिष्यत् विपतितमभविष्यत् यत् यदि मां नागमिष्यो नागतोऽभविष्यः साध्वकार्षीर्यन्मामागतोऽसीत्यभिप्रायः ॥

छां०शां०
७३

अथ होवाच सत्ययज्ञं पौलुषिं हे प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाच शुक्लनीलादिरूपत्वात् विश्वरूपत्वमादित्यस्य सर्वरूपत्वाद्वा सर्वाणि रूपाणि हि त्वाष्ट्राणि अतो वा विश्वरूप आदित्यस्तदुपासनात्त्वव बहु विश्वरूपमिहामुत्रार्थमुपकरणं दृश्यते कुले किं च त्वामनु प्रवृत्तोऽश्वतरीरथो दासीनिष्कोदासीभिर्युक्तो निष्को हारो दासीनिष्कोऽस्य त्वमिस्यादि समानं चक्षुर्वैश्वानरस्य तु स्वविनाशनत्वात् समस्तदृष्ट्योपासनात् अन्धोऽभविष्य अचक्षुर्हे मोऽभविष्यो यन्मां नागमिष्य इति पूर्ववत् १३ अथ

२

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते प्रवृत्तोऽश्वतरीरथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यो यन्मां नागमिष्य इति १३ अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृथग्बलय आयन्ति पृथग्रथश्रेणयोऽनुयन्त्यत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति १४

प

होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्येति कं त्वमात्मानमुपास्स इत्यादि समानं पृथग्वर्त्मात्मा नानावर्त्मानि यस्य वायोरावहोद्वहादिभेदैर्वर्त्मानस्य सोऽयं पृथग्वर्त्मात्मा वायुस्तस्मात्पृथग्वर्त्मात्मनो वैश्वानरस्योपासनात् पृथक्कृता नानादिक्का त्वां बलयो वस्त्राद्यन्नलक्षणा बलय आयन्ति पृथग्रथश्रेणयो रथपङ्क्तयोऽपि त्वामनुयन्त्यत्स्यन्नमित्यादि समानं प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यदुत्क्रान्तोऽभविष्यद्यन्मां नागमिष्य इति १४ ॥

शां०
७३

146

अथ होवाच जनमित्यादि समानं एष वै बहुल आत्मा वैश्वानरो बहुलत्वमाकाशस्य सर्वगतत्वात् बहुलगुणोपासनाच्च त्वं बहुलोऽसि प्रजया च पुत्रपौत्रादिलक्षणया धनेन च हिरण्यादिना संदेहस्त्वेष संदेहो मध्यमं शरीरं वैश्वानरस्य देहस्य च मांसरुधिरास्थ्यादिभिश्च बहुलत्वं शरीरं संदेहस्तेन वशरीरं शीर्यत शीर्णमभविष्यद्यन्मां नागमिष्य इति १५ अथ होवाच बुडिलमाश्वतराश्विमित्यादि समानं एष वै रयि

अथ होवाच जनं शार्कराक्ष्य शार्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन चात्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते संदेहस्त्वेष आत्मन इति होवाच संदेहस्ते व्यशीर्यद्यन्मां नागमिष्य इति १५ अथ होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यप एव भगवो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं रयिमान्पुष्टिमानस्यत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच बस्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति १६ अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाचैष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्चात्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति १७

संग्र

147

रूपोऽत्रीत्रततो
ध७१

एष वै रयिरात्मा वैश्वानरो धनं निमित्तं तस्मात्त्वं धनवान् त्वं पुष्टिमांश्च शरीरेणापुष्टेः अन्ननिमित्तत्वात् बस्तिस्त्वेष आत्मनो वैश्वानरस्य बस्तिर्मूत्रसंग्रहस्थानं बस्तिस्ते व्यभेत्स्यत् भिन्नोऽभविष्यत् यन्मां नागमिष्य इति १६ अथ होवाचोद्दालकमित्यादि समानं पृथिवीमेव भगवो राजन्निति होवाचैष वै प्रतिष्ठा पादौ ते व्यम्लास्येतां विम्लानावभविष्यतां श्लथीभूतौ यन्मां नागमिष्य इति १७ श्रीरामेति परं ब्रह्मतारकं ब्रह्मसंज्ञकं श्रीरा

संय

दौ वैश्वानरस्य पा

छां०शां०
७४

१४८

तान् यथोक्तं वैश्वानरदर्शनवतो होवाचैते वै यूयं खल्विसनर्थकोऽप्यं पृथगिवापृथक्संतं गुणमिमं ?कं वैश्वानरं विद्वांसोऽन्नम
त्थ परिच्छिन्नात्मबुद्ध्येत्येतत् हस्तिदर्शनमिव जात्यंधाः यस्त्वेतमेवं यथोक्तावयवैर्मूर्धादिभिर्विशिष्टमेकं प्रादेशमात्रं प्रादेशै र्द्युमूर्धादिभिः
पृथिवीपादान्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रं मुखादिषु वा करणेष्वत्तृत्वेन मीयत इति प्रादेशमात्रो द्युलोकादिपृथिव्यन्तप्रदे
शपरिमाणो वा प्रादेशमात्रः प्रकर्षेणादिश्यन्त इति प्रादेशा द्युलोकादय एव तावत्परिमाणः प्रादेशमात्रः शाखान्तरे तु मूर्धादिश्चि
बुकप्रतिष्ठ इति प्रादेशमात्रं कल्पयन्तीह तु न तथाभिप्रेतस्तस्य ह वा एतस्यात्मन इत्याद्युपसंहारात् प्रत्यगात्मतयाभिविमीयते हमिति
विज्ञायत इत्यभिविमानस्तमेतमात्मानं वैश्वानरं विश्वान्नरान्नयति पुण्यपापानुरूपां गतिं सर्वात्मेष ईश्वरो वैश्वानरो विश्वानरा वा

१ तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वा
नरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वा[illegible]न्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव [illegible] सुतेजा
श्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्ह
पत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः १८

वासवो लकत्वात् विश्वे वा नराः प्रत्यगात्मतया प्रविभज्यन्ते नीयन्त इति वैश्वानरस्तमेतमेवमुपास्ते यः सोऽदन्नन्नानि सर्वेषु लोकेषु द्युलो
कादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेन्द्रियमनो[illegible]बुद्ध्यादिषु तेषु ह्यात्मकल्पनाव्यपदेशः प्राणिनामन्नमत्ति वैश्वानरवि
त् सर्वात्मा सन्नन्नमत्ति न यथाज्ञः पिंडमात्राभिमानवान् संनित्यर्थः कस्मादेवं यस्मात्तस्य ह वै प्रकृतस्यैतस्यात्मनो वैश्वानरस्य मूर्द्धैव
[illegible] एवाविध्यर्थमेतद्वचनमेवमुपास्य इति
सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावेव [illegible] आकारसामान्यात् लोमानि बर्हिर्वे
[illegible]
[illegible]

रामं०
७४

॥१८ [illegible]

ततश्चैवं सति यद्भक्तं भोजनकाले आगच्छेद्भोजनार्थं तद्धोमार्थं होमीयं तद्धोतव्यमग्निहोत्रसंपन्मात्रं संविवक्षितत्वात्तु नाग्निहोत्राङ्गेति
कर्तव्यताप्राप्तिरिह स भोक्ता यां प्रथमामाहुतिं जुहुयात्तां कथं जुहुयादित्याह प्राणाय स्वाहेत्यनेन मंत्रेणाहुतिशब्दाद्वदानप्रमाणमन्नं

१४९

५ तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्य
ति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किंच द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृ
प्यति [illegible] प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति १९ अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृ
प्यति व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किंच दिशश्च चन्द्र
मा आधितिष्ठन्ति तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति २०॥

छां०

प्रक्षिपेदित्यर्थः तेन प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यति चक्षुरादित्यो द्यौश्चेत्यादि तृप्यति यच्चान्यत् द्यौश्चादित्यश्च स्वामित्वेना
धितिष्ठतश्च तत्तृप्यति तस्य तृप्तिमनु स्वयं भुंजानस्तृप्यत्येवं प्रत्यक्षं किंच प्रजादिभिश्च तेजः शरीरगता दीप्तिरुज्ज्वलत्वं प्रागल्भ्यं वा ब्रह्मव
र्चसं वृत्तस्वाध्यायनिमित्तं तेजः १९ अथ द्वितीया १०

अथ यां तृतीयां तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यत्यपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्य
ति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किंच पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्ना
द्येन तेजसा ब्रह्मवर्चसेनेति २१ अथ यां चतुर्थीं जुहुयात्तां जुहुयात्समानाय स्वाहेति समानस्तृप्यति समाने तृप्यति मन
सि तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किंच विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्या
नुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति २२ अथ यां पंचमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदान
स्तृप्यत्युदाने तृप्यति वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किंच वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्या
नुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति २३ ॥

मनस्तृप्यति

राम०
७५

स यः कश्चिदिदं वैश्वानरदर्शनं यथोक्तमविद्वान्सन्नग्निहोत्रं प्रसिद्धं जुहोति यथांगारानाहुतियोग्यानपोह्यानाहुतिस्थाने भस्मनि जुहुया
त्तादृक्तत्तुल्यं तस्य तदग्निहोत्रहवनं स्यात् वैश्वानरविदोऽग्निहोत्रमपेक्ष्येति प्रसिद्धाग्निहोत्रनिंदया चैव वैश्वानरविदोऽग्निहोत्रं स्तूयते
अतश्चैतद्विशिष्टमग्निहोत्रं कथं य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य यथोक्तवैश्वानरविज्ञानवतः सर्वेषु लोकेष्वित्याद्युक्तार्थं हुतम
न्नमतोऽस्यानयोरेकार्थत्वात् किंच तद्यथा ईषिकायास्तूलमग्नौ प्रोतं प्रक्षिप्तं प्रदह्येत प्रदहेत क्षिप्रमेवं हास्य विदुषः सर्वोऽतस्य सर्वो
त्सानामतुः सर्वे निरवशिष्टाः पाप्मानो धर्माधर्माख्या अनेकजन्मसंचिता इह प्राक् ज्ञानोत्पत्तेर्ज्ञानसहभावीनि च प्रदूयंते वर्तमान

त्र

स य इदमविद्वानग्निहोत्रं जुहोति यथांगारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यादथ य एतदेवं विद्वानग्निहोत्रं जुहोति त
स्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं ह्यस्य सर्वे पाप्मानः प्रदूयंते य
एतदेवं विद्वानग्निहोत्रं जुहोति तस्मादु हैवंविदपि चंडालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतं स्यादिति तदे
ष श्लोको यथेह क्षुधिता बाला मातरं पर्युपासत एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति [illegible]

शरीरारंभकपापवर्जं लक्ष्यं प्रतिमुक्तेषुवत्प्रवृत्तफलत्वात्तस्य न दाहः अथ य एतदेवं विद्वानग्निहोत्रं जुहोति सोऽपि यद्यपि चंडालायोच्छि
ष्टं प्रयच्छेत् प्रतिषिद्धमुच्छिष्टदानं यद्यपि कुर्यात् आत्मनि हैवास्य चंडालदेहस्थे वैश्वानरे तद्धुतं स्यान्नाधर्मनिमित्तमिति विद्यामेव
स्तौति तदेतस्मिन्नर्थे एष श्लोको मंत्रोऽप्येष भवति यथेह लोके क्षुधिता बुभुक्षिता बाला मातरं पर्युपासते कदा नो माताऽन्नं प्रयच्छतीति
एवं सर्वाणि भूतान्यन्नादान्येवंविदोऽग्निहोत्रं भोजनमुपासते कदा न्वसौ भोक्ष्यत इति जगत्सर्वं विदुषो भोजनेन तृप्तं भवतीत्यर्थः द्विरु
रध्यायपरिसमाप्त्यर्था २४ इति श्रीगोविंदभ॰ शिष्यप॰ श्रीशंक॰ कृतौ छां॰ वर॰ रो पंचमः प्रपाठकः ५

श्वेतकेतुर्हारुणेय आसेत्याद्यध्यायसंबंधः सर्वं खल्विदं ब्रह्मेति तज्जलानिसुक्तं कथं तस्माज्जगज्जायते तस्मिन्नेव च लीयते तेनैव चेष्टते इति वेदितव्यं तत्र कथं अनंतरं लोकस्मिन्नतः प्रविष्टे विदुषि सर्वं जगत्तस्माद्वा तोसुक्तं तदेकलोकस्माल्लनः सर्वं भवतस्य सोम यद्येतेनाल्लभेदेकथं तदेकल्प मितितत्तृतीयं षष्ठोध्याय आरभ्यते पितापुत्राख्यायिका विद्यायाः सारिष्ठत्वप्रदर्शनार्थं श्वेतकेतुरिति नामतः हारुणेः स्यापत्यं आरुणेय आरुणस्य पौत्र आस बभूव तं पुत्रं ह आरुणिः पिता योग्यं विद्याभाजनं मन्वानस्तस्योपनयनकालात्ययं च पश्यं लुवाच किं श्वेतकेतो अ

3

ओं श्वेतकेतुर्हारुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबंधुरिव भवतीति स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तं ह पितोवाच

नुरूपं गुरुं कुलस्यनो गत्वा वस ब्रह्मचर्यं न चैतद्युक्तं यदस्मत्कुलीनो हे सोम्य अननूच्यानधीत्य ब्रह्मबंधुरिव भवतीति ब्राह्मणान् बंधून्व्यपदिशति न स्वयं ब्राह्मणवृत्त इति तस्य अनंप्रवासोनुमीयते पितुर्येन स्वयं गुणवान् सन् पुत्रं नोपनेष्यतीति स पित्रोक्तः श्वेतकेतुर्द्वादशवर्ष उपेत्याचार्यं यावच्चतुर्विंशतिवर्षो बभूव तावत्सर्वान्वेदानधीत्य तदर्थं च बुद्ध्वा महामना महत् गंभीरं मनो यस्य सोयं महामना अनूचानमानी अनूचानमात्मानं मन्यत इत्येवंशीलो यः सोनूचानमानी स्तब्धोऽप्रणतस्वभाव एव एयाय गृहं तमेवं भूतं महामनसं ननुरूपशीलं स्तब्धं मानिनं पुत्रं दृष्ट्वा पितोवाच तं सत्प्रबोधधर्मार्थं वचनार्थ चिकीर्षया

हे श्वेतकेतो यन्विदं यस्त्वमिदं महामना अनूचानमानी स्तब्धोसि कस्तेतिशयः प्राप्त उपाध्यायात् उत तमपि तमादेशं अप्राक्ष्यः तमादेशं केवलशास्त्राचार्योपदेशगम्यं यदेतेन येन वा परं ब्रह्मादिश्यते आदेशस्तमप्राक्षः पृष्टवानसि आचार्यं तमादेशं विशिनष्टि येना देशेन श्रुतेनाश्रुतमप्यन्यत् श्रुतं भवति अमतं मतं तर्कितं भवति अविज्ञातमविज्ञातं विज्ञातं भवतीति सर्वानपि वेदानधीत्य सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति यावदात्मतत्वं न विजानातीत्याख्यायिकातोवगम्यते तदेतदद्भुतं श्रुत्वाह कथं त्वेतदप्रसिद्धं अन्यविज्ञाने नान्यद्विज्ञातं भवतीत्येवं मन्वानः पृच्छति कथं नु केन प्रकारेण हे भगवः स आदेशो भवतीति यथा स आदेशो भवति तच्छृणु

श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं यथा सोम्य ॥

हे सोम्य यथा लोके एकेन मृत्पिंडेन कुंभकारणभूतेन विज्ञातेन सर्वमन्यत्तद्विकारजातं मृन्मयं मृद्विकारजातं विज्ञातं स्यात् ननु कथं मृत्पिंडे कारणे विज्ञाते कार्यमन्यद्विज्ञातं स्यात् नैष दोषः कारणेनानन्यत्वात्कार्यस्य यन्मन्यसेतस्मिन् विज्ञातेऽन्यन्न ज्ञायत इति सत्यमेवं स्यात् यद्यन्यत्कारणात्कार्यं स्यात् नत्वेवं अन्यत्कारणात्कथं तर्हि लोके इदं कारणमयमस्य विकार इति श्रृणु वाचारंभणं वागवलंबनमित्येतत् कोसौ विकारो नामधेयं नामैव नामधेयं स्वार्थे धेयट् प्रत्ययः वागालंबनमात्रं नामैव केवलं न विकारो नामास्ति परमार्थतः मृत्तिकेत्येव मृत्तिकैव तु सत्यं वस्तु यथा च सोम्यैकेन लोहमणिनासुवर्ण ॥

छां॰ उ॰
११

154

पिंडेन सर्वं मन्मयं विकारजातं करककुंडला... मृषशरावादि विज्ञातं स्यात् वाचारंभणमित्यादि समानं यथा सौम्यैकेन नखनिकृंतनो
पलक्षितेन कार्ष्णायसपिंडेनेत्यर्थः सर्वं कार्ष्णायसं कृष्णायोविकारजातं स्यात् समानमन्यत् अनेकदृष्टांतोपादानं दार्ष्टांतिकोनेकधाऽस
नुगमार्थं दृढप्रतीत्यर्थं च एवं सोम्य स आदेशो यो मया ...को भवतीत्युक्तवति पितर्याह इतरो न वै नूनं भगवंतो गुरवो मम ये तद्वृक्तं

केनलोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं लोहमित्येव सत्यं यथा सौम्यैकेन न
खनिकृंतनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवं सोम्य स
आदेशो भवतीति न वै नूनं भगवंतस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नावक्ष्यन्निति भगवांस्त्वेव मे तद्ब्रवीत्विति
तथा सोम्येति होवाच १॥

वस्तु नावेदिषुर्नो विज्ञातवंतो नूनं यद्यवेदिष्यन विदितवंतः एतद्वस्तु कथं मे गुणवते भक्तायानुगतायनावक्ष्यन्नोक्तवंतस्तेनाहं
मन्ये न विदितवंत इत्यवाच्यमपि गुरोर्निंदा भवता शितः पुनर्गुरुकुलं प्रति प्रेषणभयात् अतो भगवांस्त्वेव मे मह्यं तद्वस्तु येन सर्वज्ञत्वं ज्ञा
नेन मे स्यात् तद् ब्रवीतु कथयेत्युक्तः पितोवाच तथास्तु सौम्येति १॥

रामः
२१

हे श्वेतकेतो यन्नु त्वमिदं महामना अनूचानमानी स्तब्धोसि किं तेनेति शाधः प्राप्तउपाध्यायात् उत पितरमादेशं आदिश्यत इत्यादेशः केवल
शास्त्राचार्योपदेशगम्य इत्येतत् येन वापरं ब्रह्मादिश्यते असावादेशस्तमप्राक्ष्यः पृष्टवानस्याचार्यमित्यादेशं विशिनष्टि येनादेशेन अश्रुतेना
श्रुतमप्युपत्य श्रुतं भवति अमतं मतं तर्कितं तर्कितं भवति अविज्ञातमपि अविज्ञातं विज्ञातं भवतीति सर्वानपि वेदानधीत्य सर्वं चान्यद्वेद्यमधी
धिगम्याप्यकृतार्थ एव भवति यावदात्मतत्त्वं न विजानातीत्याख्यायिकातो वगम्यते तदेतदद्भुतं श्रुत्वा कथं त्वेतदप्राप्तिहेतुमन्यविज्ञानेनान्यद्वि
ज्ञातं भवत्येवं मन्वानः पृच्छति कथं नु केन प्रकारेणाहे भगवन्स आदेशो भवतीति यथा स आदेशो भवति तच्छृणु हे सौम्य यथालोकेंनम

विज्ञातं
८
एके

श्वेतकेतो यन्नु सौम्येदं महामना अनूचानमानी स्तब्धोस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति क
थं नु भगवः स आदेशो भवतीति यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्ये
व सत्यं यथा सौम्ये

तम

पिंडेन कुंभकारणाम्‌ तेन विज्ञातेन सर्वमन्यत् तद्विकारजातं मृन्मयं मृद्विकारजातं विज्ञातं स्यात् ननु कथं मृत्पिंडे कारणे विज्ञाते कार्यमन्
यद्विज्ञातं स्यात् नैष दोषः कारणेनानन्यत्वात् कार्यस्य यन्मन्यसे तस्मिन्विज्ञाते न्यन्न ज्ञायत इति सत्यमेवं स्यात् यद्यन्यत्कारणात्कार्यं
स्यात् न त्वेवमन्यत्कारणात् कथं तर्हि लोके इदं कारणमिदमस्य विकार इति शृणु वाचारंभणं वागवलंबनमित्येतन्मन्यते कोसौ विकारो नाम
धेयं नामैव नामधेयं स्वार्थे धेयप्रत्ययः वागालंबनमात्रं नामैव केवलं न विकारो नाम वस्त्वस्ति परमार्थतः मृत्तिकेत्येव मृत्तिकैव तु सत्यं वस्तु य
थावत्सौम्यैकेन लोहमणिना सुवर्णा॥

स्य

155

पिंडेन सर्वं मृद्विकारजातं कटककुंडलादि भूषणादि विज्ञातं स्यात् वाचारंभणमित्यादि समानं यथा सोम्यैकेन नखनिकृंतनोपलक्षितेन कार्ष्णायसपिंडेन यथा सर्वं कार्ष्णायसं कृष्णायसो विकारजातं विज्ञातं स्यात् समानमन्यत् अनेकदृष्टांतोपादानं दार्ष्टांतिकानेकभेदानुगमार्थं दृढप्रतीत्यर्थं च एवं सोम्य स आदेशो यो मया उक्तो भवतीत्युक्तवति पितर्याह इतरो न वै नूनं भगवंतो गुरवो मम एतद्वस्तु नावेदिषुर्न विज्ञातवंतो येते

केन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं लोहमित्येव सत्यं यथा सोम्यैकेन नखनिकृंतनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवं सोम्य स आदेशो भवतीति न वै नूनं भगवंतस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नावक्ष्यन्निति भगवांस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच १

नूनं यद्यवेदिष्यन् विदितवंतः एतद्वस्तु कथं मे गुणवते भक्तायानुगताय नावक्ष्यन् नोक्तवंतस्तेनाहं मन्ये न विदितवंत इति यद्वाच्यमपि गुरोर्मम भावमवाशीतः पुनर्गुरुकुलं प्रति प्रेषणाभयात् अतो भगवांस्त्वेव मे मह्यं तद्वस्तु येन सर्वज्ञत्वं ज्ञानेन मे स्यात् तद्ब्रवीतु कथयत्वित्युक्तः पि ते तोवाच तथास्तु सोम्येति १ ॥

सदेव सदित्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरंजनं निरवयवं विज्ञानं यदवगम्यते सर्ववेदांतेभ्यः एवशब्दोऽवधारणार्थः किं तदवधार्यत इत्याह इदं जगन्नामरूपक्रियावद्विकृतमुपलभ्यते यत्तत्सदेवासीदित्यासीच्छब्देन संबध्यते कदा सदेवेदमासीदित्युच्यते अग्रे जगतः प्रागुत्पत्तेः किं नेदानीमिदं सत् येनाग्र आसीदिति विशेष्यते नन्वेवं कथं न विशेषणं इदानीमपीदं सदेव किंतु नामरूपविशेषणवदिदंशब्दबुद्धिविषयश्चेतीदं च भवति प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिमात्रगम्यमेवेति सदेवेदमग्र आसीदित्यवधा-

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायंते ता आप ऐक्षंत बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजंत तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदन्नाद्यं जायते २ ६ कालत्रयं यथासुषुप्तादुत्थितः सत्वमा ॥

र्यते नहि प्रागुत्पत्तेर्नामवद्रूपवद्वेदमिति ग्रहीतुं शक्यं वस्तु सुषुप्तकालवत् यथा सुषुप्तात्सन्मात्रं केवलं वस्त्विति तथा प्रागुत्पत्तेरित्यभिप्रायः यथेदमुच्यते लोके पूर्वाह्णे घटादि सिसृक्षुणा कुलालेन मृत्पिंडं प्रसारितमुपलभ्य ग्रामांतरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्यमुपलभ्य मृदेवेदं घटशरावादि केवलं पूर्वाह्ण आसीदिति तथेहाप्युच्यते सदेवेदमग्र आसीदिति एकमेवेति स्वकार्यपतितमन्यन्नास्ती

१८

कालत्रयपाद सुषुप्तादुत्थितः सत्वमा १

छां० शां०
७८

त्येकमेवेत्युच्यते अद्वितीयमिति सद्यजिरे केशादेघटपटाद्याकारेणापरिणामे कुलालादिनिमित्तकारणादृष्टं तथा सवितीरेकेणास
तः सहकारिकारणाद्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यते अद्वितीयमिति नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयं ननु वैशेषिकपक्षेपिस
तः सामानाधिकरण्यं सर्वस्योपपद्यते द्रव्यगुणादिषु सत् शब्द बुद्ध्युपपत्तेः सत् द्रव्यं सन् गुणः सत्कर्मेत्यादि दर्शनात् सत्यमेवं स्यादिदा
नीं प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात् न चैकमेव सदद्वितीयं प्रागु
त्पत्तेरिष्यते तस्माद्धि वैशेषिकपरिकल्पितात् सतोन्यत्कारणाभिदं सदुच्यते सदादिदृष्टान्तेभ्यः तत्र हेतस्मिन् प्रागुत्पत्तेर्वस्तुनिरूपणे
राके वैशेषिका आहुः वस्तुनिरूपणं नोऽसत् सदभावमात्रं प्रागुत्पत्तेरिदं जगदेकमेवाऽद्वितीयमासीदिति सदभावमात्रं प्रागुत्प
त्तेरसत्त्वं कस्यचिन्मतं बौद्धाः न तु सत्यानि हि द्वितीयवस्त्वन्तरमिच्छन्ति यथा सत्त्वासदिति सत्प्रमाणं यथा सत्त्वमविपरीतं तत्त्वं भवतीति नैयायिका
न तु सदभावमात्रं प्रागुत्पत्तेरिदमिति नैवैनाशिकैः कथं प्रागुत्पत्तेरिदमासीदसदेकमेवाद्वितीयं चेति कालसंबंधः संख्यासंबंधो
द्वितीयत्वं चोच्यते तैः वाङ्मात्रमिति तेषां भावाभावमात्रमभ्युपगच्छतामसत्त्वमात्राभ्युपगमोप्ययुक्त एवाभ्युपगन्तुरनभ्युपगमानुप
पत्तेरिदानीमभ्युपगन्ताभ्युपगम्यते न प्रागुत्पत्तेरिति चेन्न प्रागुत्पत्तेः सदभावस्य प्रमाणाभावात् प्रागुत्पत्तेरसदेवेति कल्पनानुपपत्ते
ननु कथं वस्त्वाकृतेः शब्दार्थत्वेऽसदेकमेवाद्वितीयमिति पदार्थवाक्यार्थोपपत्तिस्तदनुपपत्तौ चेदं वाक्यमप्रमाणं प्रसज्येतेति चेन्न
नाम दोषः सद्ग्रहणनिवृत्तिपरत्वान्न वाक्यसदिति यं नावत्तशब्दः सदाकृतिवाचकः तथाकमेवाद्वितीयमित्येतौ च सच्छब्देन समानाधि
करणौ तथेदमासीदिति च तत्र न जः सद्वाक्ये प्रयुक्तः सद्वाक्यमेवावलंब्य सद्वाक्यार्थविषयां बुद्धिं सदेकमेवाद्वितीयमासीदिति
तं नान्तः सद्वाक्यार्थनिवर्तयत्यश्वारूढ इव वाश्चालंबनो अश्वं तदभिमुखविषयानिवर्तयति तद्वत्तनु पुनः सदभा
वमेवाभिधत्ते ऽतः पुरुषस्य विपरीतग्रहणनिवृत्त्यर्थपरमिदमसदेवेत्यादि वाक्यं प्रयुक्तं तद्दर्शयित्वा हि विपरीतग्रहणं
न तेनिवर्तयितुं शक्यत्वादिदमसदादिवाक्यस्यार्थोऽनल्पं प्रामाण्यं च सिद्धमिति दोषः तस्मादसतः सर्वाभावरूपा ॥ ॥

१५८

राम०
७८

नास्मिद्विद्यमानमजायत समुत्पन्नं अद्रुमावस्थां दसतदेतद्विपरीतग्रहणं मत्वा वैनाशिकपक्षं दर्शयित्वा प्रतिषेधति कुतस्तु प्रमाणात् खलु हे सौ
म्य एवं स्यात् असतः सज्जायते त्वेवं कुतो भवेत् कुतश्चित्प्रमाणादेवं संभवतीत्यर्थः यदपि वीजोपमर्देऽङ्कुरो जायमानो दृष्टोऽभावादेवेति तदप्य
भ्युपगमविरुद्धं तेषां कथं येतावद्वीजावयवा वीजसंस्थानविशिष्टास्तेऽङ्कुरेऽप्यनुवर्तन्त एवं तेषामुपमर्दोऽङ्कुरजन्मनि यत्तु न वीजाकारसंस्थानं त
द्बीजावयवव्यतिरेकेणावस्तुभूतं न वैनाशिकैरभ्युपगम्यते यदङ्कुरजन्मनि उपमृद्यते अथ तदस्त्यवयवव्यतिरिक्तं वस्तुभूतं तथा च सत्यभ्युपग
मविरोधः अथ संवृत्याभ्युपगतं वीजसंस्थानरूपमुपमृद्यत इति चेत् केयं संवृत्तिर्नाम किमसावभावउत भाव इति यद्यभावो दृष्टान्ताभावः
अथ भावस्तथापि नाभावादङ्कुरोत्पत्तिर्वीजावयवेभ्यो ह्यङ्कुरोत्पत्तिः अवयवा अप्युपमृद्यन्त इति चेन्न तदवयवेषु तुल्यत्वात् यथा वै नाशिकानां
वीजसंस्थानरूपे अवयवी नास्ति तथावयवा अपीति तेषामप्युपमर्दानुपपत्तिः वीजावयवानामपि सूक्ष्मा अवयवास्तदवयवानामपि सूक्ष्मा अ
वयवास्तेषामपि सूक्ष्मा इत्येवं प्रसंगस्यानिवृत्तेः सर्वत्रोपमर्दानुपपत्तिः सद्बुद्ध्यनुवृत्तेः सत्त्वानिवृत्तिश्चेति सद्वादिनां सत एवं सदुत्पत्तिः सेत्स्यति
न तु असद्वादिनां दृष्टान्तोऽस्त्यसतः सदुत्पत्तौ मृत्पिण्डात्घटोत्पत्तिर्दृश्यते सद्वादिनां तु घटाभावे भावेऽपि चाभावात् यद्यभावाद्घटउत्प
द्यते घटार्थिना मृत्पिण्डो नोपादीयेत अभावशब्दबुद्ध्यनुवृत्ति अघटादौ प्रसज्येत न त्वेतदस्ति तोनासतः सदुत्पत्तिर्यद्यप्यत्र मृद्बुद्धिर्घटबुद्धेर्निमित्त
मिति मृद्बुद्धिर्घटबुद्धेः कारणमुच्यते न तु परमार्थत एवं मृद्घटो वास्तीति तथापि मृद्बुद्धिर्विद्यमाना विद्यमानायाएव घटबुद्धेः कारणमिति
नासतः सदुत्पत्तिः मृद्घटबुद्ध्योर्निमित्तनैमित्तिकतया नन्तर्यमात्रं न तु कारणत्वमिति चेन्न बुद्धीनां नैरंतर्ये गम्यमाने वैनाशिकानां व
हिर्दृष्टान्ताभावात् अतः कुतस्तु खलु सौम्येवं स्यादिति होवाच कथं केन प्रकारेणासतः सज्जायेतेति असतः सदुत्पत्तौ न कश्चिदपि दृष्टान्तोस्ती
त्यभिप्रायः एवमसद्वादिपक्षमुन्मथ्योपसंहरति सत्त्वेसोम्येदमग्र आसीदिति स्वपक्षसिद्धिं नसद्वादिनोपि सतः सदुत्पद्यत इति नैव
दृष्टान्तोऽस्ति घटात् घटान्तरोत्पत्त्यदर्शनात् सत्यमेवं न सतः सदन्तरमुत्पद्यते किं तर्हि सदेव संस्थानान्तरेणावतिष्ठते यथा सर्पः कुण्डली भवति

सु
कार्य
त्प

६
घेत
१५९
नु

छां०भा०
७८

160

यथा च मृदेव पिंडघटकपालादिप्रकारैर्येवं सदेव सर्वप्रकारावस्थं कथं प्रागुत्पत्तेरिदमासीदित्युच्यते ननु न श्रुतं त्वया सदेव सव
धारणमिदं शब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेः सदेवासीदिदं शब्दवाच्यमिदानीं जातमिति न सतरां वेदं शब्दबुद्धिविषयतयावस्था
नात्तु यथा मृदेव सत्पिंडघटादि शब्दबुद्धिविषयतयावतिष्ठते तद्वत् ननु यथा मृद्वस्तु वापि डघटादेपितद्वत्सद्वस्तु बुद्धिविषयत्वा
त्कार्यस्य सतोऽन्यद्वस्त्वंतरं स्यात् कार्यजातं यथाऽश्वात् गौः न पिंडघटादीनामितरेतरव्यभिचारेपि न व्यभिचारात् यथापि घटः पिंडं व्यभिचरति
पिंडश्च घटं तथापि पिंडघटौ न मृदं व्यभिचरतस्तस्मान्मृन्मात्रं पिंडघटौ व्यभिचारस्त्वश्वो गौरश्वो वा गां तस्मान्मृदादिसंस्थानमात्रं घटादय एवं
मत्संस्थानमात्रमिदं सर्वमिति युक्तं प्रागुत्पत्तेः सदेवेति वाचारंभणमात्रत्वात्विकारसंस्थानस्य ननु निरवयवं सन्निष्कलं निष्क्रियं शांतं निरवद्यं
निरंजनं सद्वा व्याप्यं तरोत्यजडसादि श्रुतिभ्यो निरवयवस्य कथं विकारसंस्थानमुपपद्यते नैष दोषः रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानवत्
बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तेः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं एवं सदेव सत्यमिति श्रुतेरेक
मेवाद्वितीयं परमार्थत इदं बुद्धिकालेपि न सदेव तु नरस्तीदृशं न तु नवदादन्नच न प्रधानं सांख्यपरिकल्पितं जगत्कारणं प्रधानस्याचेतन

द्वितीयःखंडः प्रपा० ३

रामः
७८

पुनस्तस्यैव प्रागुत्पत्तेः प्रधंसाद्योर्ध्वमसत्वं ब्रुवते तत्किं का न तथा स्मातिः कदाचिदपि सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते इ
त्वाभ्युपगमात् इदं तु सच्चेतनमीक्षितृत्वात् कथमैक्षत इत्याह तद्बहु प्रभूतं स्यां भवेयं प्रजायेय प्रकर्षेणोत्पद्येय यथा मृद्घटाकारेण यथा
वा रज्ज्वादि सर्पाद्याकारेण बुद्धिपरिकल्पितेन असदेव तर्हि सर्वं यद्गृह्यते रज्जुरिव सर्पाद्याकारेण न सतरां वद्वैतभेदेनान्यथा गृह्यमाणत्वा
त् नासत्वं कस्यचित् क्वचिदिति ब्रूमः यथा सतोऽन्यद्भिधानं अभिधेयं वा वस्तु परिकल्प्यं तैः सदेव तु सर्वमभिधानमभिधीयते च यदन्यबुद्ध्या यथा र
ज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते यथा वा पिंडघटादि मृदोऽन्यबुद्ध्या पिंडघटादिशब्देनाभिधीयते लोके रज्जुविवेकदर्शिनां तु सर्पाभिधानबु
द्धी निवर्त्तेते यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी तद्वत्सद्विवेकदर्शिनामन्यविकारशब्दबुद्धी निवर्त्तेते यतो वाचो निवर्त्तंते
अप्राप्य मनसा सह इति अनिरुक्तेऽनिलयन इत्यादि श्रुतिभ्यः एवमीक्षित्वा तत्तेजोऽसृजत तेजः सृष्टवत् ननु तस्माद्वा एतस्मा दा
त्मनः आकाशः संभूत इति श्रुत्यंतरे आकाशाद्वायुर्वायोस्तृतीयं तेजः श्रुतमिह कथं प्राथम्येन तस्मादेव तेजः सृज्यते तत एव चाकाश
मिति विरुद्धं नैष दोषः आकाशवायुसर्गानंतरं तत्सत्तेजोऽसृजतेति कल्पनोपपत्तेः अथवा अविवक्षित इह सृष्टिक्रमः सत्कार्यमिदं स
र्वं अतः सदेकमेवाद्वितीयं इत्येतद्विवक्षितं मृदादिदृष्टांतात् अथवा त्रिवृत्करणस्य विवक्षितत्वात् तेजोबन्नानामेव सृष्टिमाचष्टे तत्तेजोऽसृजतेति प्र

161

छां० शा०
८०

सिद्धं लोके रूपप्रकाशकं प्रकाशं रोहितं चेति तत्तत्सृष्टं तेज ऐक्षत तेजोरूपसंस्थितं सदैक्षतेत्यर्थः बहु स्यां प्रजायेयेति पूर्ववत् तदपोऽसृजत आपो
द्रवाः स्निग्धाः स्यंदिन्यः शुक्लाश्चेति प्रसिद्धा लोके यस्मात्तेजसः कार्यभूता आपः तस्माद्यत्र क्व च देशे काले वा शोचति संतप्यते स्वेदते प्रस्विद्य
ते वा पुरुषः तेजस एव तत्तदापोऽधिजायंते ता आप ऐक्षंत पूर्ववदेवापाकारसंस्थितं सदैक्षतेत्यर्थः बह्व्यः स्याम प्रभूता भवेम प्रजाये
महि उत्पद्येमहीति ता अन्नमसृजंत पृथिवीलक्षणं पार्थिवं स्थूलं यस्मादन्नकार्यमन्नं तस्माद्यत्र क्व च वर्षति देशे तत्रैव भूयिष्ठं प्रभूतमन्नं भव
त्यतोऽद्भ्य एव तदन्नाद्यमधिजायते ता अन्नमसृजंतेत्युक्तं पूर्वमिह त्वन्नं दृष्टांते चान्नाद्यं चेति विशेषणात् व्रीहियवाद्युच्यते अन्नं च
गुरु स्थिरं धारणं कृष्णं च रूपतः प्रसिद्धं ननु तेजःप्रभृतिष्वीक्षणं न गम्यते हिंसादिप्रतिषेधाभावात् त्रासादिकार्यानुपलंभाच्च तत्र कथं तेज
ऐक्षतेत्यादि नैष दोषः ईक्षितृकारणपरिणामत्वात्तेजःप्रभृतीनां सत एवेक्षितुर्नियतक्रमविशिष्टकार्योत्पादकत्वाच्च तेजःप्रभृतीक्षते इव
ते इत्युच्यते भूतानि ननु सतोऽप्युपचारितमेवेक्षितृत्वं न सदीक्षणस्य केवलशब्दगम्यत्वान्न शक्यमुपचरितं कल्पयितुं तेजःप्रभृतीनामनुमी
यते ईक्षणाभाव इति मुख्यं उपचरितं कल्पयितुं ननु सतोऽपि सहकारित्वात् अचेतनत्वं शक्यमनुमातुं अतः प्रधानस्येवाचेतनस्य सतः

राम०
८०

दद्. ४

त्वादकत्वाच्चेक्षितृत्वं उपचरितमेवेक्षितृत्वं शक्यमनुमातुमुपचरितमेवेक्षितृत्वं लोके ऽचेतनेऽपि वदुपचारः यथा कूलं पिपतिषतीति तद्व
त्सतोऽपि स्यात् न तत्सत्यं स आत्मेति तस्मिन्नात्मोपदेशात्तस्मिन्नात्मोपदेशोऽप्युपचरित इति चेत् यथा ममात्मा भद्रसेन इति सर्वार्थकारि
ण्यनात्मनि आत्मोपचारः स्यात् तद्वत्सदसीति न तस्याभिसंधस्य तस्य तावदेव चिरमिति मोक्षोपदेशात् मोक्षोऽप्युपचार इति चेत् प्रधाना
त्माभिसंधस्य मोक्षसामीप्यं वर्तत इति मोक्षोपदेशोऽप्युपचरित एव यथा लोके ग्रामं गंतुं प्रस्थितः प्राप्तवानहं ग्राममिति ब्रूयात्त्वरापेक्षया तद्व
त् न येन विज्ञातेन अविज्ञातं विज्ञातं भवतीत्युपक्रमात् सत्येकस्मिन्विज्ञाते सर्वं ज्ञातं भवतीति तदनन्यत्वात् सर्वस्याद्वितीयवचनाच्च न चान्य
त् ज्ञातव्यमवशिष्टं श्रावितं श्रुत्यानुमेयं वा लिंगमस्ति येन मोक्षोपदेशस्योपचरितः स्यात्तत्सर्वस्य च प्रपाठकार्थस्योपचरितत्वं कल्पना
यां वृथा श्रमः परिकल्पनः कल्पयितुं स्यात् पुरुषार्थविज्ञानस्य तर्केणाधिगतत्वात्तस्यात् तस्मात् वेदस्य प्रामाण्यापत्त्युक्तः अनार्थपरि
त्यागोऽनर्थश्च नावतः कारणं जगदिति सिद्धं तेषां जीवाविष्टानां खल्वेवं पृथग्विधानां भूतानामेवामिति प्रत्यक्षनिर्देशात् ननु तेजःप्रभृती

। २ ।

नां तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वात् असति त्रिवृत्करणे प्रसिद्धनिर्देशानुपपत्तिः देवताशब्दप्रयोगाच्च तेजःप्रभृतिषु इमास्तिस्रो देवता
इति तस्मात्तेषां खल्वेषां भूतानां पक्षिपशुस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति कानि तानीत्युच्यते आण्डजं अण्डाज्जातं
अण्डजं अण्डजमेव आण्डजं पक्ष्यादि पक्षिसर्पादि यो हि पक्षिसर्पादिभ्यो जायमाना दृश्यन्ते तेन पक्षी पक्षिणां बीजं सर्पः सर्पाणां तथान्यदण्डा

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवे
नात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्म
नानुप्रविश्य नामरूपे व्याकरोत्तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे
विजानीहीति ३ ॥

जातं तज्जातीयानां बीजमित्यर्थः ननु अण्डाज्जातमण्डजमुच्यते आण्डजमेव बीजमिति पुंस्कं कथमण्डजं बीजमित्युच्यते सत्यमेवं स्यात् यदि स्वादिरु
तं त्रा आकृतिः स्यात् खं तत्रानुआकृतिर्यतः आण्डजादिभ्य एव बीजानि तान्यण्डादीनि दृश्यन्ते यांडजाद्यभावे तज्जातीयसंततभावो नांडजाद्यभावे तो
डजादिभ्य एव बीजात्पिण्डजादीनां तथा जीवाज्जातं जीवजं जरायुजमित्येतत् पुरुषपश्वादि उद्भिज्जमुद्भिनत्तीत्युद्भित्स्थावरं ततो जातमुद्भिज्जं धाना वो

बीजमित्यर्थः स्वेदजसंशोकजयोरण्डजोद्भिज्जयोरेव यथासम्भवमन्तर्भावः एवमवधारणं त्रीण्येव बीजानीत्युपपन्नं भवति सेयं प्र
कृता सदाख्या तेजोबन्नयोनिर्देवतोक्तैक्षत ईक्षितवती यथापूर्वं बहु स्यामिति तदेव बहुभवनप्रयोजनं नाद्यापि निर्वृत्तमित्यत ईक्षां पुनः कृ
तवती बहुभवनमेव प्रयोजनमुररीकृत्य कथं हन्तेदानीमहमिमा यथोक्तास्तेजआद्यास्तिस्रो देवता अनेन जीवेनेति स्वबुद्धिस्थं पू
र्वसृष्ट्यनुभूतं प्राणधारणमात्मानमेव स्मरन्त्याह अनेन जीवेनात्मनेति प्राणधारणकर्त्रात्मनेति वचनात् स्वात्मनोऽव्यतिरिक्तेन
चैतन्यस्वरूपतया अविशिष्टेनेत्येतद्दर्शयति अनुप्रविश्य तेजोबन्नभूतमात्रासंसर्गेण लब्धविशेषविज्ञाना सती नाम च रूपं च ना
मरूपे व्याकरवाणि विस्पष्टमाकरवाणि असौनामायं इदंरूपमिति व्याकुर्यामित्यर्थः ननु न युक्तमिदं असंसारिणः सर्वज्ञाया देवताया
बुद्धिपूर्वकमनेकशतसहस्रानर्थाश्रयं देहमनुप्रविश्य दुःखमनुभविष्यामीति संकल्पनमनुप्रवेशश्च स्वातन्त्र्ये सति सत्यमेवं
न युक्तं स्यात् यदि स्वेनैवाविकृतेन रूपेणानुप्रविशेयं दुःखं चानुभवेयमिति संकल्पितवती न त्वेवं कथं तर्हि अनेन जीवेनात्मनानुप्रवि
श्येति वचनात् जीवो हि नाम देवताया आभासमात्रं बुद्ध्यादिभूतमात्रासंसर्गजनित आदर्श इव प्रविष्टः पुरुषप्रतिबिम्बो जलादिषु
इव सूर्यादीनां अचिन्त्यानन्तशक्तिमत्या देवताया बुद्ध्यादिसंबन्धश्चैतन्याभासो देवतास्वरूपविवेकाग्रहणनिमित्तः सुखी दुःखी
मूढ इत्याद्यनेकविकल्पप्रत्ययहेतुः छायामात्रेण जीवरूपेणानुप्रविष्टत्वात् देवता न दैहिकैः स्वतः सुखदुःखादिभिः संबध्यते यथा
दित्यपुरुषादयः आदर्शोदकादिषु छायामात्रेणानुप्रविष्टा आदर्शोदकादिदोषैर्न लिप्यन्ते तद्वद्देवतापि सूर्यो यथा

छां० शां०
८२

सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः इति हि काठके ध्यायतीव
लेलायतीवेति वाजसनेयके ननु छायामात्रश्चेज्जीवस्तर्हि मृषैव प्राप्तस्तथा परलोकेहलोकादि च कथं तस्य नैष दोषः सदात्मनास
त्यत्वाभ्युपगमात् सर्वं च नामरूपादि सदात्मनैव सत्यं विकारजातं स्वतस्त्वनृतमेव वाचारंभणं विकारो नामधेयमित्युक्तत्वात्तथा जी
वोपीति यक्षानुरूपो बलिरिति हि न्यायप्रसिद्धिः सदात्मना सर्वव्यवहाराणां सत्यत्वं सतोन्यत्वे चानृतत्वमिति न कश्चिद्दोषस्तार्किकैरिहानु
शंकितुं शक्यः यथेतरेतरविरुद्धद्वैतवादाः स्वबुद्धिविकल्पमात्रा अतत्वनिष्ठा इति शक्यं वक्तुं सेवंतिस्रो देवता अनुप्रविश्य स्वात्मस्थे बी
जभूते अव्याकृते नामरूपे व्याकरवाणीति तासां च तिसृणां देवतानामेकैकां त्रिवृतं करवाणीत्येकैकस्याः त्रिवृत्करणे एकैकस्याः
प्राधान्यं द्वयोर्द्वयोर्गुणभावः अन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यान्न तु तिसृणां पृथक्पृथक्त्रिवृत्करणं इत्येवं हि तेजोबन्नानां पृथ
क्नामप्रत्ययलाभः स्यात्तेज इदमिमा आप इदमन्नमिति च सति च पृथक्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहारप्रसिद्धिः प्रयोजनं
स्यात् एवमीक्षित्वा सेयं देवता इमास्तिस्रो देवता अनेनैव यथोक्तेन जीवेन सूर्यबिंबवदनुप्रविश्य वैराजं पिंडं प्रथमं देवादीनां च पिंडा
ननुप्रविश्य यथासंकल्पमेव नामरूपे व्याकरोत् असौ नामायं इदं रूपमिति नाम्नां देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमे
कैकामकरोत्कृतवती तिष्ठतु तावद्देवतापिंडानां नामरूपाभ्यां व्याकृतानां तेजोबन्नमयत्वेन त्रिधात्वं यथा तु बहिरिमाः पिंडेभ्यस्ति
स्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे मम निगदतो विजानीहि विस्पष्टमवधारय उदाहरणतः ३ ॥ ॥ ॥

166

राम०
८१

यत्तद्देवतानां त्रिवृत्करणमुक्तं तस्यैवोदाहरणमुच्यते उदाहरणं नामैकदेशप्रसिद्ध्याशेषप्रसिद्ध्यर्थमुदाह्रियत इति तदेतदाह यदग्ने
स्त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि तथा यच्छुक्लं रूपमग्नेरेव तदपामत्रिवृत्कृतानां यत्कृष्ण
न्तस्यैवाग्नेरूपं तदन्नस्य पृथिव्याः अत्रिवृत्कृताया इति विद्धि तत्रैवं रूपत्रयव्यतिरेकेणाग्निरिति यन्मन्यसे त्वं तस्याग्नेरग्नित्वमिदानीमपा

यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि
रूपाणीत्येव सत्यं यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारंभणं
विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं यच्चन्द्रमसो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्र
त्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं यद्विद्युतो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्न
स्यापागाद्विद्युतो विद्युत्त्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं एतद्ध स्म वै तद्विद्वांस आहुः पूर्वे महा
शाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदांचक्रुः यदु रोहितमिवाभूदिति तेजस
स्तद्रूपमिति तद्विदांचक्रुः यदु शुक्लमिवाभूदित्यपाꣳ रूपमिति तद्विदांचक्रुः यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदां
चक्रुः यद्वविज्ञातमिवाभूदित्येतासामेव देवतानाꣳ समास इति तद्विदांचक्रुः यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं
प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ४ ॥

गादग्निरूपगतं प्राग्रूपत्रयव्यतिरेकविज्ञानात्तवाग्निबुद्धिरासीत्तेसाग्निबुद्धिरपगता अग्निशब्दश्च यथा दृश्यमानरक्तोपधान
संयुक्तः स्फटिको गृह्यमाणः पद्मरागोयमिति शब्दबुद्ध्योः प्रयोजको भवति प्रागुपधानस्फटिकयोर्विवेकविज्ञानात्तद्विवेकविज्ञाने तु पद्म

167

छां॰ शां॰ ८३

168

द्वीति विवर्तेते तेन द्विवेकविज्ञानमुक्तं द्वत् ननु किमत्र शब्दबुद्धिकल्पनया क्रियते प्राक्रूपत्रयविवेककरणादग्निरेवासीत्तत्र नेराग्नित्वंबो
हि रिरूपैककरणादपागादिति उक्तं यथा तं तत्नाकर्षणोपदाभावान्नैवं बुद्धिशब्दमात्रमेवह्यग्निर्येन आह वाचारंभणंनामधेयं विकारोनामधे
यं नाममात्रमित्यर्थो तोऽग्निबुद्धिरपि मृषैवा किं तर्हि तत्र सत्यं त्रीणिरूपाणीत्येव सत्यं नराणुमात्रमपि रूपत्रयव्यतिरेकेण सत्यमस्तीत्यवधारणा
र्थः तथा यदादित्यस्य यच्चंद्रमसो यद्विद्युतः इत्यादि समानं यथानु खलु सौम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि रसुक्ता
तेज स एव चतुर्भिरप्युदाहरणैरग्न्यादिभिस्त्रिवृत्करणं दर्शितं नावन्नयोरुदाहरणं तोदर्शितं त्रिवृत्करणे नैष दोषः अबन्नविषयाण्यप्युदा
हरणानि राव मेव च द्रष्टव्यानीति मन्यते तेज उदाहरणं उपलक्षणार्थत्वात् रूपवत्त्वात्स्पष्टार्थत्वोपपत्तेश्च गंधरसयोरनुदाहरणं त्रयाणा
मसंभवान्न हि गंधरसौ तेजसोस्तः स्पर्शशब्दयोरनुदाहरणं विभागेन दर्शयितुमशक्यत्वात् यदि सर्वं जगत्त्रिवृत्कृतं तेजोबन्नादिवत्त्रीणिरू
पाणीत्येव सत्यं अग्नेरग्नित्ववदपागाज्जगतो जगत्त्वं तथान्नस्याप्यप्शुंगत्वादाप इत्येव सत्यं वाचारंभणमात्रमन्नं तथापामपि तेजःशुं
गत्वाद्वाचारंभणत्वं तेजस इत्येव सत्यं तेजसो वै सच्छुंगत्वा द्वाचारंभणत्वं सदित्येव सत्यमित्येषोर्थो विवक्षितः ननु वायवंतरिक्षे त्वत्रिवृ
त्कृते तेजःप्रभृतिष्वनंतर्भूतत्वादवशिष्येते एवं गंधरसशब्दस्पर्शाश्चावशिष्टा इति कथं सता विज्ञातेन सर्वमन्यदविज्ञातं वि
ज्ञातं भ[illegible]॥

राम॰ ८३

वेत् तद्विज्ञाने प्रकारांतरं वाच्यं नैष दोषः रूपवद्द्रव्ये सर्वस्य दर्शनात् कथं तेजसि तावद्रूपवति शब्दस्पर्शयोरप्युपलंभात् वाय्वंतरिक्षयोस्तत्र स्पर्श
शब्दगुणवतोः सद्भावोनुमीयते तेन तथा वन्नयो रूपवतो रसगंधांतर्भावः इति रूपवतां त्रयाणां तेजोबन्नानां त्रिवृत्करणप्रदर्शनेन सर्वं तदंतर्भूतं सद्वि
कारत्वात् त्रीण्येव रूपाणि विज्ञातं मन्यते श्रुतिः न हि मूर्तं रूपवद्द्रव्यं प्रत्याख्याय वाय्वाकाशयोस्तद्गुणयोर्गंधरसयोर्वा ग्रहणमस्ति अथवा रूपव
तामपि त्रिवृत्करणं प्रदर्शनार्थमेव मन्यते श्रुतिः यथा तु त्रिवृत्कृते त्रीणि रूपाणीत्येव सत्यं तथा पंचीकरणेपि समानो न्याय इत्यतः सर्वस्य सद्वि
कारस्य सतो विज्ञाने न सर्वमिदं विज्ञातं स्यात् सदेकमेवाद्वितीयं सत्यमिति सिद्धमेव भवति तदेकस्मिन्सति विज्ञाते सर्वमिदं विज्ञातं भवति च सूक्त
मेतद्धि स्म वै तद्विद्वांसः पूर्वे अतिक्रांता महाशाला महाश्रोत्रिया आहुः कस्मै वै किल किमुक्तवंत इत्याह न नोस्माकं कुले द्य इदानीं यथोक्तविज्ञा
नवतां कश्चन कश्चिदपि अश्रुतममतमविज्ञातमुदाहरिष्यतीति सर्वं विज्ञातमेवास्मत्कुलीनानां सद्विज्ञानवत्त्वादित्यभिप्रायः कथं सर्वं विज्ञातवंत
इत्याह एभ्यस्त्रिभ्यो रोहितादिरूपेभ्यस्त्रिवृत्कृतेभ्यो विज्ञातेभ्यः सर्वमप्यन्यच्छिष्टमेवमेवेति विदांचक्रुर्विज्ञातवंतो यस्मात्तस्मात्सर्वज्ञा एव स
द्विज्ञानात्ते आसुरित्यर्थः वैभ्यो विदांचक्रुरित्यस्मादिभ्यो दृष्टांतेभ्यो विज्ञातेभ्यः सर्वमप्यद्विदांचक्रुरित्येतत्कथं यदुन्यद्रूपेणासंदिह्यमानं मे
चककपोतादिरूपे रोहितमिव यदूदृह्यमानमभूत् तेषां सर्वं तद्ब्रह्मविदां तत्तेजसो रूपमिति विदांचक्रुः तथा यच्छुक्लमिवाभूत्गृह्यमाणं
तद्रूपं यत्कृष्णमिव गृह्यमाणं तदन्नस्येति विदांचक्रुरेवमेवात्यंतदुर्लक्ष्यं यदप्यविज्ञातमिवाशेषतोऽगृह्यमाणमभूत्तदप्येतासामेव ति
सृणां देवतानां समासः समुदाय इति विदांचक्रुरेवं तावद्बाह्यं वस्त्वग्न्यादिवद्विज्ञातं तथेदानीं यथा तु खलु हे सौम्येमास्तिस्रो दे
वताः पुरुषं प्राप्य शिरःपाण्यादिकार्यकरणसंघातलक्षणं प्राप्य पुरुषेणोपयुज्यमानास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि निगदतस्तुक्ता

169

छां० शं०
८४

170

अन्नमशितं भुक्तं त्रेधा विधीयते जाठरेणाग्निना पच्यमानं त्रिधा विभज्यते कथं तस्यान्नस्य त्रिधा विधीयमानस्य यः स्थविष्ठः स्थूलतमो धातुः स्थूलांशः तत्पुरीषं भवति यो मध्यमांशो धातुः रसादिक्रमेण परिणम्य मांसं भवति योऽणिष्ठोऽणुतमो धातुः स ऊर्ध्वं हृदयं प्राप्य सूक्ष्मासु हिताख्यासु नाडीष्वनुप्रविश्य वागादिकरणसंघातस्य स्थितिमुत्पादयन् मनो भवति मनोरूपेणापरिणमन् मनस उपचयं करोतीति ततश्चान्नोपचितत्वान्मनसो भौतिकत्वमेव न वैशेषिकतन्त्रोक्तलक्षणं नित्यं निरवयवं चेति

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः तेजोऽशितं त्रेधा विधीयते तस्य यः स्थवि

गृह्यते यदपि मनोऽस्य दैवं चक्षुरिति वक्ष्यति तदपि न नित्यत्वापेक्षया किं तर्हि सूक्ष्मव्यवहितविप्रकृष्टादिसर्वेन्द्रियविषयव्यापकत्वापेक्षया यच्चान्येन्द्रियविषयापेक्षया नित्यत्वं तदप्यापेक्षिकमेवेति वक्ष्यामः सदेकमेवाद्वितीयमिति श्रुतेः तथापः पीयमानास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं भवति योऽणिष्ठः स प्राणो भवति वक्ष्यति ह्यापोमयः प्राणो न पिबतो विच्छेत्स्यत इति तथा तेजोऽशितं तैलघृतादि भक्षितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः ॥

विधी १

छां०
८४

तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् तैलघृतादिभक्षणाद्धि वाग्विशदा भाषणे समर्था भवतीति प्रसिद्धं लोके यत एवमन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक् ननु केवलान्नभक्षिण आखुप्रभृतयो वाग्मिनः प्राणवन्तश्च तथा अम्मात्रभक्ष्याः सामुद्रा मीनमकरप्रभृतयो मनस्विनो वाग्मिनश्च तथा स्नेहपानामपि प्राणवत्त्वं मनस्वित्वं चानुमेयं यदि सन्ति तत्र कथमन्नमयं हि सोम्य मन इत्युच्यते नैष दोषः सर्वस्य त्रिवृत्कृतत्वात्सर्वत्र सर्वोपपत्तेः न ह्यत्रिवृत्कृतमन्नमश्नाति कश्चित् आपो वा

तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ५ ॥

१

अत्रिवृत्कृताः पीयन्ते तेजो वा अत्रिवृत्कृतमश्नाति कश्चिदित्यन्नादानामाखुप्रभृतीनां वाग्मित्वं प्राणवत्त्वं चेत्याद्यविरुद्धं इत्येवं प्रत्यायितः श्वेतकेतुराह भूय एव पुनरेव मा मां भगवानन्नमयं हि सोम्य मन इत्यादि विज्ञापयतु दृष्टान्तेन वागमयतु नाद्यापि ममास्मिन्नर्थे सम्यङ्निश्चयो जातो यस्मात्तेजोऽबन्नमयत्वेनाविशिष्टे देहे एकस्मिन्नुपयुज्यमानान्यप्तेजांसि स्नेहभक्षाणाम् अणिष्ठधातुरूपेण मनः प्राणं वाचमुपचिन्वन्तीत्यात्मनतिक्रमेणोज्ज दुर्विज्ञेयमित्यभिप्रायो भूय एव मा भगवान्विज्ञापयत्विति एवमुक्तवन्तं तथास्तु सोम्येति होवाच पिता शृणु अत्र दृष्टान्तं यथैत
तो दुपपद्यते यस्य घटसि ५ ॥

171

दध्नः सौम्य मथ्यमानस्य योऽणिमाऽणुभावः स ऊर्ध्वः समुदीषति संभूयोर्ध्वं नवनीतभावेन गच्छति तत्सर्पिर्भवति यथायं दृष्टांतः एवमेव खलु सौम्यान्नस्यौदनादेरश्यमानस्य भुज्यमानस्यौदर्येणाग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति मनोवयवैः सह संभूय मन उपचितं भवतीत्यर्थः अपां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवतीत्येवमेव खलु सो

मानस्य

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवत्यपां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति तेजसः सोम्याऽश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवत्यन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ६॥

म्य तेजसोऽश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति युक्तमेव यथोक्तमिति अभिप्रायः अतः सर्वमेवं मनस्त्वन्नमयमित्यत्र नैकांतेन मम निश्चयो जातो भूय एव मा मां भगवान् मनसोऽन्नमयत्वं दृष्टांतेन विज्ञापयत्विति तथा सोम्येति होवाच ६॥ ७ ॥श्रीरामः परमात्मने श्रीरामः॥

अन्नस्य भुक्तस्य योऽणिष्ठो धातुः स मनसि शक्तिमधात्स अन्नोपचिता मनसः शक्तिः षोडशधा प्रविभज्य पुरुषस्य कलात्वेन निर्दिदिक्षिता तया मनस्यन्नोपचितया शक्त्या षोडशधा प्रविभक्तया संयुक्तस्तद्वान्कार्यकरणसंघातलक्षणो जीवविशिष्टः पुरुषः षोडशकल उच्यते यस्यां सत्यां द्रष्टा श्रोता मंता बोद्धा कर्ता विज्ञाता सर्वक्रियासमर्थः पुरुषो भवति हीयमानायां च तस्यां सामर्थ्यहानिः वक्ष्यति चाथान्नस्यायद्रष्टेत्यादि सर्वस्य कार्यकरणसंघातस्य सामर्थ्यं मनःकृतमेव मानसेन हि बलेन संपन्ना बलिनो दृश्यंते लोके ध्यानाहाराश्च के

षोडशकलः सोम्य पुरुषः पंचदशाहानि माऽशीः काममपः पिबापोमयः प्राणो नापिबतो विच्छेत्स्यत इति स ह पंचदशाहानि नाशाथ हैनमुपससाद ॥

चित् अन्नस्य सर्वोऽन्नकलात्मकत्वं मानसं वीर्यं षोडशकलायस्य पुरुषस्य सोऽयं षोडशकलः पुरुष एतच्चेत्प्रत्यक्षीकर्तुमिच्छसि तर्हि पंचदशसंख्याकान्यहानि माऽशीरशनं मा कार्षीः काममपः पिबतोऽपि वयस्मात्तन्न पिबतोऽपस्ते प्राणो विच्छेत्स्यते विच्छेदमापत्स्यते यस्मादापोमयोऽब्विकारः प्राणो न स्ववोयामनहि कार्यस्वकारणोपष्टंभमंतरेणाविच्छिद्यमानं स्थातुमुत्सहते स हैवं श्रुत्वा मनसोऽन्नमयत्वं प्रत्यक्षीकर्तुमिच्छन्पंचदशाहानि नाशाशनं न कृतवानथ षोडशेऽहनि राजं पितरमुपससादोपगतवानुपगम्य चोवाच किं [illegible]

छां॰ उ॰
८६

ऋचः सोम्य यजूंषि सामान्यधीयेत्येवमुक्तः पित्राह न वै मामस्तानि प्रतिभांति किं मम मनसि न दृश्यंते सर्थ्यः हे भो भगवन्नित्येवमुक्तवंतं पिता म
त्व अस्णुत त्त्रकारणं येन तानि रूणद्दीनिन प्रतिभांतीति तं होवाच यथा लोके हे सोम्य महतो महत्त्वपरिमाणस्याभ्याहितस्योपचितस्य
इंधनैरग्नेरेकोंगारः खद्योतमात्रः खद्योतपरिमाणः शांतस्य परिशिष्टोऽवशिष्टः स्यात्‌ भवेत्तेनांगारेणाततोपि तत्परिमाणाद्दीष ।

किं व्व ... ऽध्यृचः सोम्य यजूंषि सामानीति स होवाच न वै मा प्रतिभांति भो इति तं होवाच यथा सोम्य महतो
अभ्याहितस्यैकोंगारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोपि न बहु दहेदेवं सोम्य ते षोडशानां कलानामेकाक
लातिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति स हाशाथ हैनमुपससाद तं ह
यत्किंच पप्रच्छ सर्वं ह प्रतिपेदे तं होवाच ॥ व

दपि न बहु दहेदेवमेव खलु सोम्य ते तवान्नेनोपचितानां षोडशानां कलानामेकाकलाऽवयवोतिशिष्टावशिष्टा वशिष्टा स्यात्तया त्वं
खद्योतमात्रांगारतुल्यया एतर्हीदानीं वेदान्नानुभवसि न प्रतिपद्यसे श्रुत्वा चाथेमम माथाशेषं विज्ञास्यसि अशान मे त्वं नावत्तस ह तथै
वशीभुक्तवान् अशनानंतरं हैनं पितरं शुश्रूषुरुपससाद तं होपगतं पुत्रं यत्किंच ग्रंथतो ह पप्रच्छ ग्रंथरूपं समर्थं ज्ञातं वा पितास श्वेतकेतुः

छां॰
८६

सर्वं ह तत्प्रतिपेदे ऋग्याद्यर्थतो ग्रंथतश्च तं होवाच पुनः पिता यथा सोम्य महतो भ्याहितस्येत्यादि समानमेकमंगारं शांतस्याग्नेः खद्योतमा
त्रं परिशिष्टं तं तृणैरुपसमाधाय प्रज्वालयेद्वृद्धिं येत तेनेद्धेनांगारेण ततोपि पूर्वपरिमाणात्त बहु दहेत्तथा वै सोम्या नकलानां सा म
र्थ्यरूपाणामेकाकलातिशिष्टाभूदिति शिष्टासीत्पंचदशाहान्यभुक्तवतः के केनाहाराके काकलाचं द्रमस इवापरपक्षे क्षीणासाति
शिष्टाकलात बान्नेन भुक्तेनोपसमाहिता ... वर्द्धितोपाधिनाप्राज्वालीत्तदैर्घ्यं प्रांदसंप्रज्वलिता वर्द्धितेत्यर्थः तयावर्द्धि
तयेतर्हि इदानीं वेदाननुभवसि उपलभसे एवं व्याव... मन्नमयं हि सोम्य मन आपोमयः प्राण स्त्ह्येमि तु पसंहरति अन्नमयं हि सोम्य मन इत्यादि यथे
प

यथा सोम्य महतोभ्याहितस्यैकमंगारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्राज्वलयेत्तेन ततोपि बहु दहेदे
वं सोम्य ते षोडशानां कलानामेका कलातिशिष्टाभूत्सान्नेनोपसमाहिता प्राज्वाली त्तयैतर्हि वेदाननुभवस्यन्नमयं
हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ७ ॥

प॰ ८

एवं मनसोन्नमयत्वं न वसिद्धं तथा यो मयः प्राणस्तेजोमयी वागिति तदपि सिद्धमेवेति पुनरभिप्रायः तदेतद्धास्य पितुरुक्तं मन आदीनामन्नम
यत्वं विजज्ञौ विज्ञानवान् श्वेतकेतुः द्विरभ्यासः प्रकरणसमाप्त्यर्थः ७ यस्मिन्मनसि जीवो नामनानुप्रविष्टापरा देवता अदर्श
इव पुरुषः प्रतिबिंबेन जलादिष्विव सूर्यादयः प्रतिबिंबैस्तन्मनोन्नमयं तेजोमयोभ्यां वाक् प्राणाभ्यां संगतं अधिगतं यन्मयो यत्स्य अन्नमया
जीवो मनन श्रवणादि व्यवहारायकल्पते तदुपरमे च स्वं देवतारूपमेव ... प्रतिपद्यते तदुक्तं श्रुत्यंतरे ध्यायतीव ॥
दर्शन

स

प्राज्वाली
(प) दितिपा
ठांतरंत
दान्नेनो
समाहिता
स्वयंप्रज्वा
लितेत्यर्थः ८

176

छां०शां०
८७

लेलापतौ सधीः स्वप्नो भूत्वा इमं लोकमतिक्रामति सवा अयमात्मा ब्रह्म विज्ञानमयो मनोमय इत्यादि स्वप्ने न शरीराभिमानरहितः प्राणैरेव प्राणो नाम भवति
स्यादितस्यास्यान्नस्य स्य मनश्चाख्यां गतस्य मनउपशमद्वारेणाइंद्रियविषयेभ्योनिवृत्तस्योपरस्तं देवतायां स्वात्मभूतायां परदेवतायां तत्पुत्राया चिख्या
सु: उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाचोक्तवान् स्वप्नान्तं स्वप्नमध्यं स्वप्न इति दर्शनवृत्तेः स्वप्नस्य आख्यातस्य मध्यं स्वप्नान्तं सुषुप्तमित्येतत्
अथवा स्वप्नान्तं स्वप्नसतत्त्वमित्यर्थः तत्राप्यर्थात् सुषुप्तमेव भवति स्वपीतो भवतीति वचनात् तन्नत्यन्त सुषुप्तान्तं स्वपितीति जीवस्यैक्षतिवृत्तस्य वि

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम ॥

दः तत्र स्यादर्शोपनयने पुरुषप्रतिबिंबं आदर्शगतो यथा स्वयमेव पुरुषस्तत्पीतो भवति एवं मनआद्युपरमे चैतन्यप्रतिबिंबरूपेण जीवेनात्मना
मनसि प्रविष्टा नामरूपव्याकरणाय परा देवता सा स्वयमेवात्मानं प्रतिपद्यते जीवरूपतां मनआख्यां हित्वा अतः सुषुप्ता वस्थां तत्र शब्दवाच्यस्य व
गम्यते यत्र तु सुप्तः स्वप्नान्पश्यति तत्र स्वप्ने दर्शनं सुखदुःखसंयुक्तमिति पुण्यापुण्यपकर्म पुण्यापुण्ययोर्हि सुखदुःखारंभकत्वं प्रसिद्धं पुण्यापु
ण्ययोश्चाविद्याकामोपष्टंभेनैव सुखदुःखतद्दर्शनकार्यारंभकत्वमुपपद्यते नान्यथेत्यविद्याकामकर्मभिः संसारहेतुभिः संयुक्त एव स्वप्नद
ति न स्वपितो भवति अन्यागंतुपुण्येनान्यागन्तमायनतीरोहितः हम्सकीनशोकान्तलस्य भवति तद्धात्र स्येन तद् ॥

एव तिष्ठं दाराष्ट परमआत्मन दहस्यादिश्रुतिभ्यः सुषुप्त एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामीत्याह स्वप्नान्तं मे मम निगदतो हे सोम्य
विजानीहि विस्पष्टमवधारयेत्यर्थः कदा स्वप्नान्तो भवतीत्युच्यते यत्र यस्मिन्काले एतन्नाम भवति पुरुषस्य स्वपितीति प्रसिद्धं लोके स्वपितीति गौ
णं चेदं नाम इत्याह यदा स्वपितीत्युच्यते पुरुषस्तदा तस्मिन्काले सता सच्छब्दवाच्यया प्रकृतया देवतया संपन्नो भवति संगत एकीभूतो भवति मनसि प्र
विष्टः मनआदिसंसर्गकृतं जीवरूपं परित्यज्य स्वं सद्रूपं यत् परमार्थसत्यमपीतोऽपिगतो भवति अतस्तस्मात्स्वपितीत्येनमाचक्षते लौकिकाः स्वमा
त्मानं हि यस्मादपीतो भवति गुणनामप्रसिद्धेरपि स्वात्मप्राप्तिर्गम्यत इत्यभिप्रायः कथं पुनर्लौकिकानां प्रसिद्धं स्वात्मसंपत्तिर्जीव एतत्प्रसिद्धमिति तो दू

सतासौम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति
स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वा ॥

वत्वात्स्वापस्येत्याह जागरिते हि पुण्यापुण्यनिमित्तसुखदुःखाद्यनेकायासानुभवात् श्रान्तो भवति तत्तश्चायतनानां करणानां नानाने कव्या
पारनिमित्तग्लानानां स्वव्यापारेभ्य उपरमो भवति श्रुतेश्च श्राम्यति वाक् श्राम्यति चक्षुरित्येवमादि तथा गृहीता वाक् गृहीतं चक्षुर्गृहीतं श्रो
त्रं गृहीतं मन इत्येवमादीनि करणानि प्राणग्रस्तानि प्राणएको श्रान्तो देहे कुलाये यो जागर्तितदा जीवः श्रमापनुत्तये स्वं देवतारूपमा
त्मानं प्रतिपद्यते नान्यत्र स्वरूपावस्थानात् श्रमापनोदः स्यादिति युक्ता प्रसिद्धिः लौकिकानां स्वं ह्यपीतो भवतीति दृश्यते हि लोके ज्वरादिरोग
स्तानां तद्विनिर्मोके स्वात्मावस्थानां श्रमपनोदं हि हा हायेत्यादि तद्युक्तं न यथा श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः इत्यादि श्रुतेश्च तत्रायं दृ
८१

सय
रामं०
८०
177

छां०भा०

शकुनिः पक्षी शकुनिघातकस्य हस्तगतेन सूत्रेण प्रबद्धः पाशितो दिशं दिशं बंधनमोक्षार्थी सन् प्रतिदिशं पतित्वाऽन्यत्र बंधनादायतन
माश्रयं विश्रमणमलब्ध्वा प्राप्य स बंधनमेवोपश्रयते एवमेव यथायं दृष्टांतः खलु हे सोम्य तन्मनस्तत्प्रकृतं षोडशकलमन्नोपचितं
मनो निर्धारितं नत प्रतिष्ठस्तत्स्यात्तदुपलक्षितो जीवस्तन्मन इति निर्दिश्यते मं चाप्नोशनवत्सम्मनः आख्योपाधिर्जीवोऽविद्याकामकर्मोप
दिष्टां दिशं सुखदुःखादिलक्षणां जाग्रत्स्वप्नयोः पतित्वा गत्वानुभूयेत्यर्थः अन्यत्र सदाख्यात्स्वात्मन आयतनं विश्रमणस्थानमलब्ध्वा प्रा
णमेव प्राणेन सर्वकार्यकरणाश्रयेणोपलक्षिता प्राण इत्युच्यते सदाख्या परा देवता प्राणस्य प्राणः प्राणशरीरो भारूप इत्यादिश्रुतेः अतस्तं

तित्वाऽन्यत्रायतनमलब्ध्वा बंधनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतन
मलब्ध्वा प्राणमेवोपश्रयते प्राणबंधनं हि सोम्य मन इत्यशनापिपासे मे सोम्य विजानीहीति ॥

देवतां प्राणं प्राणाख्यामेवोपश्रयते प्राणो बंधनं यस्य मनसस्तत्प्राणबंधनं हि यस्मात्सोम्य मनः प्राणोपलक्षित देवताश्रयं मन इति मन
दुपलक्षितो जीव इत्येवं स्वपिति नाम प्रसिद्धं द्वारेणायं जीवस्य सत्स्वरूपं जगतो मूलं तत्पुत्रस्य दर्शयित्वाऽन्नादिकार्यकारणपरंपरया
पि जगतो मूलं सद्दिदर्शयिषुरशनापिपासे अशितुमिच्छा अशनाय ओ येन पातुमिच्छा पिपासा ते अशनापिपासे अशनापिपासयोः सन
त्वं विजानीहीत्येतत्तत्र यस्मिन्काल एतन्नाम पुरुषो भवति किंनिमित्तमिति दर्शयिषुस्त्वाशितुमिच्छतीति तदा तस्य पुरुषस्य किंनिमित्तं नाम भ
वतीत्याह यत्रैतत्पुरुषणाशितमन्नं कठिनं पीतान्नापोन ॥

यं नेद्रवीकृत्य रसादिभावेन परिणमयंति तदा पुरुषोऽन्नं जीर्यतीति अथ भवत्यस्य नामाशिशिषतीति गौणं जीर्यति हि अशितुमिच्छतीति सर्वो जनस्तत्
त्रापामशितमेतत्ता दशनाया इति नाम प्रसिद्धमित्येतस्मिन्नर्थे यथा गोनायो गां नयतीति गोनाय इत्युच्यते गोपालः तथाश्वानयतीत्यश्वना
योऽश्वपाल इत्युच्यते पुरुषनायः पुरुषान्नयतीति राजा सेनापतिर्वा रावं तत्तदाप आचक्षते लौकिकाः अशनायेति विसर्जनीयलोपेन तत्रैवं
सत्यद्भिरसादिभावेन नीते नान्नेन निष्पादितमिदं शरीरं वटकणिकानामिवाङ्कुरं उत्पतितं उद्भूतमिममङ्कुरं कार्यं शरीराख्यं वटा
दिशुङ्गवदुत्पतितं हे सोम्य विजानीहि किं तत्र विज्ञेयमित्युच्यते इदं शुङ्गवत्कार्यत्वाच्छरीरं नामूलं मूलरहितं न भविष्यतीत्युक्त आह

तत्रैतत्पुरुषो शिशिषति नामाप एव तदशितं नयंते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचाष्ट
तेऽशनायेति तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीति तस्य क्व मूलं स्यादन्य
त्रान्नादेवमेव ॥

श्वेतकेतुरेवं समूलमेवमिदं शरीरं वटादिशुङ्गवत् तस्यास्य शरीरस्य क्व मूलं स्यात्भवेदित्येवं पृष्टः आह पिता तस्य क्व मूलं स्यादन्य
त्रान्नात् अन्नं मूलमित्यभिप्रायः कथमशितं ह्यन्नमद्भिर्द्रवीभूतं जाठरेणाग्निना पच्यमानं परं रसादिभावेन परिणमते रसाच्छोणितं शो
णितान्मांसं मांसान्मेदः मेदसोऽस्थीन्यस्थिभ्यो मज्जा मज्जायाः शुक्रं तथा योषिद्भुक्तं चान्नं रसादिक्रमेणैव परिणतं लोहितं भवति ताभ्यां
शुक्रशोणिताभ्यामन्नकार्याभ्यां संयुक्ताभ्यामन्नेनैवं प्रत्यहं भुज्यमानेनापूर्यमाणाभ्यां कुड्यमिव मृत्पिण्डैः प्रत्यहमुपचीयमानोऽन्नमू
लो देहः शुङ्गः पारिणिः पन्न इत्यर्थः यत्तु देहशुङ्गस्य मूलमन्नं विहितं तदपि देहवद्विनाशोत्पत्तिमत्त्वात्कस्माच्चिन्मूलाद्भवत्यङ्कुरा

द्भ्यः शुंगेनाद्भिर्मूलं एवमेव खलु सोम्यानेन शुंगेन कार्येणान्नेनापो मूलमन्नस्य शुंगस्यान्विच्छ प्रतिपद्यस्व अपामपि विनाशोत्पत्तिमत्वात् शुं
गत्वात् शुंगत्वमेवेति अद्भिः सोम्य शुंगेन कार्येण णा कारणं तेजो मूलमन्विच्छ तेजसोऽपि विनाशोत्पत्तिमत्वात् शुंगत्वमिति तेजसा सोम्य
शुंगेन सन्मूलमेवाद्वितीयं परमार्थसत्यं यस्मिन् सर्वमिदं वाचारंभणं विकारो नामधेयं अनृतं रज्ज्वामिव सर्पादिविकल्पजातमध्यस्त
मविद्यया तदस्य जगतो मूलमतः सन्मूलाः सत्कारणाः सोम्येमाः प्रजाः स्थावरजंगमलक्षणाः सर्वाः न केवलं सन्मूला एव इदानीमपि स्थि
तिकाले सदायतनाः सदाश्रया एव नहि मृदमनाश्रित्य घटादेः सत्वं स्थितिर्वास्ति अतो मृद्वत् सदायतनं यासां प्रजानां ताः सन्मूलत्वात् सदायतनाः

खलु सोम्यानेन शुंगेनापो मूलमन्विच्छाद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ स
न्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते ४॥

प्रजाः अन्ते च सत्प्रतिष्ठाः सदेव प्रतिष्ठानं समाप्तिरवसानं परिशेषो यासां ताः सत्प्रतिष्ठाः अथेदानीमप्शुंगद्वारेण सतो मूलस्यानुगमः कार्य
इत्याह यत्र यस्मिन् काले एतन्नाम पिपासति पातुमिच्छतीति पुरुषो भवति अशिशिषतीतिवदिदमपि गौणमेव नाम भवति द्रवीकृतस्याशितस्या
न्नस्य नेत्र्य आपः अन्नशुंगं देहं क्लेदयन्त्यः शिथिलीकुर्युः अब्बाहुल्यात् यदि तेजसा न शोष्यन्ते अतिनितरां च तेजसा शोष्यमाणास्वप्सु देहभा
वेन परिणममानासु पातुमिच्छा पुरुषस्य जायते तदा पुरुषः पिपासति नाम तदेतदाह तेज एव तत्पीतमबादि शोषयद्देहगत
लोहितप्राणभावेन नयते यच्छोषयति तद्यथा गोनाय इत्यादि समानमेवं तत्तेज आचष्टे लोक उदन्येति तत्र मुद्रकं न॥

देहश्शुंगस्य ४

यतीत्युदन्यं उदन्येति छां आपि पूर्ववद्यामप्येतदेव शरीराख्यं शुंगं नाभादि स्वेवमौनं अन्यत्र सामर्थ्यात् तेजसोप्येतदेव शुंगं अतो
प्शुंगेन देहेनापो मूलं गम्यते अद्भिः शुंगेन तेजो मूलं गम्यते तेजसा शुंगेन सन्मूलं गम्यते पूर्ववदेवं हि तेजोबलमयस्य शुंगस्य वाचारंभ
णमात्रस्याप्यादिपरंपरया परमार्थसत्यं सन्मूलमभयमसत्रासं निरायासं सन्मूलं अन्विच्छेति पुत्रं गमयित्वा अशिशिषति पिपासतीति नामप्र
सिद्धिद्वारेण यदन्यदिहास्मिन् प्रकरणे तेजोबन्नानां पुरुषेणोपयुज्यमानानां कार्यकरणसंघातस्य स्वजात्यसांकर्येणोपचयकरत्वं वक्त
व्यं प्राप्तं तदुक्तमेव द्रष्टव्यमिति पूर्वोक्तं व्यपदिशति यथा खलु येन प्रकारेण मास्तेजोबलाख्यास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकै

नां

तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुंगमुत्पतितं सोम्य विजानीहि नेदममू
लं भविष्यतीति तस्य क्व मूलं स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ
सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकै
का भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः॥

काभवति तदुक्तं पुरस्तादेव भवति अन्नमशितं त्रेधा विधीयत इति तत्रैवोक्तं अन्नादीनामशितानां ये मध्यमा धातवस्ते सप्तधातुकं शरी
रमुपचिन्वन्ती सूक्ष्मं मनः संभवतीत्याहि तं भवति मनः आपवति ये स्थविष्ठा धातवो मनः प्राणौ वाचं देहस्यान्तःकरणसंघातमुपचिन्वन्ती
ति चोक्तं तन्न नो भवति स प्राणो भवति सा वाग्भवति सोयं प्राणकरणसंघातो देहे शीर्णे देहान्तरं जीवाधिष्ठितो येन क्रमेण पूर्वदे

स

हात् प्रच्युतो गच्छति तदाह अस्य हे सोम्य पुरुषस्य प्रयतः म्रियमाणस्य वाक् मनसि संपद्यते मनस्युपसंह्रियते अथ तदाहुर्नेत
योन वदतीति मनः पूर्वको हि वाग्व्यापारः यन्मनसा ध्यायति तद्वाचा वदतीति श्रुतेः वाग्युपसंहृतायां मनसि मनो मननव्यापा

छां० शां०
८०

नं भवतीति तदा सुषुप्तकालश्च पार्श्वस्थानजानंतीमा जुः प्रमाणाच्चतरोर्ध्वं घ्राणसौंरेखामनुपहतवाक्यकरणः संवर्गविद्यायां दर्शनात् ह स्तपादादीन् विक्षिपन्नमस्थाना नानेति कूंतलनइ वौ मर्जेनन्त्रमेणात् उपसंहृतस्तेन न मिसं प्रपद्य तेन राहृद्गतयोनचलतीति वाचिकि त्संतो देहे मालभमानात् सां चोपलभमानादेहउ मोजीवतीति परार्थेस्थाणिंगं तेज उपसंहृियते तदा तेजः परस्यां देवतायां प्रशा म्यतीति देवं क्रमेणोपसंहृतेषु मूलं प्राप्ते च मनसि तत्सो जीवो पि सुषुप्तकालवन्मित्तोपसंहारादुपसंहियमाणः सन्सन्मिसं ध्विपूर्वकं चेदुपसंहियते न तदा सदेव संपद्य न पुनर्देहान्तराय सुषुप्तादिवोत्तिष्ठति यथा लोके समये देशवर्तमानः कथंचिद्दिवा भयं प्रा प्नम हृदनादितरखनान्मज्ञस्मादेव मूलात् सुषुप्तादिवो व्युत्थाय मत्वा पुनर्देहमाविशति जीवः स यः सत्ख्यः सत एष उक्तोऽणिमाणुभावोज

प्राणो प्राणात्तेजसि तेजः परस्यां देवतायां स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इ
ति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ८ ॥

गतो मूलमैतदात्म्यमेतत्सदात्मा यस्य सर्वस्य तदेतदात्मं तस्य भावो ऐतदात्म्यं एतेन सदाख्येनात्मना सर्वमिदं जगदात्मवत् नान्योऽस्त्यात्मा संसारी नान्योतोऽस्ति द्रष्टा नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ इत्यादिश्रुतेः येन चात्मनात्मवत्सर्वमिदं जगत् तदेव सदाख्यं कारणं सत्यं परमार्थसत् अतः स एवात्मा जगतः प्रत्यक्स्वरूपं तत्त्वं याथात्म्यमात्मशब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिशब्दवल्लिरूढत्वात् अ तस्तत्त्वमसीति हे श्वेतकेतो इत्येवं प्रत्यायितः पुत्र आह भूय एव मा भगवान् विज्ञापयतु यदुक्तं तत्संदिग्धं मम अहन्यहनि सर्वाः प्र जाः सुषुप्ते सत्संपद्यन्ते सत्संपद्य न विदुः सत्संपन्ना वयमिति ... इदं तेनांशं प्रापयतु ... इति एवमुक्तः तथा सोम्येति हो

182

यत्पृष्टस्तस्य हान्यहनि सत्संपद्य न विदुः सत्संपन्नाः स्म इति तत्कस्मादित्यत्र दृष्टांतं यथा लोके सौम्य मधुकृतः मधु कुर्वंतीति मधुकृतो मधुकरम क्षिकाः मधुनिस्तिष्ठन्ति निष्पादयंति तत्परा सन्तः कथं नानात्ययानां नानादिक्कानां वा वृक्षाणां रसान् समवहारं समाहृत्य समाहृत्य एकतामेक भावं मधुत्वेन रसान् गमयंति ते रसाः यथा मधुत्वेन एकतां गताः तत्र मधुनि विवेकं न लभन्ते कथं अमुष्याहं वृक्षस्य रसोऽस्मि पनसस्य वाऽहं रसोऽस्मीति च यथा हि लोके बहूनां चेतनानां विवेकलाभो भवति अमुष्याहं पुत्रोऽमुष्याहं नप्तास्मीति च लब्धविवेकाः संतो न संकीर्यंते न तथेहानेकप्रकाराणां रसानां मधुरां ... नैकतां गतानां मधुकरादिभावेन विवेको गम्यते ... यथा यं दृष्टांत एवमेव खलु सोम्येमाः सर्वाः प्रजाः अहरहर्निसत्तिसंपद्य सुषुप्तिकाले मरणप्रलययोश्च न विदुर्न विजानीयुः सति संपद्यामहे इति वा सम्पन्ना इति वा तस्मादेव

मधु

यथा सौम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयंति ते यथा तत्र न विवेकं लभंते अमु ष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति त इह व्या घ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंति तदाभवंति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ९

यतो मूलं ज्ञात्वैव सत्संपद्यंते तस्मादिह लोके यत्कर्मनिमित्तां यां यां जातिं प्रतिपन्ना आसुर्व्याघ्रादीनां व्याघ्रोऽहं सिंहोऽहमित्येवं तत्कर्मज्ञानवासनांकि ताः सन्तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवंति पुनः सत आगत्य व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा मशको वा दंशो वा य द्यत्पूर्वमिह लोके भवंति बभूवुरित्यर्थः तदेव पुनरागत्य भवंति युगसहस्रकोटयंतरिता अपि संसारिणो जंतोर्या पुरा भाविता वासना सा न नश्यती त्यर्थः ताः प्रजा यस्मिन्प्रविश्य पुनराविर्भवंति ये त्वितोऽन्ये सत्सत्यस्याभिसंधायामृतमात्मानं प्रविश्य नावर्तंते स य एषोऽणिमेत्यादि व्याख्यातं यथा लोके स्वकीये गृहे सुप्त उत्थाय ग्रामांतरं गतो जानाति स्वगृहादागतोऽस्मीति एवं सत आगतोऽस्मीति च जंतूनां कस्माद्विज्ञानं न भवतीति भूय एव मा भगवान्विज्ञापयत्वित्युक्तस्तथास्तु सोम्येति होवाच ९ ॥

183

छां० शां०
८१

अणुतत्र दृष्टांतं यथा सौम्येमा नद्यो गंगाद्याः पुरस्तात्पूर्वां दिशं प्रति प्राच्यः प्राग्गच्छंतः स्यंदंते स्रवंति पश्चात्प्रतीचीं दिशं प्रति सिंध्वाद्याः प्रतीच्यः
स्त्रं चंति ता गच्छंति प्रतीच्यः ताः समुद्रादंभोनिधेर्जलधरैराक्षिप्ताः पुनर्वृष्टिरूपेण पतिता गंगादिनदीरूपेण पुनः समुद्रमंभोनिधिमेवापियं
ति समुद्रा एव भवंति ता एवं न द्यो यथा तत्र समुद्रे समुद्रात्मना एकतां गता न विदुर्न विजानंति इयं गंगाहमस्मीयं यमुनाहमस्मीति च एवमे

त्र

व मासः सोम्य न द्यः पुरस्तात्प्राच्यः स्यंदंते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियंति स समुद्र एव भवंति ता यथा तत्र न विदुरि
यमहमस्मीयमहमस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिंहो
वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंति तदाभवंति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स
आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच १० ॥

वमेव खलु सोम्येमाः सर्वाः प्रजाः यस्मात्सति संपद्य न विदुस्तस्मात्सत आगम्य न विदुः सत आगच्छामहे आगता इति वा त इह व्याघ्रादयः
समाने अस्य दृष्टलोकेजले वीचीतरंगफेनबुद्बुदादयस्तदुच्छिन्नाः पुनस्तद्भावं गता विनष्टा इति नो वास्तुतत्कारणाभावं प्र०स हैगच्छं तेपिसुषु
प्तेमरणप्रलययोश्चन श्यंती त्येतत्तत्भयएव मा भगवान्विज्ञापयत्वुदृष्टांतेनेतं तथा सोम्येति होवाच १० ॥

सा०१

अणुरश्यां तमस्यमहे सौम्यस्य महतो नेकशाखादियुक्तस्य वृक्षस्य स यत्तःस्थितं वृक्षं निर्दशे यन्नाह यदि कश्चिदस्य मूलेऽभ्याहन्यात्परश्वा
दिना सकृन्नघातमात्रेण न शुष्यति जीवंभवति तदा तस्य रसः स्रवेत्तथा यो मध्येऽभ्याहन्यात् जीवंस्तथाग्रेऽभ्याहन्यात् जीवन्स्रवेत्तस ए
ष वृक्ष इदानीं जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति वनउदकं भौमांश्च रसान्निगिरन्मोदमानो हर्षं प्राप्नुवंस्तिष्ठति।
तस्य यदेकां शाखां वृक्षैकांशाहतां वा जीवो जहाति उपसंहरति शाखां प्रसृतं आत्मानं अथ सा शुष्यति वा जनः प्राणा कारणाप्रमानुप्र

त्र

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याह
न्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति तस्य यदेकां शा
खां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शु ॥

विष्टो हि जीव इति तदुपसंहारेणोपसंहियमाने जीवेन च प्राणायुक्तेन अशितं पीतं च रसतां गतं जीवत शरीरं वृक्षं वर्द्धयद्रसरूपेणा
जीवस्य सद्भावे लिंगं भवति अशितपीता भ्यां हि देहे जीवस्तिष्ठति ते चाशितपीते जीवकर्मानुसारिणी इति तस्यैकां गवै कल्मनिमित्तं क
र्मैयदा यस्थितं भवति तदा जीवस्तदेकां शाखां जहाति शाखायाश्चात्मानमुपसंहरति अथ तदा शाखा या शुष्यति जीवस्थिति निमित्तो
रसो जीवकर्माक्षिप्तो जीवोपसंहारे न तिष्ठति रसापगमेच ॥

शाखाशोषमुपैतितथासर्वंवृक्षमेवयदायंजहातितदासर्वोऽपिवृक्षःशुष्यति।वृक्षस्यरसस्रवणशोषणादिलिङ्गाज्जीववत्त्वंदृष्टा
न्तश्रुतेश्चेतनावत्त्वंस्थावराणामितिबौद्धकाणादमतमचेतनाःस्थावराइत्येतदसारमितिदर्शितंभवतिय थास्मिन्वृक्षदृष्टान्ते
दर्शितंजीवेनयुक्तोवृक्षोऽशुष्कोरसपानादियुक्तोजीवतीत्युच्यतेतद्वियोगेनत्रियतइत्युच्यतएवमेवखलुसोम्यविद्धीतिहोवाचजीवापेतं
वावजीववियुक्तंवावकिलेदंशरीरंम्रियतेनजीवोम्रियतइतिकार्यशेषंचसुप्तोत्थितस्यममेदंकार्यमपरिसमाप्तमितिस्मृत्वासमा

सोम्यविद्धीतिहोवाचजीवापेतंवावकिलेदंम्रियतेन
ष्यतिसंवेजहातिसर्वःशुष्यत्येवमेवखलुसोम्यविद्धीतिहोवाचजीवापेतंवावकिलेदंम्रियतेनजीवोम्रियतइति
जीवोम्रियतइतिसयएषोऽणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइति
भूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच॥ ११॥

पनदर्शनात्जातमात्राणांचजन्तूनांस्तन्याभिलाषभयादिदर्शनाच्चातीतजन्मान्तरानुभूतस्तनपानदुःखानुभवस्मृतिर्गम्यतेऽग्नि
होत्रादीनांचवैदिकानांकर्मणामर्थवत्वात्नजीवोम्रियतइतिसयएषोऽणिमेत्यादिसमानंकथंपुनरिदमत्यन्तस्थूलंपृथिव्यादिनाम
होत्रादीनांचवैदिकानांकर्मणामर्थवत्त्वात्... भूयएवमाभगवान्विज्ञापयत्वितितथासोम्येति
रूपवज्जगदत्यन्तसूक्ष्मात्सद्रूपात्नामरूपरहितात्सतोजायतइत्येतद्दृष्टान्तेनभूयएवमाभगवान्विज्ञापयत्वितितथासोम्येति

यद्येतत्प्रत्यक्षीकर्तुमिच्छसिअतोऽस्मात्महतोन्यग्रोधात्फलमेकमाहरेत्युक्तस्तथाचकारसःइदंभगवइत्युपहृतंफलमिदंदर्शितवन्तंप्रत्य
हफलंभिन्धीतिभिन्नमित्याहेतरस्तमाहपिताकिमत्रपश्यसीत्युक्तआहअण्व्यइवेमाधानाबीजानिपश्यामिभगवइतितासांधा
नानामेकांधानांअङ्गहेवत्सभिन्धीत्युक्तआहभिन्नाभगवइतियदिभिन्नाधानातस्यांभिन्नायांकिंपश्यसीत्युक्तआहनकिंचनपश्यामिभ
गवइतितंपुत्रंहोवाचवटधानायांभिन्नायांयंवटबीजाणिमानंहेसोम्यएतंनानिभालयसेनपश्यसितथाप्येतस्यवैकिलसोम्यएषम
हान्न्यग्रोधोबीजस्याणिम्नःस्थूलकार्यस्यदृश्यमानस्यकार्यभूतःशाखास्कन्धफलपलाशवान्तिष्ठतिउत्पन्नःसन्तिष्ठतीतिबोध्यः

न्यग्रोधफलमतआहरेतीदंभगवइतिभिन्धीतिभिन्नंभगवइतिकिमत्रपश्यसीत्यण्व्यइवेमाधानाभगवइत्यासामङ्गैकां
भिन्धीतिभिन्नाभगवइतिकिमत्रपश्यसीतिनकिंचनभगवइतितंहोवाचयंवैसोम्यैतमणिमानंननिभालयसएतस्य
वैसोम्यैषोऽणिम्नएवंमहान्न्यग्रोधस्तिष्ठतिश्रद्धत्स्वसोम्येतिसयएषोऽणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वम
सिश्वेतकेतोइतिभूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच १२॥

तथ्येऽङ्गतःश्रद्धत्स्वसोम्यसतएवाणिम्नःस्थूलंनामरूपादिमत्कार्यंजगदुत्पन्नमितियद्यपिन्याय।गमाभ्यांनिर्धारितोऽर्थस्तथैवेत्यव
गम्यतेतथाप्यत्यन्तसूक्ष्मेष्वर्थेषुबाह्यविषयासक्तमनसःस्वभावप्रवृत्तस्यासत्यांगुरुतरायांश्रद्धायांदुरवगमत्वंस्यादित्याहश्रद्ध
त्स्वेतिश्रद्धायांतुसत्यांमनसःसमाधानंबुभुत्सितेऽर्थेभवेत्ततश्चतदर्थावगतिरन्यत्रमनाश्रद्धबलिंद्रियादिश्रुतेश्चयद्यपिधार्ष्ट्यमितेति।
सत्सज्जगतोमूलंकस्मान्नोपलभ्यतइत्येतदृष्टान्तेनमांभगवान्भूयएवविज्ञापयत्वितितथासोम्येतिहोवाच १२॥

छां०उ०
९३

188

विद्यमानमपिवस्तुनोपलभ्यतेप्रकारान्तरेणतूपलभ्यतइतिअत्रदृष्टान्तंयदिचेममर्थंप्रत्यक्षीकर्तुमिच्छसिपिण्डरूपंलवण
मेतत्घटादावुदकेऽवधायप्रक्षिप्यअथमामांश्वःप्रातरुपसीदेथाउपगच्छेथाइतिसहपितोक्तमर्थंप्रत्यक्षीकर्तुमिच्छंस्तथाचकारतं
होवाचपरेद्युःप्रातःयल्लवणंदोषारात्रौउदकेऽवाधानिक्षिप्तवानसिहेअङ्गतदाहरेत्युक्तस्तल्लवणमाजिहीर्षुर्हकिलावमृश्य
उदकेनविवेदनविज्ञातवान्यथातल्लवणंविद्यमानमपिसदप्सुलीनंसंश्लिष्टमभूत्यथाविलीनंलवणंनवेदयापितश्चचक्षुषा स्पत

लवणमेतदुदकेऽवधायाथमाप्रातरुपसीदथाइतिसहतथाचकारतंहोवाचयद्दोषालवणमुदकेऽवाधाअङ्ग
तदाहरेतितद्धावमृश्यनविवेदयथाविलीनमेवाङ्गास्यान्तादाचामेतिकथमितिलवणमितिमध्यादाचामेति
कथमितिलवणमित्यन्तादाचामेतिकथमितिलवणमित्यभिप्रास्यैतदथमोपसीदथाइति॥

स्पर्शनेनचपिण्डरूपंलवणंअङ्गलवणंविद्यतएवाप्सुउपलभ्यतेचोपायान्तरेणेत्येतत्प्रत्यक्षीकर्तुमिच्छन्नाहांगास्योदकस्यान्ता पु
दुपरिभागात्गृह्याचामेतिइत्युक्तःपुत्रस्तथाकृतवन्तंउवाचकथमितिइतरआहलवणंस्वादुइतितथामध्यादुदकस्यगृहीत्वाचा राम०
मेतिकथमितिलवणमितितथाउदकस्यान्तादधोदेशात्गृहीत्वाचामेतिकथमितिलवणमितियद्येवंअभिप्रास्यपरित्यज्यैतदुद
कंअथमोपसीदथाइति॥

तद्धतथाचकारतल्लवणंपरित्यज्यपितुःसमीपमाजगामेत्यर्थःइदंवचनंब्रुवन्नित्लवणंतस्मिन्नेवोदकेयन्मयारात्रौक्षिप्तंतत्सर्वदावि
र्तसंवर्ततेविद्यमानमेवसम्यग्वर्ततेइत्येवमुक्तवन्तंहोवाचपितायथेदंलवणंदर्शनस्पर्शनाभ्यांपूर्वंगृहीतंपुनरुदकेविलीनंताभ्यांदर्श नस्य
नस्पर्शनाभ्यामगृह्यमाणमपिविद्यतएवउपायान्तरेणजिह्वयोपलभ्यमानत्वात्एवमेवात्रास्मिन्नेवतेजोबन्नादिकार्येशुङ्गेदेहेवावकि
लसत्याख्यंपदंरूपस्पर्शनादिभिःसन्तेजोबन्नादिशुङ्गकारणंवटबीजाणिमादिवत्विद्यमानमेवइन्द्रियैर्नोपलभसेननिभालयसे

189

तद्ध तथाचकारतंहोवाचात्रवावकिलसत्सौम्यननिभालयसेऽत्रैवकिलेतिसयएषो
ऽणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइतिभूयएवमाभगवान्विज्ञापयत्वितितथासौम्ये न
तिहोवाच॥१३॥

यथात्रैवोदकेदर्शनस्पर्शनाभ्यामनुपलभ्यमानंलवणंविद्यमानमेवजिह्वयोपलब्धवानसिएवमेवात्रैवकिलविद्यमानंसत्तेज
गन्मूलमुपायान्तरेणलवणमिवोपलप्स्यसेइतिवाक्यशेषःसयइत्यादिसमानंयद्येवंलवणमिवेन्द्रियैरनुपलभ्यमानमपिजगन्मू
लंसदुपायान्तरेणोपलब्धुंशक्यतेयदुपलम्भात्कृतार्थःस्याम्अनुपलम्भाच्चाकृतार्थःस्याम्अहंतदुपलब्धौकउपायइत्येततभूयए
वमाभगवान्विज्ञापयत्वितितथासौम्येतिहोवाच॥१३॥

छां०शं०
९४

१७०

यथा लोके हे सोम्य पुरुषं कंचित् गंधारेभ्यो जनपदेभ्योऽभिनद्धाक्षं बद्धचक्षुषमानीयापहृत्य तस्करस्तमभिनद्धाक्षमेव बद्धचक्षुषमे
व बद्धहस्तमरण्ये विजने गतजनेऽत्यंतविगतजने देशे विसृजेत् स तत्र दिग्भ्रमोपेतो यथा प्राङ्वा प्रागंचनः प्राङ्मुखो वा तथो
दङ्वाधरांङ्वा प्रत्यङ्वा प्रध्मायीत शब्दं कुर्यात् विक्रोशेत् अभिनद्धाक्षोऽहं गंधारेभ्यस्तस्करेणानीतोऽभिनद्धाक्ष एव विसृष्ट
इत्येवं विक्रोशतस्तस्य यथाभिनहनं यथा बंधनं प्रमुच्य मुक्त्वा कारुणिकः कश्चिदेतां दिशं उत्तरतो गंधारा एतां दिशं व्रजेति ब्रूयात् क

यथा सोम्य पुरुषं गंधारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाधराङ्वा प्रध्मायीता
भिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टस्तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गंधारा एतां दिशं व्रजेति स
ग्रामाद्ग्रामं पृच्छन्पंडितो मेधावी गंधारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमो
क्ष्येऽथ संपत्स्य इति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवा
न्विज्ञापयत्विति तथा सोम्येति होवाच ॥१४॥

ग्रो

स एवं कारुणिकेन बंधनान्मोक्षितो ग्रामाद्ग्रामांतरं पृच्छन् पंडित उपदेशवान् मेधावी परोपदिष्टग्रामप्रवेशमार्गो गंधारा
नेवोपसंपद्येत नेतरो मूढमतिर्दिगंतरदर्शनतृष्णो यथायं दृष्टांतो वर्णितः स्वविषयेभ्यो गंधारेभ्यः पुरुषस्तस्क
रैरभिनद्धाक्षोऽविवेको दिङ्मूढोऽशनायापिपासादिमान् व्याघ्रतस्कराद्यनेकभयानर्थव्रातयुतमरण्यं प्रवेशितो दुःखार्तो ॥

रा०म०
९४

विक्रोशन् बंधनेभ्यो मुमुक्षुस्तिष्ठति कथंचिदेव कारुणिकेन केनचिन्मोक्षितः स्वदेशान् गंधारानेवापन्नो निर्वृतः सुखी अभूदेवमेव सतो
जगदात्मनः स्वरूपात्तेजोबन्नादिमयं देहारण्यं वातपित्तकफरुधिरमेदोमांसास्थिमज्जाशुक्रकृमिमूत्रपुरीषवत् शीतोष्णाद्यनेकद्वंद्वदुःखव
च्चेदं मोहपटाभिनद्धाक्षो भार्यापुत्रमित्रबंधुपश्वादिदृष्टादृष्टानेकविषयतृष्णापाशितः पुण्यापुण्यादितस्करैः प्रवेशितोऽहममुष्य पुत्रो ममैते
बांधवाः सुख्यहं दुःखी मूढः पंडितो धार्मिको बंधुमान् जातो मृतो जीर्णः पापी पुत्रो मे मृतो धनं मे नष्टं हा हतोऽस्मि कथं जीविष्यामि का मे गतिः किं मे त्रा
णमित्येवमनेकशतसहस्रानर्थजालवान् विक्रोशन् कथंचिदेव पुण्यातिशयात् कथंचिदेव पुण्यातिशयात् परमकारुणिकं कंचित् ब्र
ह्मात्मविदं विमुक्तबंधनं ब्रह्मिष्ठं यदासादयति तेन च ब्रह्मविदा कारुण्यात् दर्शितसंसारविषयदोषदर्शनमार्गो विरक्तः संसारविषयेभ्यो
नासि त्वं संसार्यमुष्य पुत्रत्वादिधर्मवान् किं तर्हि सत् यत्तत्त्वमसीत्यविद्यामोहपटाभिनहनान्मोक्षितो गंधारपुरुषवच्च स्वं सदात्मानमुपसंप
द्य सुखी निर्वृतः स्यादित्येतमेवार्थमाहाचार्यवान्पुरुषो वेदेति तस्य चैवमाचार्यवतो मुक्ताविद्याभिनहनस्य तावदेव तावानेव कालः
चिरं क्षेपः सदात्मस्वरूपसंपत्तेरिति वाक्यशेषः कियान् कालश्चिरमित्यपेक्षायामाह यावन्न विमोक्ष्ये न विमोक्षत इत्येतत्पुरुषव्यत्ययेन सामर्थ्यात् येन
कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयात् देहपातो यावदित्यर्थः अथ तदैव सत् संपत्स्ये संपत्स्यत इति पूर्ववत् न हि देहमोक्षस्य सत्संपत्तेश्च
कालभेदोऽस्ति येनाथ शब्द आनंतर्यार्थः स्यात् ननु यथा सद्विज्ञानानंतरमेव देहपातः सत्संपत्तिश्च न भवति कर्मशेषवशात् तथाऽप्र
वृत्तफलानि प्राक् ज्ञानोत्पत्तेर्जन्मांतरसंचितानि अपि कर्माणि संतीति तत्फलोपभोगार्थं पतितेऽस्मिन् शरीरे शरीरांतरमारब्धव्यं उत्पन्ने च
ज्ञाने यावज्जीवं विहितानि प्रतिषिद्धानि वा कर्माणि करोत्येवेति तत्फलोपभोगार्थं चावश्यं शरीरांतरमारब्धव्यं ततश्च कर्माणि ततः

ह

पु
ह

१७१

र

सु

शरीरमिति ज्ञानानर्थक्यं कर्मणां फलवत्त्वात् । अथ ज्ञानवतः क्षीयन्ते कर्माणि तदा ज्ञानप्राप्तिसमकालमेव ज्ञानस्य सत्संपत्तिहेतु-
त्वात् मोक्षः स्यादिति शरीरपातः स्यात् तथा चाचार्याभावः स्यादाचार्यवान्पुरुषो वेद इति अनुपपत्तिः ज्ञानान्मोक्षाभावप्रसंगश्च रे शान-
र प्राक्षुपापज्ञानवदस्मैकान्तिकफलत्वं वाज्ञानस्य न कर्मणां प्रवृत्ताप्रवृत्तफलत्वविशेषोपपत्तेः यदुक्तमप्रवृत्तफलानां कर्मणां ध्रुवफल-
त्वात् ब्रह्मविदः शरीरे पतिते शरीरान्तरमारब्धव्यमप्रवृत्तकर्मणां फलोपभोगार्थमिति तन्न सत् विदुषस्तस्य तावदेव चिरमिति श्रुतेः प्रामाण्या-
न्न नु पुण्यो वै पुण्येन कर्मणा भवतीत्यादिश्रुतेरपि प्रामाण्यमेव सत्यमेवं तथापि प्रवृत्तफलानामप्रवृत्तफलानां च कर्मणां विशेषो-
ऽस्ति कथं यानि प्रवृत्तफलानि कर्माणि यैर्विद्वच्छरीरमारब्धं तेषामुपभोगेनैव क्षयो यथारब्धवेगस्य लक्ष्यमुक्तेष्वादेर्वेगक्षयादे-
व स्थितिर्न तु लक्ष्यवेधसमकालमेव प्रयोजनं नास्तीति निवर्तते अन्यानि त्वप्रवृत्तफलानीह प्राग्ज्ञानोत्पत्तेरूर्ध्वं च कृतानि वा क्रियमा-
णानि चातीतजन्मान्तरकृतानि वाप्रवृत्तफलानि ज्ञानेन दह्यन्ते प्रायश्चित्तेनेव ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति श्रुतेः क्षीय-
न्ते चास्य कर्माणीति चाथर्वणे अतो ब्रह्मविदो जीवितादिप्रयोजनाभावेऽपि प्रवृत्तफलानां कर्मणामवश्यमेव फलोपभोगः स्यादिति युक्तैव त-
स्य तावदेव चिरमिति युक्तमेवोक्तमिति यथोक्तदोषचोदनानुपपत्तिः ज्ञानोत्पत्तेरूर्ध्वं च ब्रह्मविदः कर्माभावमेवावोचाम ब्रह्मसंस्थोऽमृतत्वमे-
तीत्यत्र तच्च न विस्मर्तुमर्हसि एवमुक्तार्थ आचार्यवान्वेद येन क्रमेणास्मात्संपद्यते तं क्रमं दृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति
तथा सोम्येति होवाच ॥१४॥

वदे

पुरुषं हे सोम्य उपतापिनं ज्वरादिपतापवन्तं ज्ञातयो बान्धवाः परिवार्योपासते मुमूर्षुं जानासि मां तव पितरं पुत्रं भ्रातरं चेति पृच्छन्तः तस्य मुमू-
र्षोर्यावन्न वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामित्येतदुक्तार्थं संसारिणो यो मरणक्रमः स एवायं विदु-
षोऽपि सत्संपत्तिक्रम इत्येतदाह परस्यां देवतायां तेजसि संपन्ने अथ न जानाति अविद्वांस्तु सत उत्थाय प्राग्भावितं व्याघ्रादिभावं देवमनुष्या-
दिभावं वा विशति विद्वांस्तु शास्त्राचार्योपदेशजनितज्ञानप्रदीपप्रकाशितं सत् ब्रह्मात्मानं प्रविश्य नावर्तत इत्येष संपत्तिक्रमः अन्ये तु मूर्द्ध-

ग्गा

य

पुरुषं सोम्योपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि संपद्यते मनः प्राणे प्राण-
स्तेजसि तेजः परस्यां देवतायां तावज्जानाति अथ यदास्य वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जा-
नाति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा
सोम्येति होवाच ॥१५॥

९७
मि

न्यया नाड्योत्क्रम्यादित्यादिद्वारेण सद्गच्छतीत्याहुः तदसत् देशकालनिमित्तफलाभिसंधानेन गमनदर्शनात् न च सदात्मैकत्वदर्शिनः
सत्याभिसंधस्य देशकालनिमित्तफलाद्यनृताभिसंधिरुपपद्यते विरोधात् अविद्याकामकर्मणां च गमननिमित्तानां सद्विज्ञानहुताश-
नविप्लुष्टत्वात् गमनानुपपत्तिरेव पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामा इत्याद्याथर्वणे नद्यः समुद्र इव दृष्टान्तश्रुतेश्च
संपद्यमाने यदि समानं यदि मरिष्यतः मुमुक्षोस्तत्र तुल्या सत्संपत्तिस्तत्र विद्वान्सत्संपन्नो नावर्तते अविद्वांस्त्वावर्तते चाविद्वानिति एतत्कारणं दृ-
ष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥१५॥

अथाप्यथासौ पुरुषं चौरकर्मणि संदिह्यमानं निगृह्य परीक्षणाय च उतापि हस्तगृहीतं बद्धहस्तमानयन्ति राजपुरुषाः किं कृतवा
नयमिति पृष्टाश्चाहुः अपहार्षीदनेनास्य धनं किमयमपहरणमात्रेण बंधनमर्हति अन्यथा दत्तेऽपि धने बंधनप्रसंगादित्युक्ताः पुनराहुः स्ते
यमकार्षीच्चौर्येण धनमपहार्षीदिति तेष्वेवं वदत्सु इतरोऽपह्नुते नाहं कर्तेति चाहुः संदिह्यमानं स्तेयमकार्षीस्त्वमस्य धनस्येति
तस्मिंश्चापह्नुवाने आहुः परशुमस्मै तपतेति शोधयत्वात्मानमिति स यदि तस्य स्तेयस्य कर्ता भवति बहिश्चापह्नुते स एवंभूतस्तत ए

पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवा
नृतमात्मानं कुरुते सोऽनृताभिसंधोऽनृतेनात्मानमंतर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यतेऽथ यदि तस्या
कर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसंधः सत्येनात्मानमंतर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ
मुच्यते स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति
विजज्ञाविति १६ इति छांदोग्योपनिषद्ब्राह्मणेऽष्टमः प्रपाठकः॥

वानृतमन्यथाभूतं सन्तमन्यथात्मानं कुरुते स अनृताभिसंधोऽनृतेनात्मानमंतर्धाय परशुं तप्तं मोहात्प्रतिगृह्णाति स दह्यतेऽथ हन्यते रा
जपुरुषैः स्वकृतेनानृताभिसंधिदोषेण अथ यदि तस्य कर्मणोऽकर्ता भवति तत एव सत्यमात्मानं कुरुते स तथास्तेयाकर्ता तेन यथात्मान
मंतर्धाय परशुं तप्तं प्रतिगृह्णाति स सत्याभिसंधः स न दह्यते सत्यव्यवधानादथ मुच्यते च मृषाभियोक्तृभ्यः तस्य तप्तपरशुहस्ततलसंयो
गस्य तुल्यत्वेऽपि स्तेयकर्त्रकर्त्रोरनृताभिसंधो दह्यते न तु सत्याभिसंधः स यथा तत्र परशुग्रहणकर्मणि सत्यव्यवहितहस्ततलत्वा
न्न दह्यते तत्र देवं सत्यव्यवहितसत्याभिसंधीनां योः॥२॥२॥ सत्याभिसंधः

पातकाले तुल्यायां सत्यं संपन्नौ विद्वानविद्वांश्च एकस्य देवादिदेहग्रहणायावर्तते न विद्वांस्तु विकारानृताभिसंधिः पुनर्व्यावृत्तिस्वभावे देवता
दिभावं वा यथाकर्म यथाश्रुतं प्रतिपद्यते यदात्माभिसंधिः अनृताभिसंधिकृते मोक्षबंधने यच्च मूलं जगतो यदायतना यत्प्रतिष्ठाश्च सर्वाः
प्रजा यदात्मकं च सर्वं यच्चाजममृतमभयं शिवमद्वितीयं तत्सत्यं स आत्मा तवातस्तत्त्वमसि हे श्वेतकेतो इत्युक्तार्थमसकृद्वाक्यं कः पुनरसौ
श्वेतकेतुस्त्वंशब्दार्थो योऽहं श्वेतकेतुरुद्दालकस्य पुत्र इति वेदात्मानमादेशं श्रुत्वा मत्वा विज्ञाय चाश्रुतममतमविज्ञातं विज्ञातुं पितरं पप्रच्छ
कथं नु भगवः स आदेशो भवतीति स एषोऽधिकृतः श्रोता मंता विज्ञाता तेजोबन्नमयं कार्यकरणसंघातं प्रविष्टा परैव देवता नामरूपव्याकरणा
यादर्शे इव पुरुषः सूर्यादिरिव जलादौ प्रतिबिंबरूपेण सा आत्मानं कार्यकरणेभ्यः प्रविभक्तं सद्रूपं सर्वैर्लीनं प्राक्पितुः श्रवणाद्विजज्ञाव
थेदानीं पित्रा प्रतिबोधितस्तत्त्वमसीति दृष्टांतैर्हेतुभिश्च तत्पितुरस्य ह किलोक्तं सदेवाहमस्मीति विजज्ञौ विज्ञातवानद्वितीयं वनमध्यायय
रिसमाप्त्यर्थ ध किं पुनरत्र षष्ठे वाक्यप्रमाणेनाजनितं फलमात्मनि कर्तृत्वभोक्तृत्वयोरधिकृतत्वविज्ञाननिवृत्तिस्तस्य फलं वयमवो
चाम त्वं षष्ठे वाक्यमर्थमुद्दिश्य श्रोतृमंतृवाधिकृतत्वमविज्ञातविज्ञानफलार्थ प्राक्तेतस्माद्विज्ञानादहमेवं करिष्याम्यग्निहोत्रादीनि
कर्माण्यहमत्राधिकृतः एषां च कर्मणां फलमिहामुत्र च भोक्ष्ये कृतेषु वा कर्मसु कृतकर्तव्यः स्यामित्येवं कर्तृत्वभोक्तृत्वयोरधिकृतोऽस्मीत्या
त्मनि यद्विज्ञानमभूत्तस्य यत्सज्जगतो मूलमेकमेवाद्वितीयं तत्त्वमसीत्येतेन वाक्येन प्रतिबुद्धस्य निवर्तते विरोधात् न ह्येकस्मिन्नद्वितीय
आत्मन्ययमहमस्मीति विज्ञाते ममेदमिदं मम स्यादनेन कर्तव्यमिदं कृत्वास्य फलं भोक्ष्ये इति वा भेदविज्ञानमुपपद्यते तस्मात्सत्याद्वि
तीयात्मविज्ञाने विकारानृताजीवात्मविज्ञानं विवर्तते इति युक्तं ननु तत्त्वमसीत्यत्र त्वंशब्दवाच्योऽर्थः सद्बुद्धिरादिश्यते यथादित्यमनआदिषु ब्र
ह्मादिबुद्धिर्यथा च लोके प्रतिमादिषु विष्ण्वादिबुद्धिस्तद्वत् न तु सदेवमिति यदि सदेव श्वेतकेतुः स्यात्कथं मात्मानं न विजानीयाद्येन तस्मै

नमो २

तत्त्वमसीत्युपदिश्यते नादित्यादिवाक्यवैलक्षण्यात्पार्थिवादिरूपेणैव ब्रह्मत्वेनादावितिशब्दपरत्वात्साक्षाद्ब्रह्मत्वं गम्यते रूपादिमत्त्वाद्वादित्य
दिनामाकाशमरुतोऽत्रातिशब्दप्रधानादेवा ब्रह्मत्वमिह तु सतएव देहप्रवेशं दर्शयित्वा तत्त्वमसीति निरंकुशं सदात्मत्वं उपदिशति
ननु परात्मा ददृशुः सत्यमित्वात्सत्यमिति व त्वमसीति स्यात्तत्रादिवत्सदेकमेवाद्वितीयं स सन्नित्युपदेशात्त्वोपचार विज्ञानात्तत्स्य
तावदेव चिरमिति सत्समपत्तिरूपादिश्यते मते तत्रवालादुपचारविज्ञानस्य लाभं द्रोयमद्भुतिवत्त्वापि स्तुतिरनुपास्यत्वाच्छेनके नोक्त
पि सत्त्वेऽपि तत्केनुत्वोपदेशेन सत्त्वपते नहि राजाऽदासत्वमितिक्रियः स्यान्नापि सतः सर्वात्मनएकदेशनिरोधो युक्तस्त्वमसीति देशाद्विप
तेरिति ग्रामादयक्षत्वमिति न चान्यागतिरिह सदात्मत्वोपदेशाद्दर्शितरमतासंभवन्ति दृष्टमीति बुद्धिमात्रमिह कर्तव्यतया चोच्यते न त्व
ज्ञातं सदस्मीतिज्ञायते तेनैव त्वस्मिन्पक्षे श्रुतं श्रुतं भवतीत्याद्यनुपपन्नं न सदस्मीति बुद्धिस्तु सर्वत्वान्नायान्वेषणतस्तावदेव
चिरमित्युपदेशाद्धि हि सदस्मीति बुद्धिमात्रे कर्तव्यतया विधीयेत ननु लं शब्दवाच्यस्य सद्रूपत्वमेव न दानादायवान्वेदेति ज्ञानोप
यो यदेशो वाक्यस्य तथाग्निहोत्रं जुहुयादितिवत्तमादित्यं पुरासमेवाकार्यं वत्स्यं तेन दूनस्याविदेव चिरमिति चक्षेपकरणं न युक्तं स्यात्
सदात्मत्वेऽविज्ञातेऽपि सतस्तत् बुद्धिमात्रकरणे मोक्षप्रसंगात्तच्चनत्वमसीत्यत्रेनाहं सदितिप्रमाणात्वाक्याजनितबुद्धिर्निवर्तयितुं श
क्यातोऽस्य नेतिचाशंकं वक्तुं सर्वोपनिषद्वाक्यानां तत्परत्वोपक्षयायथाग्निहोत्रादिविधिजनिता होत्रादिकर्त्रव्यता बुद्धिर्नाम तथा
यत्त्वमनुयत्त्वे च न शक्यते वक्तुं नह्यघटं सदात्मानं कथं न जानीयामिति नासौ दोषः कार्यकरणसंघातव्यतिरेकोऽहं जो
वः कर्ता भोक्तेति अपि स्वभावतः प्राप्तिमात्रं विज्ञानात्सदशेनापि नस्यसदात्मविज्ञानं कथमेवं व्यतिरिक्तविज्ञाने सति तेषो कर्तृत्वादि
विज्ञानसंभवतिह श्यते च न द्वैतनस्यापि देहादेष्वात्मबुद्धित्वात्तस्यात्सदात्मविज्ञाने तस्माद्विकारानृताधिकृतजीवात्मत्वविज्ञाननिव
र्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धमिति १६ इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृ

परमार्थेनत्वोपदेशप्रधानपरः षष्ठो ध्यायः सदात्मैकत्वनिर्णयपरतयैवोपयुक्तोऽनः सतो वीकृतविकारलक्षणानि तत्त्वानि निर्दिष्टानीत
त्वानि नामादीनि प्राणांतानि क्रमेण निर्दिश्यन्ते द्वारेणापि भूमाख्यं निरतिशयं तत्त्वं निर्दिश्यामीति शाखाचंद्रदर्शनवदिति मंसप्तमं
प्रायारकमारभ्यते अनिर्दिष्टे हि सति मनो वीकृतत्वेषु सन्मात्रे च निर्दिष्टे अनंदृश्य विज्ञातस्यादिमाशंकाकस्यचित्स्यात्
स्यामीति नामादिनिर्दिश्यते अथवा नामादिगुणरोत्तरविशिष्टानि तत्त्वानि तानि च तेषामुत्कृष्टतमं भूमाख्यं तत्त्वमिति तत्र स्तुत्यर्थं नामा
दीनां क्रमेणोपन्यासः आख्यायिका परविद्यास्तुत्यर्थो अथवा नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योपि सन्नात्मज्ञत्वात् शुशोचैव किमु

अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच

वक्तव्यमन्योऽस्मविंतु रक्तनपुरायातिशयोऽकृतार्थेऽहं यथवा नान्यदात्मज्ञानान्निरतिशयश्रेयःसाधनमस्तीत्येतत्प्रदर्शनार्थं सनत्कुमा
रनारदाख्यापिकारभ्यते येन सर्वविज्ञानसाधनशक्तिसंपन्नस्यापि नारदस्य देवर्षेः श्रेयो न बभूव येनोत्तमाभिजनविद्यावृत्तसाधनश
क्तिसंपत्तिनिमित्ताभिमानं हित्वा प्राकृतपुरुषवत्सनत्कुमारमुपससार श्रेयःसाधनप्राप्तये ऽतः प्रख्यापितं भवति निरतिशयश्रेयःसाध
नत्वमात्मविद्याया इति अधीहि अधीष्व भगवो भगवन्निति होक्तो पससाद अधीहि भगव इति मंत्रः सनत्कुमारं ब्रह्मिष्ठं नारदउ
पसन्नवानन्तं न्यायेनोपसन्नं होवाच यदात्मविषये किंचिद्वेत्थ तेन तत्प्रख्यापनेन मामुपसीद मह्यं जानेऽहमिति ततो विज्ञानात्तेतुभ्यमूर्ध्वं

ध्येमि स्मरामि यद्वेत्थेति विज्ञानस्य पृष्टत्वात् तथा यजुर्वेदं सामवेदमाथर्वणं चतुर्थं वेदशब्दस्य प्रकृतत्वात् इतिहासपुराणं पंचमं वेदं
वेदानां भारतं पंचमानां वेदं व्याकरणमित्यर्थो व्याकरणेन हि पदादिविभागशः ऋग्वेदादयो ज्ञायंते पित्र्यं श्राद्धकल्पं राशिं गणितं दैवमु
त्पातविज्ञानं निधिं महाकालादिनिधिशास्त्रं वाकोवाक्यं तर्कशास्त्रं एकायनं नीतिशास्त्रं देवविद्यां निरुक्तं ब्रह्मणः ऋग्यजुःसामाख्यस्य विद्यां ब्रह्मवि काय
द्यां शिक्षाकल्पच्छंदश्चितयो भूतविद्यां भूततंत्रं क्षत्रविद्यां धनुर्वेदं नक्षत्रविद्यां ज्योतिषं सर्पदेवजनविद्यां सर्पविद्यां गारुडं देवजनविद्यां वि
त गांधर्वयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि एतत्सर्वं भगवोऽध्येमि सोऽहं भगव एतत्सर्वं जानन्नपि मंत्रविदेवास्मि शब्दार्थविज्ञानवा

ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पित्र्यं राशिं दैवं नि
धिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि सोऽहं
भगवो मंत्रविदेवास्मि

नेवास्मीत्यर्थः सर्वो हि शब्दोऽभिधानमात्रं अभिधानं च सर्वं मंत्रेष्वं तमेवतत् मंत्रविदेवास्मि मंत्रवित्कर्मविदित्यर्थः मंत्रेषु कर्माणीति हि
वक्ष्यति नात्मविन्नात्मानं वेत्ति न ह्यात्मापि मंत्रैः प्रकाश्यत एवेति कथं मंत्रविच्चेन्नात्मवित् अभिधानाभिधेयभेदस्य विकारत्वात् न च विका
र आत्मेष्यते नन्वात्मात्मशब्देनाभिधीयते न यतो वाचो निवर्तन्ते यत्र नान्यत्पश्यतीत्यादिश्रुतेः कथं तर्हीत्मा [illegible] धस्तात्
स आत्मेत्यादिशब्दा आत्मानं प्रत्याययंति नैष दोषः देहवति प्रत्यगात्मनि भेदविषये प्रयुज्यमानः शब्दो देहादीनामात्मत्वे प्रत्याख्यायमा
नेयत्परिशिष्टं सदवाच्यमपि प्रत्याययति यथा सराजिकायां दृश्यमानायां सेनायां छत्रध्वजपताकादिव्यवहिते॥

दृश्यमाने एष राजा दृश्यत इति शब्दप्रयोगः तत्र कोऽसौ [illegible] राजेति राजविशेषनिरूपणायां दृश्यमानेतरप्रत्याख्याने ऽन्यस्मि
न्न दृश्यमानेऽपि राजनि राजप्रतीतिर्भवेत् तद्वत् कर्मविदेवास्मि कर्म कार्यं च सर्वो विकार इति [illegible] विकारज्ञ एवास्मि नात्मवित्
नात्मप्रकृतिस्वरूपज्ञ इत्यर्थः अतएवोक्तमाचार्यवान्पुरुषो वेदेति यतो वाचो निवर्तन्ते इत्यादिश्रुतिभिः श्रुतमागमज्ञानमस्त्ये
व हि यस्मान्मम भगवद्दृशेभ्यो युष्मत्सदृशेभ्यः तरति अतिक्रामति शोकं मनस्तापमकृतार्थबुद्धितामात्मविदिति अतः सोऽहमनात्मवित्त्वात्
हे भगवः शोचामि अकृतार्थबुद्ध्या संतप्ये सर्वदा तं मा मां शोकसागरस्य पारं भगवांस्तारयतु आत्मज्ञानोडुपेन कृतार्थबुद्धिमापादयतु अभयं गमय

नात्मविच्छ्रुत ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति तं
होवाच यद्वै किंचैतदध्यगीष्ठा नामैवैतन्नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पंचमो वेदा
नां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या ना दे
मैवैतन्नामोपास्वेति स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो
नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति १॥

त्वित्यर्थः तमेवमुक्तवंतं होवाच यद्वै किंचैतदध्यगीष्ठा अधीतवानसि अध्ययनेन तदर्थज्ञानमुपलक्ष्यते ज्ञातवानसीति एतन्नामैवैतत् वाचा
रंभणं विकारो नामधेयमिति श्रुतेः नामैव ऋग्वेदो यजुर्वेद इत्यादिना मैवैतत् नामोपास्व ब्रह्मेति ब्रह्मबुद्ध्या यथा प्रतिमां विष्णुबुद्ध्योपास्ते तद्व
त् स यस्तु नाम ब्रह्मेत्युपास्ते तस्य यत्फलं भवति तच्छृणु यावन्नाम्नो गतं नाम्नो गोचरं तत्र तस्मिन्नामविषयेऽस्य यथा कामचारः कामचरणं रा
जेव स्वविषये भवति यो नाम ब्रह्मेत्युपास्ते इत्युपसंहारः किमस्ति भगवो नाम्नो भूयः अधिकतरं यत् ब्रह्मदृष्ट्यर्हं [illegible] इत्यभिप्रायः सनत्कुमा प्र
र आह नाम्नो वाव भूयोऽस्तीत्येवमुक्ते आह यद्यस्ति तन्मे भगवान्ब्रवीत्विति १॥

वाग्वाव नाम्नो भूयसी वागिति जिह्वामूलादिष्वष्टसु स्थानेषु स्थितं वर्णानामभिव्यंजकं वर्णाश्च नामेति नाम्नो वाग्भूयसीत्युच्यते कार्यात्कारणं
भूयो दृष्टं हि लोके यथा पुत्रात्पिता तद्वत्कथं च वाङ्नाम्नो भूयसीत्यत आह वाग्वा ऋग्वेदं विज्ञापयति ऋग्वेद इति तथा यजुर्वेदमित्या

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पि
त्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृ
थिवीं च वायुं चाकाशं चापश्च तेजश्च देवांश्च मनुष्यांश्च पशूंश्च वयांसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतंगपि
पीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न
सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति स यो वाचं ब्रह्मेत्युपास्ते यावद्वा
चो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति भगवो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्
ब्रवीत्विति ॥२॥

दि समानं हृदयप्रियं तद्विपरीतमहृदयज्ञं यद्यदि वाङ्नाभविष्यद्धर्माद्यवगमाभावेऽध्ययनाभावोऽध्ययनाभावे तदर्थश्रवणाभावस्तच्छ्रवणाभा
वे धर्मादि न व्यज्ञापयिष्यत्ततो न विज्ञातं भवेद्विज्ञातस्यैव [illegible] वाचोच्चारणेन सर्वं विज्ञापयत्यतो नाम्नो भूयसी वाक् तस्माद्वाचं ब्रह्मे
त्युपास्स्व समानमन्यत् ॥२॥

मनो मनस्याविशिष्टमन्तःकरणं वाचो भूयः तद्धि मनसनव्यापारवत् वाचं वक्तव्ये प्रेरयति तेन वाक् मनस्यन्तर्भवति यच्च यस्मिन्नन्तर्भवति तत्त
स्य व्यापकत्वात्ततो भवति यथा वै लोके द्वे वामलके फले द्वे वा कोले बदरफले द्वौ वाक्षौ विभी[त]कफले मुष्टिरनुभवति मुष्टिस्ते फले व्याप्नोति
[मु]ष्टिना संवृते हि ते भवतः एवं वाचं नाम चामलकादिवत् मनोऽनुभवति स यदा पुरुषो यस्मिन्काले मनसान्तःकरणेन मनस्यति मनस्यनं विव
क्षाबुद्धिः कथं मन्त्रानधीयीयेत्युच्चारयेयमित्येवं विवक्षां कृत्वा [अथा]धीते तथा कर्माणि कुर्वीयेति चिकीर्षाबुद्धिं कृत्वाथ कुरुते पुत्रांश्च पशूंश्च

मनो वाव वाचो भूयो यथा वै द्वे वामलके द्वे वा कोले द्वौ वाक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति स यदा मनसा म
नस्यति मन्त्रानधीयीयेत्यथाधीते कर्माणि कुर्वीयेत्यथ कुरुते पुत्रांश्च पशूंश्चेच्छेयेत्यथेच्छत इमं च लोकममुं चेच्छेयेत्यथेच्छते मनो
ह्यात्मा मनो हि लोको मनो हि ब्रह्म मन उपास्स्वेति स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवति यो
मनो ब्रह्मेत्युपास्तेऽस्ति भगवो मनसो भूय इति मनसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ३ ॥

च्छेयेति प्राप्तीच्छां कृत्वा तत्प्राप्त्युपायानुष्ठानेनाथेच्छते पुत्रादीन्प्राप्नोतीत्यर्थः तथेमं च लोकममुं च येनोपायेनेच्छेयमिति तत्प्राप्त्युपायानु ष्ठा
नेनाथेच्छते प्राप्नोति मनो ह्यात्मा आत्मनः कर्तृत्वं भोक्तृत्वं च सति मनसि नान्यथेति मनो ह्यात्मेत्युच्यते मनो हि लोकः सत्येव हि मनसि लोको भव
ति तत्प्रा[प्त्यु]पायानुष्ठानं चेति मनो हि लोको यस्मात्तस्मान्मनो हि ब्रह्म यत एवं तस्मान्मन उपास्स्वेति स यो मन इत्यादि समानं ॥३॥

संकल्पो वाव मनसो भूयान् संकल्पोपि वन नस्पन वद् तः करणवृत्तिः कर्तव्याकर्तव्यविषयविभागेन हि समर्थ्ये विषये चिकीर्षाबुद्धिर्मनस्या नंतरं भवति कथं यदा संकल्पयते कर्तव्यादि विषयान् विभजते इदं कर्तुं युक्तमिति अथ मनस्यति मंत्रानधीयीयेत्यादि अथानंतरं वाचमीरयति मंत्राद्युच्चारणे तां च वाचमु नाम्नि नामोच्चारणनिमित्तं विवक्षां कृत्वा ईरयति नाम्नि नामसामान्ये मंत्राः शब्दविशेषाः संतः एकं भवंति अंतर्भवंतीत्यर्थः सामान्ये हि विशेषांतर्भवंति मंत्रेषु कर्माणि एकं भवंति मंत्रप्रकाशितानि कर्माणि क्रियंते नामंत्रकमस्ति कर्म यद्धि मंत्रप्रकाशनेन लब्धसत्ताकं सत्कर्म ब्राह्मणेनेदं कर्तव्यमस्य फलायेति विधीयते यायच्चोत्पत्तिर्ब्राह्मणेषु कर्मणां दृश्यते सापि मंत्रेषु लब्धसत्ताका

संकल्पो वाव मनसो भूयान्यदा वै संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मंत्रा एकं भवंति मंत्रेषु कर्माणि तानि ह वा एतानि संकल्पैकायनानि संकल्पात्मानि संकल्पे प्रतिष्ठितानि समक्लृपतां द्यावापृथिवी समकल्पेतां वायुश्चाकाशं च समकल्पंतापश्च तेजश्च तेषां संक्लृप्त्यै वर्षं संकल्पते ॥

ल

नाम्नैव कर्मणां स्पष्टीकरणं न हि मंत्रीप्रकाशितं कर्म किंचिद्ब्राह्मणेषु उत्पन्नं दृश्यते त्रयीविहितं कर्म त्रिप्रसिद्धं लोके त्रयी शब्दस्य अर्थ नामैव कर्मणां स्पष्टीकरणं न हि मंत्राप्रकाशितं कर्म किंचिद्ब्राह्मणेषु उत्पन्नं दृश्यते त्रयीविहितं कर्म त्रिप्रसिद्धं लोके त्रयीशब्दः अरूप नुः सा मसमसमस्त्या मंत्रेषु कर्माणि एकं वयोयान्दृश्यन्निति चाथर्वणेन तस्मात् युक्तं मंत्रेषु कर्माणि एकं भवंतीति तानि ह वा एतानि मनआदीनि आदिश्य संकल्पैकायनानि संकल्पैकायनानि संकल्पात्मकानि संकल्पोत्पत्तीनि समकल्पतां द्यावापृथिव्यौ वायुश्चाकाशं च समकल्पेतां वायुश्चाकाशं च समकल्पतां वायुश्चाकाशं च समकल्पंतामापश्च तेजश्च पृथिवी च [illegible] वायु [illegible] समकल्पेतां वा वपि संकल्पं [illegible] कृत्वेव तानि [illegible] समकल्पंतामापश्च तेजश्च [illegible] स्वरूपेण [illegible] वायुश्चाकाशं च तन्तान्यपि संकल्पंतेन [illegible] समकल्पंतामापश्च तेजश्च [illegible] स्वरूपेण [illegible]
[illegible] संकल्पतेन [illegible] वर्षं संकल्पते [illegible] भवति आपश्च तेजश्च तेषां सं[illegible]

तथा वर्षस्य संक्लृप्त्यै संकल्पनिमित्तमन्नं संकल्पते वृष्टेर्ह्यन्नं भवति अन्नस्य संक्लृप्त्यै प्राणाः संकल्पंते अन्नमयाहि प्राणा अन्नोपष्टंभकात्वं हि मेतिहि श्रुतिः तेषां संक्लृप्त्यै मंत्राः संकल्पंते प्राणवान् हि मंत्रानधीते नाबलः मंत्राणां हि संक्लृप्त्यै कर्माण्यग्निहोत्रादीनि संकल्पंते नुष्ठीयमानानि मंत्रप्रकाशितानि समर्थानि भवंति फलाय ततो लोकः फलं संकल्पते कर्तृसमवायितया समर्थो भवतीत्यर्थः लोकस्य संक्लृप्त्यै सर्वं जगत् संकल्पते स्वरूपावैकल्यायेत ह्येदं सर्वं जगत्फलावसानं तत्सर्वं संक्लृप्तमलमतो विशिष्टः स एष संकल्पः अतः संकल्प

वर्षस्य संक्लृप्त्या अन्नं संकल्पतेऽन्नस्य संक्लृप्त्यै प्राणाः संकल्पंते प्राणानां संक्लृप्त्यै मंत्राः संकल्पंते मंत्राणां संक्लृप्त्यै कर्माणि संकल्पंते कर्मणां संक्लृप्त्यै लोकः संकल्पते लोकस्य संक्लृप्त्यै सर्वं संकल्पते स एष संकल्पः संकल्पमुपास्स्वेति स यः संकल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावत्संकल्पस्य गतं तत्रास्य यथाकामचारो भवति यः संकल्पं ब्रह्मेत्युपास्तेऽस्ति भगवः संकल्पाद्भूय इति संकल्पाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ४ ॥

मुपास्स्वेत्युक्त्वा फलमाह स यस्तु उपासकः संकल्पं ब्रह्मेति ब्रह्मबुद्ध्योपास्ते क्लृप्तान्वै धात्रास्मै इमे लोकाः फलमिति क्लृप्ता [illegible] न समर्थितान्संकल्पितान्स विद्वान्ध्रुवान्नित्यान् तां ध्रुवश्च स्वयं लोकिनो ह्यध्रुवत्वे लोके ध्रुवत्वानुपपत्तिरित्यर्थः ध्रुवः सन् प्रतिष्ठितानुपकरणसंपन्नानित्यर्थः पशुपुत्रादिभिः प्रतिष्ठितोऽपि दर्शनात्स्वयं च प्रतिष्ठितः आत्मीयोपकरणसंपन्नोऽव्यथमानानमित्रादित्रासरहिता नव्यथमानश्च स्वयमभिसिद्धयत्यभिसिद्ध्यभिप्राप्नोतीत्यर्थः यावत्संकल्पस्य गतं संकल्पस्य गोचरः तत्रास्य यथाकामचारो भवत्यात्मनः संकल्पस्य न तु सर्वेषां संकल्पस्य तत्फलविरोधात् यः संकल्पं ब्रह्मेत्युपास्त इत्यादि पूर्ववत् ४ ॥

छां०शां०
१०१

चित्तं वाव संकल्पाद्भूयः चित्तं चेतयितृत्वं प्राप्तकालानुरूपबोधवत्त्वमतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च तत्संकल्पाद्भूयः कथं यदा वै प्राप्तं वस्त्विदमेवं प्राप्तमिति चेतयते तदा तदादानाय वा परिहाराय वा संकल्पयतेऽथ मनस्यतीत्यादि पूर्ववत् तानि ह वा एतानि मनआदीनि संकल्पादीनि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि चित्तस्थितानामपि पूर्ववत् किंच चित्तस्य माहात्म्यं यस्माच्चित्तं संकल्पादिमूलं तस्माद्यद्यपि बहुवित्तबहुशास्त्रादिपरिज्ञानवान्सन्नचित्तो भवति प्राप्तादिचेतयितृत्वसामर्थ्यरहितो भवति तं निपुणा लौकिका

२०४

चित्तं वाव संकल्पाद्भूयो यदा वै चेतयतेऽथ संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भवति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादित्यथ यद्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तं ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा चित्तमुपास्स्वेति स यश्चित्तं ब्रह्मेत्युपास्ते चितान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावच्चित्तस्य गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भूय इति चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ५॥

त

चि

नायमस्ति विद्यमानोऽप्यसन्नेवेत्याहुः यदयं किंचिच्छास्त्रादि वेद श्रुतवान्तदप्यस्य वृथैवेति कथयन्ति तस्मात्तद्यद्ययं विद्वान्स्यादित्थमेवमचित्तो न स्यात्तस्मात्तस्य श्रुतमप्यश्रुतमेवेत्याहुरित्यर्थः अथाल्पविदपि यदि चित्तवान्भवति तस्मा एतस्मा उत शुश्रूषन्ते श्रोतुमिच्छन्ति तस्माच्चित्तं ह्येवैषां संकल्पादीनामेकायनमित्यादि पूर्ववत् चित्तानुपचितान्बुद्धिमद्गुणैः स चित्तोपासको ध्रुवानित्यादि योज्यार्थः ५॥

राम०
१०१

ध्यानं वाव चित्ताद्भूयः ध्यानं नाम शास्त्रोक्तदेवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितः प्रत्ययसन्तानः एकाग्रतेति यमाहुः दृश्यते च ध्यानस्य माहात्म्यं फलतः कथं यथा योगी ध्यायन्निश्चलो भवति ध्यानफललाभे एवं ध्यायतीव निश्चला दृश्यते पृथिवी ध्यायतीवान्तरिक्षमित्यादि समानमन्यत् देवाश्च मनुष्याश्च देवमनुष्याः मनुष्या एव वा देवसमा देवमनुष्याः शमादिगुणसंपन्ना मनुष्या देवस्वरूपं न जहतीत्यर्थः यस्मादेवं विशिष्टं ध्यानं तस्माद्य इह लोके मनुष्याणामेव धनैर्विद्यया गुणैर्वा महत्तां महत्त्वं प्राप्नुवन्ति धनादिमहत्त्वहेतुं लभन्त इत्यर्थः ध्यानापादांशा इव ध्यानस्यापादनं ध्यानापादो ध्यानफललाभ इत्येतत्तस्यांशोऽवयवः कला कांचिद्ध्या

२०५

ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्यास्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादांशा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्यानापादांशा इवैव ते भवन्ति ध्यानमुपास्स्वेति स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति॥ ६

नफललाभकलावन्त इत्यर्थः ते भवन्ति निश्चला इव लक्ष्यन्ते न क्षुद्रा इत्यर्थः ये पुनरल्पाः क्षुद्राः किंचिदपि धनादिमहत्त्वैकदेशमप्राप्तास्ते पूर्वोक्तविपरीताः कलहिनः कलहशीलाः पिशुनाः परदोषोद्भासकाः उपवादिनः परदोषं सामीप्ययुक्तमेव वदितुं शीलं येषां ते उपवादिनश्च भवन्ति अथ ये महत्त्वं प्राप्ता धनादिनिमित्तैरन्यान्प्रति प्रभवन्तीति प्रभवो विद्याचार्यराजेश्वरादयो ध्यानापादांशा इवेत्याद्युक्तार्थं अतो दृश्यते ध्यानस्य महत्त्वं फलतोऽतो भूयश्चित्तात् तदुपास्स्वेत्याद्युक्तार्थं ध्यानाद्वाव भूयो ऽस्तीति तन्मे भगवान्ब्रवीत्विति ६

म

त्र

छां०शां०
१०२

206

विज्ञानं वाव ध्यानाद्भूयः विज्ञानं शास्त्रार्थविषयं ज्ञानं तस्य ध्यानकारणत्वात् ध्यानाद्भूयस्त्वं कथं तस्य भूयस्त्वमित्याह विज्ञानेन वै ऋग्वेदं विजानातीत्यादि प्रमाणं अयमेव इति प्रमाणानयायस्मार्थ ज्ञानं ध्यानकारणं तथा यजुर्वेदमित्यादिकं च पश्वादीश्च धर्माधर्मौ शास्त्रसिद्धौ प्र

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवांश्च मनुष्यांश्च पशूंश्च वयांसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिध्यति यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्ति भगवो विज्ञानाद्भूय इति विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ७॥

हृदयज्ञं चा

त

साध्वसाधुनी लोकतः स्मार्ते वा दृष्टविषयं च सर्वं विज्ञानेनैव विजानातीत्यर्थः तस्माद्युक्तं ध्यानाद्विज्ञानस्य भूयस्त्वं अतो विज्ञानमुपास्स्वेति अस्य उपासनफलं विज्ञानवतो विज्ञानं येषु तान् विज्ञानवतो लोकान् ज्ञानवतश्चाभिसिध्यति अभिप्राप्नोति विज्ञानं शास्त्रार्थज्ञानं अन्यावि षयं नैपुण्यं तद्द्विर्युक्तान् लोकान् प्राप्नोतीत्यर्थः यावद्विज्ञानस्येत्यादि पूर्ववत् ७॥

शां०
१०१

बलं वाव विज्ञानाद्भूयः बलमित्यन्नोपयोगजनितं मनसो विज्ञेयप्रतिभानसामर्थ्यं अनशनात् ऋगादीनि वै मा प्रतिभान्ति भो इति श्रुतेः शरीरेऽपि तदेवौत्थानादिसामर्थ्यं यस्माद्विज्ञानवतां शतमप्येकः प्राणी बलवानाकम्पयते यथा हस्ती मत्तो मनुष्याणां शतं समुदितमपि यस्मादेवमन्नाद्युपयोगनिमित्तं स पुरुषो यदा बली बलेन तद्वान् भवत्यथोत्थाता स्वस्य कर्ता तिष्ठन् गुरूणामाचार्यस्य च परिचरिता परिचरणस्य शुश्रूषायाः कर्ता भवति परिचरन्नुपसत्ता तेषां समीपगोऽन्तरङ्गः प्रियो भवतीत्यर्थः उपसीदंश्च सामीप्यं गच्छन्

बलं तस्मात्

ष्याते

207

बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन्परिचरिता परिचरन्नुपसत्ता भवत्युपसीदन्द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बले[illegible]न द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयांसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो बलं ब्रह्मेत्युपास्तेऽस्ति भगवो बलाद्भूय इति बलाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ८॥

कायगतयाचार्यस्यान्यस्य चोपदेष्टुः गुरोर्द्रष्टा भवति ततस्तदुक्तस्य श्रोता भवति तत इदमेभिरुक्तमेवमुपपद्यत इत्युपपत्तितो मन्ता भवति मन्वानश्च बोद्धा भवति एवमेवेदमिति ततस्तरं बोद्धा निश्चित्य तदुक्तार्थस्य कर्ता अनुष्ठाता भवति विज्ञाता अनुष्ठानफलस्यानुभविता भवतीत्यर्थः किं च बलस्य माहात्म्यं बलेन वै पृथिवी तिष्ठतीत्यादि ऋज्वर्थं ८॥

अन्नं वाव बलात् भूयः बलहेतुत्वात् कथं बलहेतुत्वमुच्यते यस्माद्बलकारणमन्नं तस्माद्यद्यपि कश्चिद्दश रात्रीर्नाश्नीयात् सोऽनुपयोगनिमित्तस्य बलस्य हान्या म्रियते यद्यु ह जीवेत् दृश्यते हि मासमप्यनश्नतो जीवनं तोयमात्रं सेवमानस्य द्रष्टा भवति गुरोरपि ततरा वा अ-
लमादि एवं विपरीतं सर्वं भवति अथ यदा बहून्यहान्यनश्नतो दर्शनादिक्रियासु समर्थः सन्नन्नस्यापि आगमनमायोन्नस्य प्राप्ति

स्त्रियै १

अन्नं वाव बलाद्भूयस्तस्माद्यद्यपि दश रात्रीर्नाश्नीयाद्यद्यु ह जीवेदथ वाऽद्रष्टाऽश्रोताऽमन्ताऽबोद्धाऽकर्ताऽविज्ञाता भ-
वत्यथान्नस्यायै द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवत्यन्नमुपास्स्वेति स योऽन्नं ब्रह्मेत्युपास्ते अन्न-
वतो वै स लोकान्पानवतोऽभिसिध्यति यावदन्नस्य गतं तत्रास्य यथा कामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽन्नाद्भू-
य इत्यन्नाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ९॥

रित्यर्थः स यस्य विद्यते सोऽन्नस्याये आईत्यत् हृतोऽत्यत्येन अथान्नस्यायै इत्यादि पाठं एवमेवार्थः द्रष्टेत्यादि कार्यश्रवणात् दृश्य-
ते च लोके यथायोगं दर्शनादिसामर्थ्यं ततः प्राप्नुवतोऽन्नमुपास्स्वेति फलं चान्नवतां प्रभूतान्नानन्नवतो वै स लोकान्पानवतः प्रभूतोदकाश्चा-
न्नपानयोर्नित्यसंबंधात्तल्लोकानभिसिध्यति समानमन्यत् ९॥

आपो वावान्नाद्भूयस्यः अन्नकारणत्वात् यस्मादेवं तस्मात् यदा यस्मिन्काले सुवृष्टिः सस्यहिताशोभना वा वृष्टिर्न भवति तदा व्याधीयन्ते प्रा-
णाः दुःखिनो भवन्ति किंनिमित्तमित्याह अन्नमस्मिन्संवत्सरे नष्टं कनीयो भविष्यत्यल्पतरं भविष्यतीत्यर्थः पुनर्यदा सुवृष्टिर्भवति तदानंदि-

आपो वावान्नाद्भूयस्यस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीत्यथ यदा सुवृष्टि-
र्भवत्यानन्दिनः प्राणा भवन्त्यन्नं बहु भविष्यतीत्याप एवेमा मूर्ता येयं पृथिवी यदन्तरिक्षं यद्द्यौर्यत्पर्वता यद्देव-
मनुष्या यत्पशवश्च वयांसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकमाप एवेमा मूर्ता अप उ-
पास्स्वेति स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामांस्तृप्तिमान्भवति यावदपां गतं तत्रास्य यथा कामचारो
भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥१०॥

नः सुखिनो हृष्टाः प्राणिनो भवन्ति अन्नं बहु प्रभूतं भविष्यतीत्यन्नमभवत्वात् मूर्तं स्यादन्नस्याप एवेमा मूर्ता मूर्तिभेदाकारपरिणता इति
ये यं पृथिवी यदन्तरिक्षमित्यादि आप एवेमा मूर्ता अतोऽप उपास्स्वेति फलं स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामान्कामप्रान्तिमतो
विषयानित्यर्थः अन्नं भवत्याच्चात्स्तेर तुपासना ततृप्तिमांश्च भवति समानमन्यत १०॥ मू

छां०शां०
१०४

तेजो वा अद्भ्यो भूयस्तेजसोऽप्कारणत्वात् कथमप्कारणत्वमित्याह यस्मात्तद्धोति तेजस्तस्मात् हैतत्तदेतत्तेजो वायुमागृह्यावष्टभ्य आत्मनानिश्चलीकृत्य वायुमाकाशमभितपत्याकाशमभिव्याप्नुवत्तपति यदा तदाहुर्लौकिका निशोचति संतपति सामान्येन जगत् निपतति देहा नतो वर्षिष्यति वा इति प्रसिद्धं हि लोके कारणमभ्युपगमनं तदृष्टं वतः कार्यं भविष्यतीति। विज्ञानं तेज एव तत्पूर्वमात्मानमु

तेजो वा अद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्रादाश्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तेज उपास्स्वेति स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभिसिध्यति यावत्तेजसो गतं तत्रास्य यथाकामचारो भवति यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥११॥

दृष्टं दर्शयित्वानन्तरमपः सृजतेऽतोऽप्कारणत्वात् भूयोऽद्भ्यस्तेजः किंचान्यत्तदेतत्तेजः स्तनयित्नुरूपेण वर्षहेतुर्भवति कथमूर्ध्वाभिश्चोर्ध्वगामिनीभिस्तिर्यग्गताभिश्च सह विद्युद्भिराह्रादाः स्तननशब्दाश्चरन्ति तस्मात्तद्दर्शनादाहुर्लौकिका विद्योतते स्तनयति वर्षिष्यति वा तेज उपास्स्वेति तस्य तेजउपासनस्य फलं तेजस्वी वै भवति तेजोवत एव च लोकान् भास्वतः प्रकाशवतोऽपहततमस्कान् तमः बाह्याध्यात्मिकमज्ञानाद्यपहतं तमस्कानभिसिध्यतीत्युक्तार्थमन्यत् ॥११॥

न

210

राम०
१०४

आकाशो वाव तेजसो भूयान् वायुसहितस्य तेजसः कारणत्वात् व्योम्नो वायुमाद्य इति तेजसा सह उक्तो वायुरिति पृथगिह नोक्तस्तेजसः कारणं हि लोके कार्याद्भूयो दृष्टं यथा घटादिभ्यो मृत् तथाकाशो वायुसहितस्य तेजसः कारणमिति ततो भूयान् कथमाकाशे वै सूर्याचन्द्रमसावुभौ तेजोरूपौ विद्युन्नक्षत्राण्यग्निश्च तेजोरूपाण्याकाशेऽन्तः यच्च यस्यान्तर्वर्ति तदल्पं भूयस्त्वितरत् किंच आकाशेनाह्वयति चान्यमन्य आहूतश्चेतर आकाशेन शृणोति प्रत्युक्तं च शब्दमन्यः शृणोति आकाशे रमते क्रीडत्यन्योन्यं सर्वस्तथा न रमते चाकाशे बन्ध्वादिवि

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान्प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥११॥

योगे आकाशे जायते न मूर्तेनावष्टब्धे तथाकाशमभिलक्ष्यांकुरादि जायते न प्रतिलोममाकाशमुपास्स्व फलं शृणु आकाशवतो वै विस्तारयुक्तान् स विद्वान् लोकान् प्रकाशवतः प्रकाशाकाशयोर्नित्यसंबन्धात् प्रकाशवतश्च लोकानसंबाधान् संबाधनं संबाधः अन्योन्यपीडनं तद्रहितानुरुगायवतो विस्तीर्णगतीन् विस्तीर्णप्रचारान् लोकानभिसिध्यति यावदाकाशस्येत्याद्युक्तार्थं ॥१२॥

है

211

छां० शां०
१०५

स्मरो वा आकाशाद्भूयः स्मरणं स्मरोऽन्तःकरणधर्मः स चाकाशाद्भूयानिति लिङ्गव्यत्ययेन दृष्टव्यं स्मर्तुः स्मरणे हि सत्याकाशादि सर्वमर्थवत् स्मरणवतो भोग्यत्वात् असति तु स्मरणे सदप्यसदेव सत्त्वकार्याभावात् नापि सत्त्वं स्मरणाभावे शक्यमाकाशादीनामवगन्तुमतः स्मरणस्याकाशाद्भूयस्त्वं दृश्यते हि लोके स्मरणस्य भूयस्त्वं यस्मात्तस्माद्यद्यपि समुदिता बहव एकस्मिन्नासीरन् उपविष्टाः पुत्रेत्रा

स्मरो वावाकाशाद्भूयस्तस्माद्यद्यपि बहव आसीरन्न स्मरन्तो नैव ते कंचन शृणुयुर्न मन्वीरन्न विजानीरन्यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन्स्मरेण वै पुत्रान्विजानाति स्मरेण पशून्स्मरमुपास्वेति स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्ति भगवः स्मराद्भूय इति स्मराद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति १३॥

सीना अन्योन्यभाषितमपि न स्मरन्तश्चेत्स्युः नैव ते कंचन शब्दं शृणुयुस्तथा न मन्वीरन् मन्तव्यं चेत्स्मरेयुस्तदा मन्वीरन् स्मरणाभावान्न मन्वीरन् तथा न विजानीरन् यदा वाव ते स्मरेयुर्मन्तव्यं विज्ञातव्यं श्रोतव्यं चाथ शृणुयुरथ मन्वीरन्नथ विजानीरन् तथा स्मरेण वै मम पुत्रा एत इति पुत्रान्विजानाति स्मरेण पशून् अतो भूयस्त्वात्स्मरमुपास्वेत्युक्तोऽर्थमन्यत्॥१३॥

रामा०
१०५

आशा वाव स्मराद्भूयसी। अप्राप्तवस्तुकांक्षा आशा तृष्णा काम इति यामाहुः पर्यायैः सा च स्मराद्भूयसी कथं आशयान्तःकरणस्थया स्मरति स्मर्तव्यं आशाविषयरूपं स्मरन् सोऽयं स्मरो भवत्यतः आशेद्धः आशयाभिवर्द्धितः स्मरन्भूतः स्मरन् ऋगादीन् मंत्रानधीते अधीत्य च तदर्थं ब्राह्मणेभ्यो विधींश्च श्रुत्वा कर्माणि कुरुते तत्फलाशयैव पुत्रांश्च पशूंश्च कर्मफलभूतानिच्छते अभिवाञ्छति आशयैव तत्साधनान्यनुतिष्ठति इमं च लोकमाशेद्ध एव स्मरन् लोकसंग्रहहेतुभिरिच्छत्यमुं च लोकमाशेद्धः स्मरंस्तत्साधनानुष्ठानेनेच्छते अत आशाना व

आशा वाव स्मराद्भूयस्याशेद्धो वै स्मरो मंत्रानधीते कर्माणि कुरुते पुत्रांश्च पशूंश्चेच्छत इमं च लोकममुं चेच्छत आशामुपास्वेति स य आशां ब्रह्मेत्युपास्त आशयास्य सर्वे कामाः समृध्यन्त्यमोघा हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्तेऽस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति १४॥

अतः स्मराकाशादिनामपर्यन्तेभ्यो गरीयस्त्वं गुणाधिक्यं आशायाः स्मरादपि भूयस्त्वं यस्मादत आशामुपास्व यस्त्वाशां ब्रह्मेत्युपास्ते शृणु तस्य फलं आशया सदोपासितया अस्योपासकस्य सर्वे कामाः समृध्यन्ति समृद्धिं गच्छन्ति अमोघा हास्याशिषः प्रार्थनाः सर्वा भवन्ति यद्यत्प्रार्थितं सर्वं तत्तथा भवतीत्यर्थः यावदाशाया गतमित्यादि पूर्ववत् १४॥

छां० शां०
१०६

नामोपक्रमाशान्तं कार्यकारणत्वेन निमित्तनैमित्तिकत्वेन चोत्तरोत्तरभूयस्तयावस्थितं यस्मात्तन्निमित्तसद्भावमाशारशनापाशैः सर्वतो बिसमिव तन्तुभिर्यस्मिन्प्राणे समर्पितं येन च सर्वतो व्याप्तमन्तर्बहिर्गतेन सूत्रे मणिगणा इव सूत्रेण ग्रथितं विधृतं च स एष प्राणो वै आशाया भूयान् कथमस्य भूयस्त्वमित्याह दृष्टान्तेन समर्थयंस्तद्भूयस्त्वं यथा वै लोके रथस्यारा

प्राणो वा आशाया भूयान्यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितं प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाचार्यं वा ब्राह्मणं वा किंचिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीत्यथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समासं व्यतिषंदहेन्नैवैनं ब्रूयुः पितृहासीति न मातृहासीति न भ्रातृहासीति न स्वसृहासीति नाचार्यहासीति न ब्राह्मणहासीति प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत ॥१५॥

थनाभौ समर्पिताः प्रोताः संप्रवेशिता इत्येतदेवमस्मिन्लिंगसंघातरूपे प्राणे प्रज्ञात्मनि दैहिके मुख्ये यस्मिन्परा देवता नामरूपव्याकरणायादर्शादौ प्रतिबिंबवज्जीवेनात्मनानुप्रविष्टा यस्तु महाराजस्येव सर्वाधिकारी ईश्वरस्य कस्मिन्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा ॥१५॥

राम०
१०६

छां० शां०
१०७

ब्रह्मादिस्तंबपर्यंतस्य जगतः प्राण आत्माहमिति ब्रुवाणं यदि ब्रूयुरतिवाद्यसीति वाढमतिवाद्यस्मीति ब्रूयान्नापह्नुवीत कस्मा द्यसावेवं नापह्नुवीत यस्मात्प्राणं सर्वेश्वरमयमहमस्मीत्यात्मत्वेनोपगतः ॥१५॥ स एष नारदः सर्वातिशयं प्राणं स्वमात्मानं सर्वात्मानं श्रुत्वा नातः परमस्तीत्युपरराम न पूर्ववत्किमस्ति भगवः प्राणाद्भूय इति पप्रच्छ यतस्तमेवं विकारानृतब्रह्मज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शिष्यं मिथ्याग्रहविशेषाद्विप्रच्याव्यान्नाह भगवान् सनत्कुमारः

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति ॥१६॥

एष तु वा अतिवदति यमहं वक्ष्यामि न प्राणविदतिवादी परमार्थतो नामाद्यपेक्षं तु तस्यातिवादित्वं यस्तु भूमाख्यं सर्वातिक्रान्तं तत्त्वं परमार्थसत्यं वेद सोऽतिवादीत्यत आह एष तु वा अतिवदति यः सत्येन परमार्थसत्यविज्ञानवत्तयातिवदति सोऽहं त्वां प्रपन्नो भगवः सत्येनातिवदानीति तथा मां नियुनक्तु भगवान् यथाहं सत्येनातिवदानीत्यभिप्रायः यद्येवं सत्येनातिवदितुमिच्छसि सत्यमेव तु तावद्विजिज्ञासितव्यमित्युक्त आह नारदः तथास्तु तर्हि सत्यं भगवो विजिज्ञासे विशेषेण ज्ञातुमिच्छेयं त्वत्तो हमिति ॥१६॥

राम०
१०७

प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतेः यस्तु छायेवानुगतस्तं व्याचष्टे यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमे
वैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राणः प्राणः प्रज्ञात्मेति कौषीतकीनां अत एव तस्मिन्प्राणोऽसवै यथोऽरा
समर्पितं अत एव प्राणोऽग्रयरतंत्र प्राणो न स्वशक्त्यैव याति नान्यकृतं गमनादिक्रियास्वस्य सामर्थ्यमित्यर्थः सर्वक्रियाकारकफल
भेदजातं प्राणाख्यं प्राणाद्बहिर्भूतमस्तीति प्रकरणार्थः प्राणः प्राणं ददाति यद्ददाति तदात्मभूतमेव यस्मै ददाति तदपि प्राण एवा
तःपि त्राघाख्योपि प्राण एव कथं पित्रादिशब्दानां प्रसिद्धार्थोत्सर्गेण प्राणविषयत्वमित्युच्यते सति प्राणोपि त्रादिशुपित्रादिशब्द
प्रयोगात् नन्दुक्तां तो वा प्रयोगात्कथं तदित्याह स यः कश्चित् पित्रादीनामन्यतमं यदि भृशमिव त्वदनुरूपमिव किंचिद्वचनं त्वं
कारादियुक्तं प्रत्याह तदैनं प्रतियाऽर्थ्यस्थ आहुर्धिक्त्वेति धिगस्तु त्वामित्येवं पितृहा वै त्वमसि पितुर्हंतेत्यादि अथैनानेवोत्क्रांतप्राणा
न्त्यक्तदेहान्नाथान्यद्यपि शूलेन समासं समस्य व्यतिषंदहेन्नैव स एनं ब्रूयुः पितृहेत्यादि एवमतिक्रूरमपि कर्म समासव्यासादिप्रकारेणाद
हनलक्षणांतदेहसंबंधमेव कुर्वाणं नैवैनं ब्रूयुः पितृहेत्यादि तस्मादन्वयव्यतिरेकाभ्यामवगम्यते एतत्पित्राद्याख्योपि प्रा
ण एवेति तस्मात्प्राणो ह्येवैतानि पित्रादीनि सर्वाणि भवति चलानि स्थिराणि च स एष प्राणविदेवं यथोक्तप्रकारेण पश्यन् फ
लतोऽनुभवन्नेवं मन्वान उपपत्तिभिश्चिंतयन्नेवं विजानन्नुपपत्तिभिः संयोज्यैव मतिनिश्चयं कुर्वन्नित्यर्थः मननविज्ञानाभ्यां हि
संभृतः शास्त्रार्थो निश्चितो दृष्टो भवेत् अतएवंपश्यन्नतिवादी भवति नामाद्याशांतमतीत्य वदनशीलो भवतीत्यर्थः तं चेद् ब्रूयु
स्त्वमेवमतिवादीति नं सर्वेश्वरो ब्रूयुरतिवादी नामाद्याशांतमतीत्य वर्तमानं प्राणमेव वदत्येवं प्रपत्तमति वदनशीलमतिवादिनं
१

यदा वै सत्यं परमार्थतो विजानाति इदं परमार्थतः सत्यमिति ततोऽनृतं वाचारंभणं हि सर्वविकारावस्थं सदेवैकं सत्यमिति तरे
वा अथ वदति यद्वदति तत्तु विकारोऽपि सत्यमेव नामरूपेण संज्ञात्मनायं प्राणश्छन्नः प्राणा वै सत्यं तेषामेष सत्यमिति श्रुतेः
रात सत्यमुक्तं सत्यत्वं श्रुत्यंतरे विकारस्य न तु परमार्थापेक्षयामुक्तं किं तर्हि इंद्रियविषयाविषयत्वापेक्षया सच्च त्यच्चेति सत्यमित्युक्तं
तत्र द्वारेणाच परमार्थसत्यस्योपलब्धिर्विवक्षितेति प्राणा वै सत्यं तेषामेष सत्यमिति चोक्तमिहापि तदिष्टमेव इदं तु प्राणविष

यदा वै विजानात्यथ सत्यं वदति नाविजानन्सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति
विज्ञानं भगवो विजिज्ञास इति १७ ॥

यः परमार्थसत्यविज्ञानाभिमानात्सुच्छायनादं यत्सदेव सत्यं परमार्थतो भूमाख्यं तद्विज्ञायपि व्यामीत्येष विशेषतो [illegible]
विवक्षितोर्थः नाविजानन्सत्यं वदति यस्त्वविजानन् वदति सोऽन्यादिशब्देनान्यादीन्परमार्थसद्रूपान्मन्यमानो वदति न तु ते रूपे त्र या
न्त्स सत्यविज्ञानमविजिज्ञासितमप्राप्यमिति ज्ञायत इत्याह विज्ञानं त्वेव विजिज्ञासितव्यमिति यद्येवं विज्ञानं भगवो विजिज्ञास इति
वं सत्यादीनां चोत्तरोत्तराणां कर्मणां तानां पूर्वपूर्वहेतुत्वं व्याख्येयं ॥१७॥

छां० भा०
१०८

यदा वै मनुत इति मतिर्मननं तर्कः मन्तव्यविषय आदरः आस्तिक्यबुद्धिः श्रद्धा निष्ठा गुरुशुश्रूषादितत्परत्वं ब्रह्मविज्ञानाय १८
१९ २० यदा वै करोतीति कृतिरिन्द्रियसंयमः चित्तैकाग्रताकरणं च सत्यां हि तस्यां निष्ठादीनि यथोक्तानि भवन्ति विज्ञानावसानानि २१
सापि कृतिर्यदा सुखं लभते सुखं निरतिशयं वक्ष्यमाणं मया लब्धव्यमिति मन्यते तदा भवति यथा दृष्टफलसुखा कृतिस्त
थेहापि नासुखं लब्ध्वा करोति भविष्यदपि फलं लब्ध्वेत्युच्यते तदपि ... अथेदानीं कृत्यादिषूत्तरोत्तरेषु सत्सु

यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति १८ यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति १९ यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति २० यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति कृतिं भगवो विजिज्ञास इति २१ यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति २२ यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥२३॥

वन्ति मा स्पतेन तद्धि ज्ञानायप्रथक्‌प्रयत्नः कार्य इति प्राप्तं तत इदमुच्यते सुखं त्वेव विजिज्ञासितव्यमित्यादि सुखं भगवो विजिज्ञास इ
त्यभिमुखीभूताया ह २२ यो वै भूमा महन्निरतिशयं बह्विति पर्यायाः तत्सुखं ततो र्वाक्‌ सातिशयत्वादल्पं अतस्तस्मिन्सुखं नास्ति
अल्पस्याधिकतृष्णाहेतुत्वात्तृष्णा च दुःखबीजं न हि दुःखबीजं सुखं दृष्टं ज्वरादि लोके तस्मात् युक्तं नाल्पे सुखमस्तीति अतो भूमैव सुखं तृष्णादि

नहि दुःखबीजं

रामा०
१०८

किंलक्षणोऽसौ भूमेत्याह यत्र यस्मिन्भूम्नि तत्त्वे नान्यद्द्रष्टव्यमन्येन करणेन द्रष्टान्यो विभक्तो दृश्यात्पश्यति तथा नान्य
च्छृणोति नाम रूपयोरेवान्तर्भावाद्विषयभेदस्य तद्ग्राहकयोरेवेह दर्शनश्रवणयोर्ग्रहणमन्येषां चोपलक्षणार्थत्वेन मननं त्व
त्र नोक्तं मत्वा ह्यन्यद्विजानाति प्रायशो मननपूर्वकत्वाद्विज्ञानस्य तथा नान्यद्विजानाति एवंलक्षणो यः स भूमा किमत्र प्र
सिद्धान्यदर्शनाभावो भूम्न्युच्यते नान्यत्पश्यतीत्यादिना ... तत्र किं बातो ... नाभाव मात्र
मिरूप्यते ... व्यवहारविलक्षणो भूमेत्येतदनेन भवति अथान्यदर्शनविशेषप्रतिषेधे ... पश्यतीत्युच्यते तदेकस्मिन्

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै
भूमा तदमृतमथ यदल्पं तन्मर्त्यं स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति गोअश्वमिह महि
मेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रति
ष्ठित इति २४॥

क्रियाकारकफलमेदोऽभ्युपगतो भवेत् यद्येवं को दोषः स्यात् ननु अयमेव दोषः संसाराविवृत्तिः क्रियाकारकफलभेदो हि संसार
स्तस्मिन्नेकत्व एव क्रियाकारकफलभेदः संसारविलक्षण इति चेन्न आत्मनो निर्विशेषैकत्वाभ्युपगमे दर्शनादिक्रियाकारकफलभेदाभ्यु
पगमस्य शब्दमात्रत्वात् अन्यदर्शनाद्यभावोक्तिपक्षेऽपि यत्र ... न पश्यतीति च विशेषणमनर्थकं स्यादिति चेत् दृश्यते हि लोके
यत्र ... हे ... पश्यतीत्यादिना ... च नन्वपश्यतीति गम्यते एवमिहापीति चेत् न तत्त्वमसीत्येकत्वोपदेशात् अधि

घां० शं०
१०९

नुपपत्तेः तथासदेकमेवाद्वितीयं सत्यमितिषष्ठे निर्द्धारितत्वात् अदृश्येनात्म्येन सदृशे तिष्ठति रूपमस्य विज्ञातारमरे केन विजा
नीयादित्यादिश्रुतिभ्यः आत्मनि दर्शनाद्यनुपपत्तिः यत्रेति विशेषणमनर्थकं प्राप्तमिति चेत न अविद्याकृतभेदापेक्षत्वात् यथासंख्या लैक
द्वितीयत्वबुद्धिप्रकृतामपेक्ष्य सदेकमेवाद्वितीयमिति संख्याघनहेमप्युच्यते एवं भूम्न्येकस्मिन्नेव यत्रेति विशेषणमविद्यावस्था
यामन्यदर्शनानुवादेन भूम्नस्तदभावत्वलक्षणस्य विवक्षितत्वात् नान्यत्पश्यतीति विशेषणं तस्मात्संसारव्यवहारो भूम्नि नास्ती ति
तिसमुदायार्थः यत्राविद्याविषयेऽन्योऽन्यत्पश्यतीति तदल्पमविद्याकालभावीत्यर्थः यथा स्वप्नदृश्यं वस्तु प्राक्प्रबोधात्तत्कालभावी
नित द्रष्टृत तत एव तन्मर्त्यं विनाशि स्वप्नवस्तुवदेव तद्विपरीतो भूमा यस्तदमृतं तच्छब्दो मृतत्वपरः सन्नेवं लब्धो भूमा हे भगवो
भगवन्कस्मिन्प्रतिष्ठित इत्युक्तवन्तं नारदं प्रत्याह सनत्कुमारः स्वे महिम्नीति स्वे आत्मीये महिम्नि माहात्म्ये विभूतौ प्रतिष्ठितो भूमा य
दि प्रतिष्ठामिच्छसि क्वचित् यदि वा परमार्थमेव पृच्छसि न महिम्न्यपि प्रतिष्ठित इति ब्रूमः अप्रतिष्ठितोऽनाश्रितो भूमा क्वचिदपीत्यर्थः
यदि स्वमहिम्नि प्रतिष्ठितो भूमा कथं तर्हि अप्रतिष्ठ उच्यते शृणु गोअश्वादि इह महिमेत्याचक्षते गावोऽश्वाश्च गोअश्वं द्वन्द्वैकवद्भावः सर्वत्र
गावाश्वादि महिमेति प्रसिद्धं तदाश्रितस्तत्प्रतिष्ठश्चैत्रो भवति यथा नाहमेवं स्वतोऽन्यं महिमानमाश्रितो भूमा चैत्रवदिति ब्रवीमि कस्मात्तु हेतुत्वे
नान्यो ह्यन्यस्मिन्प्रतिष्ठित इति व्यवहितेन संबंधः किं त्वेवं ब्रवीमीति ह होवाच स एवेत्यादि ॥२४॥

२२०

रामo
१०९

कस्मात्पुनः क्वचिन्न प्रतिष्ठित इत्युच्यते यस्मात्स एव भूमाधस्ता[illegible] न तद्व्यतिरेकेणान्यद्विद्यते यस्मिन्प्रतिष्ठितः स्यात् तत्त्वोपरिष्टाध्या
दिसमानं सति भूम्नोऽन्यस्मिन् भूमा हि प्रतिष्ठितः स्यात् न तु तदस्ति स एव तु सर्वमतस्तस्मादसौ न क्वचित्प्रतिष्ठितो यत्र नान्यत्पश्यती स
स्थिकारणाधिकर्त्तव्यतानिर्देशात् स एवाधस्तादिति च परोक्षनिर्देशात् द्रष्टुर्जीवादन्यो भूमा स्यादित्याशंकाकस्यचिन्मा भूदिति अथा तो

पु

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेद सर्वमित्यथातोऽहंकारा
देश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेद सर्व
मित्यथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आ
त्मैवेद सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानंदः
स स्वराड्भवति तस्य सर्वेषु लोकेषु [illegible] कामचारो भवत्यथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भ
वंति तेषां सर्वेषु लोकेष्वकामचारो भवति ॥२५॥

तोऽनंतरं अहंकारादेशोऽहंकारादेशो द्रष्टुरनन्यत्वदर्शनार्थं भूमैव निर्दिश्यते अहंकारेणाहमेवाधस्तादित्यादिनाऽहंकारेण देहादिसंघातोऽप्या
दिश्यते ऽविवेकिभिरित्यतस्तदाशंकामा भूदित्यथानंतरमात्मादेश आ ॥ [illegible] ॥

२२१

त्मनैव केवलेन सत्स्वरूपेणाशुद्धेनादिश्यते आत्मैव सर्वतः सर्वमित्येवमेकमजं सर्वतो व्योमवत्पूर्णमन्यशून्यं पश्यन्स वै एष विद्वा
न्मनन्विजानन्नात्मा आत्मरतिरात्मन्येव रतिः रमणं यस्य सोयमात्मरतिस्तथात्मक्रीडो देहमात्रसाधना रतिर्बाह्यसाधना क्रीडा लोके
स्त्रीभिः सखिभिश्च क्रीडतीति दृश्यते न तथा विदुषः किं तर्ह्यात्मविज्ञाननिमित्तमेवोभयमित्यर्थः मिथुनं द्वंद्वजनितं सुखं त
दपि द्वंद्वनिरपेक्षं यस्य विदुषस्तथात्मानंदः शब्दादिनिमित्त आनंदोऽविदुषां न तस्य विदुषः किं तर्ह्यात्मनिमित्तमेव सर्वं सर्वदा स
र्वप्रकारेण च देहजीवितभोगादिनिमित्तबाह्यवस्तुनिरपेक्ष इत्यर्थः स एवंलक्षणो विद्वान्जीवन्नेव स्वाराज्येऽभिषिक्तः पतिते च
देहे स्वराडेव भवति यत एवं तस्य सर्वेषु लोकेषु कामचारो भवति प्राणादिषु पूर्वभूमिषु तत्रास्येति जावन्मात्रपरिच्छिन्नकामचा
रत्वमुक्तमन्यराजत्वं चार्थं प्राप्तं स्वातिशायत्वात् यथाप्राप्तस्वाराज्यकामचारत्वानुवादेन तन्निवर्तिर्ह्युच्यते स स्वराडित्यादिना अ
थ पुनर्ये तद्यथातद्दर्शनात् अन्यथा वैपरीत्येन यथोक्तमेव वा सम्यक् न विदुस्ते अन्यराजानो भवंति अन्यः परो राजा स्वामी येषां तेऽन्यराजान
स्ते किंच क्षय्यलोकाः येषां ते क्षय्यलोकाः भेददर्शनस्याल्पविषयत्वात् अल्पं च तन्मर्त्यमित्यवोचाम तस्मात् ये द्वैतदर्शिनस्ते
क्षय्यलोकाः स्वदर्शनानुरूपेणैव भवंत्यत एव तेषां सर्वेषु लोकेष्वकामचारो भवति ॥ २६ ॥

तस्य ह वा एतस्येत्यादि स्वाराज्यप्राप्तस्य प्रकृतस्य विदुष इत्यर्थः प्राक्सदात्मविज्ञानात् स्वात्मनोऽन्यस्मात्सतः प्राणादेर्नामान्तस्यो
त्पत्तिप्रलयावभूतां न दात्मज्ञाने तु सतीदानीं स्वात्मत एव संवृत्तौ तथा सर्वोऽप्यन्यो व्यवहार आत्मत एव विदुषः किं च तदेतस्मिन्नर्थे

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मत आ
काश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यान
मात्मतश्चित्तमात्मतः संकल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मंत्रा आत्मतः कर्माण्यात्मत एवेदं सर्वमि
ति तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति
स एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधा चैव पुनश्चैकादश स्मृतः शतं च दश चैकश्च सहस्राणि च वि
शतिराहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्षस्तस्मै मृदितकषायाय त
मसस्पारं दर्शयति भगवान्सनत्कुमारस्तं स्कंद इत्याचक्षते तं स्कंद इत्याचक्षते २६ ॥ इतिछान्दोग्योपनिषदि

सप्तमप्रपाठकः

एष श्लोको मंत्रो भवति न पश्यः पश्यतीति पश्यो यथोक्तदर्शी विद्वानित्यर्थः मृत्युं मरणं रोगं ज्वरादि दुःखतां दुःखभावं चापि न प
श्यति सर्वं ह सर्वमेव स पश्यः पश्यत्यात्मानमेव सर्वं ततः सर्वमाप्नोति सर्वशः सर्वप्रकारैरिति किंच स विद्वान्प्राक्सृष्टिभेदात्॥

एकधैव भवति [illegible]कधैव च सन् त्रिधादिभेदैरनन्तभेदप्रकारो भवति सृष्टिकाले पुनः संहारकाले मूलमेवैकं स्वपारमार्थिकमेकधा भावं प्रतिपद्यते स्वतन्त्र एवेति विद्याफलेन प्ररोचयन्स्तौति अथेदानीं यथोक्ताया विद्यायाः सम्यगवभासकारणं मुखावभासकारणस्येवादर्शस्य विशुद्धिकारणं साधनमुपदिश्यते आहारशुद्धौ आह्रियत इत्याहारः शब्दादिविषयविज्ञानं भोक्तुर्भोगायाह्रियते तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धिः रागद्वेषमोहैरसंसृष्टं विषयविज्ञानमित्यर्थः तस्यामाहारशुद्धौ सत्यां तद्वतोऽन्तःकरणस्य सत्त्वस्य शुद्धिर्नैर्मल्यं भवति सत्त्वशुद्धौ च सत्यां यथावगते भूम्न्यात्मनि ध्रुवाऽविच्छिन्ना स्मृतिरविस्मरणं भवति तस्यां च लब्धायां स्मृतिलम्भे सर्वेषामविद्याकृतानामनर्थपाशरूपाणामनेकजन्मान्तरानुभवभावनाकठिनीकृतानां हृदयाश्रयाणां ग्रन्थीनां विप्रमोक्षो विशेषेण प्रमोक्षणं विनाशो भवतीति यत एतदुत्तरोत्तरं यथोक्तमाहारशुद्धिमूलं तस्मात्सा कार्येत्यर्थः सर्वं शास्त्रार्थमशेषत उक्त्वाप्याख्यायिकामुपसंहरति श्रुतिः तस्मै मृदितकषायाय वार्क्ष्यादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रञ्जनारूपत्वात्तं ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितं मृदितं [illegible] विनाशितं यस्य नारदस्य तस्मै योग्याय मृदितकषायाय तमसोऽविद्यालक्षणात्पारं परमार्थतत्त्वं दर्शयति दर्शितवानित्यर्थः कोऽसौ भगवानुत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति स एव सनत्कुमारः तमेव सनत्कुमारं देवं स्कन्द इत्याचक्षते कथयन्ति तद्विदः द्विर्वचनमध्यायपरिसमाप्त्यर्थं ॥ इति श्रीशंकराचार्यभगवत्कृते छांदोग्योपनिषद्भाष्ये सप्तमः प्रपाठकः ७ ॥

यद्यपि दिग्देशकालादिभेदशून्यं ब्रह्म सदेकमेवाद्वितीयमात्मैवेदं सर्वमिति षष्ठसप्तमयोरधिगतं तथापीह मन्दबुद्धीनां दिग्देशादिभेदवद्वस्त्विति एवं भाविता बुद्धिर्न शक्यते सहसा परमार्थविषया कर्तुमित्यनधिगम्य च ब्रह्म न पुरुषार्थसिद्धिरिति तदधिगमाय हृदयपुण्डरीकदेश उपदेष्टव्यः यद्यपि सत्सम्यक्प्रत्ययैकविषयं निर्गुणं चात्मतत्त्वं तथापि मन्दबुद्धीनां गुणवत्त्वस्येष्टत्वात्सत्यकामादिगुणवत्त्वं च वक्तव्यं तथा यद्यपि ब्रह्मविदां स्त्र्यादिविषयेभ्यः स्वयमुपरमो भवति तथाप्यनेकजन्मविषयसेवाभ्यासजनिता विषयतृष्णा न सहसा निवर्तयितुं शक्यत इति ब्रह्मचर्यादिसाधनविशेषो विधातव्यः तथा यद्यप्यात्मैकत्वविदां गन्तृगमनगन्तव्याभावादविद्यादिशेषस्थितिनिमित्तक्षये गगन इव विद्युदुद्भूतेव वायुर्दग्धेन्धन इवाग्निः स्वात्मन्येव निवृत्तिः तथापि गन्तृगमनादिवासितबुद्धीनां हृदयदेशगुणविशिष्टब्रह्मोपासकानां मूर्धन्यया नाड्या गतिर्वक्तव्येत्यष्टमः प्रपाठक आरभ्यते दिग्देशगु

अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश[illegible]स्तस्मिन्यदन्तस्तदन्वेष्टव्यं।

णगतिफलभेदशून्यं हि परमार्थसदद्वयं ब्रह्म मन्दबुद्धीनामसदिव प्रतिभाति सन्मार्गस्थास्तावद्भवन्तु ततः शनैः परमार्थसदपि ग्राहयिष्यामीति मन्यते श्रुतिः अथानन्तरं यदिदं वक्ष्यमाणं दहरमल्पं पुण्डरीकं पुण्डरीकसदृशं वेश्मेव वेश्म द्वारपालादिमत्त्वात् अस्मिन्ब्रह्मपुरे ब्रह्मणः परस्य पुरं राज्ञोऽनेकप्रकृतिमद्यथा पुरं तथेदमनेकेन्द्रियमनोबुद्धिभिः स्वाम्यर्थकारिभिर्युक्तमिति ब्रह्मपुरं पुरे च वेश्म राज्ञो यथा तस्मिन्ब्रह्मपुरे शरीरे दहरं वेश्म ब्रह्मण उपलब्ध्यधिष्ठानमित्यर्थः यथा विष्णोः शालग्रामः अस्मिन्हि स्वविकारशुङ्गे देहे नामरूपव्याकरणाय प्रविष्टं सदाख्यं ब्रह्म जीवेनात्मनेत्युक्तं तस्मादस्मिन्हृदयपुण्डरीके वेश्मन्युपसंहृतकरणैर्ब्रह्मविषयविरक्तैर्विशेषतो ब्रह्मचर्यसत्यसाधनाभ्यां युक्तैर्वक्ष्यमाणगुणवद्ध्यायमानैर्ब्रह्मोपलभ्यत इति प्रकरणार्थः दहरोऽल्पतरो वेश्मनोऽल्पत्वात्तद

र्वर्तिनोऽल्पतरत्वं वेश्मनोऽन्तराकाशः आकाशाख्यं ब्रह्म आकाशो वै
नामेति श्रुतेः आकाशवदशरीरत्वात्॥

छां० शं०
११२

226

सूक्ष्मत्वं सर्वगतत्वं सन्मात्रत्वं तस्मिन्नाकाशे ध्येयं तस्मै यदन्तस्तदन्वेष्टव्यं तद्वाव तदेव च विशेषेण विजिज्ञासितव्यं गुर्वाश्रयश्रवणाद्यु पायैरन्विष्य च साक्षात्करणीयमित्यर्थः। तं चेदेवमुक्तवंतमाचार्यं यदि ब्रूयुरंतेवासिनश्चोदयेयुः कथं यदिदमस्मिन्ब्रह्मपुरे परि च्छिन्नं तद्दहरं पुंडरीकं वेश्म ततोऽप्यल्पतरो वाकाशः पुंडरीकान्तर्वेश्मनि तावत्किं स्यात् किं ततोऽल्पतरे खे पुंडरीके दिशादूरं दह रोऽस्मिन्नंतराकाशः किं तदत्र विद्यते न किंचन विद्यत इत्यभिप्रायः यदि नाम बदरमात्रं किमपि विद्यते किं तस्यान्वेषणेन वि जिज्ञासनेन वा फलं विजिज्ञासितुं स्यादतो यत्तत्रान्वेष्टव्यं विजिज्ञासितव्यं वा न तेन प्रयोजनमित्युक्तवतः स आचार्यो ब्रूयादिति श्रुतेर्व

तद्वाव विजिज्ञासितव्यमिति तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति॥

दहराल्पत्वा

चनं शृणुत तत्र यद्भवद्भिः पुंडरीकान्तस्थमल्पतरं स्यादिति न तदस्ति नहि खं पुंडरीकवेश्मगतं पुंडरीकाल्पतरं मत्वावोचं दहरोऽस्मि न्नंतराकाश इति किं तर्हि पुंडरीकमल्पं तदनुविधायित्वं तस्यान्तःकरणं पुंडरीकाकाशपरिच्छिन्नं तस्मिन्नशुद्धे संहृतकरणानां योगिनां स्वच्छ इवोदके प्रतिबिंबरूपमादर्श इव च शुद्धे स्वच्छं विज्ञानज्योतिःस्वरूपावभासं तत्त्वं तावन्मात्रं ब्रह्मोपलभ्यत इति द हरोऽस्मिन्नंतराकाश इत्यवोचामांतःकरणोपाधिनिमित्तं स्वतस्तु यावान्वै प्रसिद्धः परिमाणतोऽयमाकाशो भौतिकस्तावानेषोऽन्तर्हृ दय आकाशो यस्मिन्नन्वेष्टव्यं विजिज्ञासितव्यं चावोचाम न त्वाकाशजलयोः परिमाणसमभिप्रेत्य तावानित्युच्यते किं तर्हि ब्रह्मणो

छां०
११२

येनावृतं खं च दिवं मही च तस्माद्धारात्तस्मादात्मन आकाशः संभूतः एतस्मिन्नु खल्वक्षरे गार्ग्याकाश इत्यादिश्रुतिभ्यः किं चोभे

पा

अस्मिन्द्यावापृथिवी ब्रह्माकाशे बुद्ध्युपाधिविशिष्टेऽन्तरेव समाहिते सम्यगाहिते स्थिते यथा वा अरा नाभौ विस्तृते हि तथोभाव

न

ग्निश्च वायुश्चेत्यादि समानं यच्चास्यात्मन आत्मीयत्वेन देहवतो विद्यत इह लोके तथा यच्चात्मीयत्वेन न विद्यते नष्टं च भविष्यच्च ना स्तीत्युच्यते न त्वत्यंतमेवासत्तत्सर्वं दृष्टाकाशे समाधानानुपपत्तेः तं चेदेवमुक्तवंतं ब्रूयुः पुनरंतेवासिनोऽस्मिंश्चेत् यथोक्तं चेत्

ब्रह्मपुरो

यदि ब्रह्मपुरे यदुपलक्षितं तदाकाश इत्यर्थः इदं सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः कथमाचार्येणानुक्ताः कामाः अंतेवा

न्

स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते उभाव ग्निश्च वायुश्च सूर्याचंद्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितमि ति तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरा वाप्नो ति प्रध्वंसते वा किं ततोऽतिशिष्यत इति॥

227

सिभिरुच्यंते नैष दोषः यच्चास्येहास्ति यच्च नास्तीत्युक्तत्वादाचार्येण कामा अपि च सर्वे शब्देनोक्ता एव कामाः यदा यस्मिन्का ले एतच्छरीरं जरा वलीपलितादिलक्षणा वयोहानिर्वा प्राप्नोति शस्त्रादिना वा प्रध्वंसते विध्वंसते विनश्यति किं ततोऽतिशि ष्यते घटाद्याश्रितक्षीरदधिस्नेहादिवत् घटनाशे देहनाशेऽपि देहाश्रयमुत्तरोत्तरं पूर्वपूर्वनाशान्नश्यतीत्यभिप्रायः एवं प्राप्ते ना शं किं ततोऽन्यत्परिशिष्यत इति न किंचनावतिष्ठत इत्यभिप्रायः एवमंतेवासिभिश्चोदित आचार्यो ब्रूयात् तन्मतिमपनय न् कथं अस्य देहस्य जरया न तद्यथोक्तमंतराकाशाख्यं ब्रह्म यस्मिन्सर्वं समाहितं॥

छां० शं०
११३

नजीर्यति देहवन्न विक्रियत इत्यर्थः न चास्य वधेन शस्त्राद्यभिघातेनैतद्धन्यते यथाकाशं किमुत तेनापेक्षता । मशकस्य स्यैव ब्रह्मणो देहे
द्रियादिदोषैर्न स्पृश्यत इत्यर्थः कथं देहादिदोषैर्न स्पृश्यत इत्येतस्मिन्नवसरे वक्तव्यं प्राप्तं तदप्रकृतत्वात्संक्षेपमाह इति नोच्यते इ
दं विरोचनाख्यायिकायामुपरि व्यक्ष्यामो युक्तितः एतत्सत्यमवितथं ब्रह्मपुरं ब्रह्मैव पुरं ब्रह्मपुरं शरीराख्यं तु ब्रह्मपुरं
ब्रह्मोपलक्षणार्थत्वात् तत्तु अनृतमेव वाचारंभणं विकारो नामधेयमित्यादिश्रुतेः तद्धि कारणं तत्रापि देह इत्युपगतं ब्रह्मोपलभ्यत इ
ति ब्रह्मपुरमित्युक्तं व्यावहारिकं सत्यं तु ब्रह्मपुरमेतदेव ब्रह्म सर्वव्यवहारास्पदत्वात् अतोऽस्मिन्पुंडरीकोपलक्षिते सर्वे का
मा वाह्यैर्वस्तुभिः प्रार्थ्यंते ऽस्मिन्नेव स्वात्मनि समाहिताः अतस्तत्प्राप्त्युपायमेवानुतिष्ठत वाह्यविषयतृष्णां त्यजतेत्यभि
प्रायः एष आत्मा भवतां स्वरूपं श्रृणुत तस्य लक्षणम् अपहतपाप्मा धर्माधर्माख्यो यस्य सोयमपहतपाप्मा तथा विजरो विजरावि

सब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्मापहतपाप्मा
विजरो विमृत्युर्विशोको ऽविजिघत्सोऽपिपासः सत्यकामः [illegible] सत्यसंकल्पो ॥

मृत्युश्चोक्तं पूर्वमेव न वधेनास्य हन्यत इति किमर्थं पुनरुच्यते यद्यपि देहसंबंधिभ्यां जरामृत्युभ्यां न संबध्यते अन्यथापि संबंधस्ताभ्यां
स्यादित्याशंकानिवृत्त्यर्थं विशोको विगतशोकः शोको नामेष्टादिवियोगनिमित्तो मानसः संतापः विजिघत्सो विगताशनेच्छः अपिपा
सोऽपानेच्छः ननु अपहतपाप्मत्वेन जरादयः शोकांताः प्रतिषिद्धा एव भवंति कारणप्रतिषेधात् धर्माधर्मकार्या हि ते इति जरादिप्रति
षेधेन वा धर्माधर्मयोः कार्याभावे विद्यमानयोरप्यसत्समत्वमिति पृथक्प्रतिषेधोऽनर्थकः स्यात् सत्यमेवं तथापि धर्मकार्यो न द्रष्टव्यः
तिरेकेणापि स्वाभाविकानंदो यथेश्वरे विज्ञानमानंदं ब्रह्मेति श्रुतेः तथाऽधर्मकार्यजराद्यव्यतिरेकेणापि जरादिदुःखरूपं स्वाभाविकं
स्यादित्याशंकानिवृत्तये जरादीनां धर्माधर्माभ्यां पृथक्प्रतिषेधः जरादिग्रहणं सर्वदुःखोपलक्षणार्थं पापनिमित्तानां दुःखाना
मानंत्यात् प्रत्येकं च तत्प्रतिषेधस्याशक्यत्वात् सर्वदुःखप्रतिषेधार्थं युक्तमेवापहतपाप्मत्वं सत्याः अवितथाः कामा यस्य सोयं सत्य

रामा०
११३

...हसत्त्वोपाधिनिमित्ता ईश्वरस्य चित्रगुवत् स्वतः नेति नेत्युक्तत्वात् यथोक्तलक्षणा
त्मा संकल्पा यस्य सत्यसंकल्पः संकल्पाः कामाश्च अव्यभिचारिणः न चेद्विज्ञायते को दोषः स्यादिति अत्रैवं तु दोषं दृष्टांतेन यथात्रैवेह लो
क आत्मा विज्ञेयो गुरुभ्यः शास्त्रतश्च आत्मसंवेद्यतया स्वाराज्यकामैर्न चेद्विज्ञायते स्वामिनं मन्यमाना यस्य स्वामिनोऽपख्याय यथानुशासनं तत्र यथा अन्वावि
के प्रजा अन्वाविशंति अनुवर्तंते यथानुशासनं यथेह प्रजा अन्यं स्वामिनं मन्यमानास्तस्य स्वामिनोऽपख्यायं यथानुशासनं तत्र यथा न्वावि
शंति किंयं यमंतं प्रत्यंतं जनपदं क्षेत्रभागं चाभिकामार्थी सो भवंत्याज्ञानुरूपं तं तमेव च प्रत्यंतादिमुपजीवंति ते च इष्टो नोदाहृतं अस्ये
शेति किंयं यमंतं ... तत्र यथेह लोके तासामेव स्वाम्यनुशासनानुवर्तिनीनां प्रजानां से
वे प्रतिपुण्यफलोपभोगः अथान्योऽदृष्टांतस्तत्क्षयं प्रतिपद्यते इह स्यादित्यत्र यथेह राजसेवया एव मेवामुत्राग्निहोत्रादिपुण्यजितो लो
वादिकर्मजितो लोकः पराधीनो यभोगः क्षीयते ऽतवान् भवति अथेदानीं दार्ष्टांतिकमुपसंहरति एवमेवामुत्राग्निहोत्रादिपुण्यजितो लो

यथाह्येवेह प्रजा अन्वाविशंति यथानुशासनं यंयमंतमभिकामा भवंति यं जनपदं यं क्षेत्रभागं तंतमेवोपजीवंति तद्यथेह
कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते तद्य इहात्मानमननुविद्य व्रजंत्येतांश्च सत्यान्कामांस्ते
षां सर्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भ
वति ।

कः पराधीनोपभोगः क्षीयत एव तस्मात् दोष एवामिति विषयं दर्शयति तद्य इत्यादिना तत्र इहास्मिंल्लोके यानकर्मणोऽधिकृताः योग्याः
संत आत्मानं यथोक्तलक्षणं शास्त्राचार्योपदिष्टमननुविद्य यथोपदेशमनुपलभ्य आत्मसंवेद्यतामकृत्वा व्रजंति देहादस्मात्प्रयांति ये एतां
श्च यथोक्तान् सत्यान् संकल्पकार्यान् भस्मान्सत्यानकामान्न ननु विद्य व्रजंति तेषां सर्वेषु लोकेष्वकामचारोऽस्वतंत्रता भवति
यथा राजानुशासनवर्तिनां प्रजानामित्यर्थः अथ येऽत्र इह लोके आत्मानं शास्त्राचार्योपदेशमनुविद्य स्वात्मसंवेद्यतामापाद्य व्रजंति
यथोक्तांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवति राजेव सार्वभौमस्येह लोके १ ॥

पितृलोकयोगेन

कथं सर्वेषु लोकेषु कामाचारो भवतीत्युच्यते आत्मानं यथोक्तलक्षणं हृदि साक्षात्कृतवानवस्थमाणब्रह्मचर्यादिसाधनसंपन्नः सन्नन्तरस्थोऽस्य सत्यान्कामान्संकल्पकृतेहोयदिपितृलोककामः पितरो जनयितारः तदेव सुखहेतुत्वेन भोग्यत्वात्लोक उच्यते तेषु कामो यस्यैतैः पितृभिः संबन्धेच्छा यस्य भवति तस्य संकल्पमात्राद्देवपितरः समुत्तिष्ठन्ति आत्मसंबन्धितामापद्यन्ते विशुद्धसत्वत्वात्संकल्पस्य तादीश्वरस्येव तेनात्पितृलोकेन संपन्नः संपादितरिष्टप्राप्तिस्तया समृद्धो महीयते पूज्यते वर्द्धते वा महिमानमनुभवति

स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते ॥ अथ यदि मातृलोककामो भवति संकल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन संपन्नो महीयते ॥ अथ यदि भ्रातृलोककामो भवति संकल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति तेन भ्रातृलोकेन संपन्नो महीयते ॥ अथ यदि स्वसृलोककामो भवति संकल्पादेवास्य स्वसारः समुत्तिष्ठन्ति तेन स्वसृलोकेन संपन्नो महीयते ॥ अथ यदि सखिलोककामो भवति संकल्पादेवास्य सखायः समुत्तिष्ठन्ति तेन सखिलोकेन संपन्नो महीयते ॥ अथ यदि गंधमाल्यलोककामो भवति संकल्पादेवास्य गंधमाल्ये समुत्तिष्ठतस्तेन गंधमाल्यलोकेन संपन्नो महीयते ॥ अथ यद्यन्नपानलोककामो भवति संकल्पादेवास्यान्नपाने समुत्तिष्ठतस्तेनान्नपानलोकेन संपन्नो महीयते ॥ अथ यदि गीतवादित्रलोककामो भवति संकल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन संपन्नो महीयते ॥ अथ यदि स्त्रीलोककामो भवति संकल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन संपन्नो महीयते ॥ यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते २ ॥

मानमन्यत्समानरोजनयित्र्योः अतीतान्सुखहेतुभूताः स्यात्सम्यग्भावात् नहि दुःखहेतुभूतास्वगाम सूकरादिजन्मनिमित्तामातृषु विशुद्धसत्वस्य योगिनः ॥ एवमितरेष्वपि संबन्धो वा युक्तो यं यमन्तं प्रदेशमभिकामो भवति यं च कामं कामयते यथोक्तव्यतिरेकेणापि सोऽस्य

यथोक्तात्मध्यानसाधनानुष्ठानं प्रतिसाधकत्वामुत्साहजननार्थं मनुक्तोऽशंस्याह कष्टमिदं खलु वर्त्तते यत्स्वात्मस्थाः शक्यप्राप्या अपि न इमे सत्याः कामा अनृतापिधाना तेषामात्मस्थानां सत्यानामयथार्था मे वसतामनृतं बाह्यविषयेषु भ्रमन्भोजनाच्छादनादिषु तृष्णातन्निमित्तं चास्येच्छाप्रचारस्त्वमिथ्याज्ञाननिमित्तत्वादनृतमित्युच्यते तन्निमित्तं सत्यानां कामानामप्रत्यक्षपिधानमिवापिधानं कथमनृतापिधानानिमित्तं तेषामलाभ इत्युच्यते यो यो हि यस्माद्दस्य जन्तोः पुत्रो भ्राता वा इष्ट इतोऽस्माल्लोकात्प्रैति प्रगच्छति म्रियते तमिष्टं पुत्रं भ्रातरं वा स्वप्नाकाशे विद्यमानमपि इह पुनर्दर्शनाय न लभते अथ पुनर्ये चास्य विदुषो जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दते इह लोके वस्त्रान्नपानादिवा वस्त्विच्छन्न लभते तत्सर्वमत्रास्मिन्हृदयाकाशाख्ये ब्रह्मणि लाय

तद्विमे सत्याः कामा अनृतापिधानास्तेषां सत्यानां सतामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥ अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः ॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥ अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥ तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्सत्तदमृतमथ [illegible] यत्तीति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति ३ ॥

तेन

२

यथोक्तेन विधिना विन्दते लभते अत्रास्मिन्हार्दाकाशे हि यस्मादस्यैते यथोक्ताः सत्याः कामा वर्त्तन्ते अनृतापिधानाः कथमिव इत्युच्यते तत्र यथा हिरण्यनिधिं हिरण्यमेव पुनर्ग्रहणाय निधातृभिर्निधीयत इति निधिस्तं निहितं भूमेरधस्तान्निक्षिप्तमक्षेत्रज्ञा निधिशास्त्रनिधिक्षेत्रमजानन्तस्तेनिधेरुपर्युपरि संचरन्तोऽपि न विन्देयुः शक्यवेदनमपि एवमेवेमा अविद्यावत्यः सर्वा इमाः प्रजाः

यथोक्तं हृदयाकाशाख्यं ब्रह्मलोकं ब्रह्मैव लोकस्तमहरहः प्रत्यहं गच्छन्त्योऽपि सुषुप्तिकाले न विंदन्ति न लभंत एषोऽहं ब्रह्मलोकभाव
मापन्नोऽस्मीत्यद्येति कुतोऽन्तनेन हि यस्मात्प्रत्यूढा हृता स्वरूपाद्विद्यादोषैर्बहिरपकृष्टा इत्यर्थः अतः कष्टमिदं वर्त्तते जंतूनां यत्स्व
यमात्मा ब्रह्म न लभ्यत इत्यभिप्रायः स वै य आत्मा यः हृतपाप्मादिगुणो निरूपितो वै यमात्मा हृदि तस्मादपि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयं
आकाशशब्दे नाभिहितस्तस्यैतस्य हृदयस्यैतदेव निरुक्तं निर्वचनं नान्यत् हृद्ययमिति तस्मात्तस्माद्धृदयं हृदयपुंडरीकमा
निर्वचनप्रसिद्ध्यापि स्वहृदये आत्मेत्यवगंतव्यमित्यभिप्रायः अहरहर्वै प्रत्यहमेवंविदित्ययमिति जानन् स्वर्गं लोकं हार्दं ब्रह्मेति
प्रतिपद्यते ननु नैवंविदपि सुषुप्तिकाले हार्दं ब्रह्म प्रतिपद्यत एव सुषुप्तिकाले सतासोम्य तदा संपन्नो भवतीत्युक्तत्वात् बाढमेवं तथा
भवत्येव भेदविदुषामविदुषां च सुषुप्ते यपि सत्संपद्यते तथाप्येवंविदेव स्वर्गं लोकमेतीत्युच्यते देहपातेऽपि विद्याफलस्यावश्यं
भावित्वादित्ययं विशेषः सुषुप्तकाले स्वतो नामैतःसत्संपन्नः सन्न सम्यक् प्रत्येति दृश्यते इति जायस्वप्नयोर्विषयं द्रूपसंयोगाते का
न वत्पललविशेषात्ततो ब्वंव शरीरं हित्वास्मात् समुत्थाय शरीरात्मभावनां [illegible]
परित्यज्य स्वार्थं न त्वासनाद्वसमुत्थायेतीह युक्तं स्वेन रूपेणेति विशेषणात् नत्यन्यतस्थाय स्वरूपं संपत्तिः स्वरूपमेव हि तन्न
भवति प्रतिपन्नत्वं व नस्मात्परं परमात्मतत्त्वमापि ज्ञप्तिस्वभावं ज्योतीरूपं संपद्य स्वात्मप्रतिपत्त्यनन्तरमेव स्वेनात्मीयेन रूपेणाभि
निष्पद्यते प्रागेतस्याः स्वरूपसंपत्तेरविद्यया देहमेवापरं रूपमात्मत्वेनोपगत इति तदपेक्षयेदमुच्यते स्वेन रूपेणेति अशरीर
त्वे हि सदाविनाशिभूमा यो वै भूमा तदमृतमितियुक्तं अनंतरावा भयं ब्रह्मेतो ह्रितीयाभावात् अत एव ब्रह्मेति तस्य ह वा एतस्य ब्र
ह्मणो नामाभिधानं किं तत्सत्यमिति नत्संप्रविनिगम्यं ब्रह्मनतत्समस्माल्लोकात् ॥ अथाकिमर्थमिदं नाम पुनरुच्यते तदुपासनवि
धेर्वा तत्त्रयस्याक्षरस्तत्ससत्संबहुत्वात् तद्वाचकत्वात् अमृतमेव सकारस्तकारान्तो निर्दिष्टः अथ यन्तिनकारस्तन्मर्त्यमथ यद्यमक्षरं तेनास्य
रतामृतमर्त्यरेखेपूर्वं उमे अक्षरे यच्छति नियमयति नियमयति वशीकरोत्यात्मने नैवार्थ यस्मादनेन यमिते नोभे यच्छति तस्माद्यं संयते
इव स्थेने नयमात्मलक्षयेते ब्रह्मनामाक्षरस्यापि द्रष्टुममृतत्वादिधर्मवत्त्वं महाभाग्यं किमुत नामवतः इत्याद्युपासनाय स्तूयते ब्रह्मनामनिर्व
चनेवं नामवतो वेनैवं विद्हरहर्ह्वा एवंवित् स्वर्गं लोकमेतीत्युक्तार्थं ॥ अथ य एषोऽल्पेन लक्षणेन यः संप्रसादस्तस्य स्वरूपं वक्ष्यमाणो हृके
रं नुक्रे अगुणोः पुनः स्तूयते ब्रह्मचर्यसाधनसंबंधार्थं स एष यथो क्त लक्षण आत्मा स सेतुरिव सेतुर्विधृतिर्विधरणस्तेन ह्यात्मस्वरूपेण
सर्वं जगद्वर्णाश्रमादिक्रियाकारकफलादिभेदनियमैः कर्तुरनुरूपं विदधता विधृतं अधीयमाणं होश्वरेणेदं विश्वं विनश्येत् यतस्तस्मात्स
सेतुर्विधृतिः किमर्थं स सेतुरित्याह एषां भूरादीनां लोकानां कर्तृकर्मफलाश्रयाणामसंभेदायाविदारणायाविनाशायैतत्तं ॥ किंविशि

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे
पाप्मानो तो निवर्तन्ते ॥

ष्टश्चासौ सेतुरित्याह नैतं सेतुमात्मानमहोरात्रे सर्वस्य जनिमतः परिच्छेदके सती नैतं तरतो यथान्ये संसारिणः कालेनाहोरात्रादिलक्षणे
न परिच्छेद्यान तथायं कालय परिच्छेद्य इत्यभिप्रायः यस्मात्सर्वाकृतं वनसरोहोभिः प्र एवं नैतं न इति श्रुत्यंतरात् एतं नत्तरातरतिनप्राप्नोति
तथा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सुकृतदुःकृते धर्माधर्मौ प्राप्तिरत्र तरणशब्देनाभिप्रेता नातिक्रमणं कारणं त्वात्मनः शकीहि कारणा
तिक्रमणं कर्तुं कार्येण अहोरात्रादि च सर्वं स तः कार्यमस्य न स्वस्य प्राप्तिरतिक्रमणं वा क्रियते तत्तु नैनं तत्स्पन हि घटे नमस्य प्राप्यते अति
क्रम्यते वा यद्यपि एवं य आत्माय हतपाप्मा इत्यादिना पाप्मादिप्रतिषेध उक्त एव तथापीहापि विशेषेण तरतीति प्राप्तिविषयत्वं प्रतिषिध्य
तेतत्रापि विशेषणजराद्यभावमात्रमुक्तं अहोरात्राद्यानुक्रमनुक्रान्स्ये सर्वे पाप्मान उच्यंते अतोस्मादात्मनः से तो निवर्तन्ते अप्राप्यैवेद

अपहतपाप्मा ह्येष ब्रह्मैव लोको ब्रह्मलोक उक्तो यस्माच्च यथा प्राकार्यं मध्यादि मनुष्यादि शरीरवतः स्यान्न त्वशरीरस्य तस्माद्धेतस्मा त्मानं सेतुं तीर्त्वा प्राप्यान्धः सन्ननन्धो भवति देहवत्त्वे पूर्वमन्धोऽपि सन् तथा विद्धः सन् देहवत्त्वे सदेहवियोगे सेतुं प्राप्याविद्धो भवति तथोपतापी रोगाद्युपतापवान् सन्ननुपतापी भवति। किं च यस्मादहोरात्रे न स्त एतस्मिंस्तस्माद्वा एतं सेतुं तीर्त्वा प्राप्य नक्तमपि तमोरूपं रात्रिरपि सर्वमहरेवाभिनिष्पद्यते विज्ञानस्वरूपज्योतिःस्वरूपमहरिवाहः सदेकरूपं विदुषः संपद्यत इत्यर्थः। सकृद्विभातः सदा विभातः सदैकरूपः स्वेन

पहतपाप्मा ह्येष ब्रह्मलोकस्तस्माद्वा एतं सेतुं तीर्त्वान्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तस्माद्वा एतं सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकस्तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति ॥४॥

रूपेणैष ब्रह्मलोकः तत्रैवं सत्येतं यथोक्तं ब्रह्मलोकं ब्रह्मचर्येण स्त्रीविषयतृष्णात्यागेन शास्त्राचार्योपदेशमनुविन्दन्ति स्वात्मसंवेद्यतामापादयन्ति ये तेषामेव ब्रह्मचर्यसाधनवतां ब्रह्मविदामेष ब्रह्मलोको नान्येषां स्त्रीविषयसंपर्कजाततृष्णानां ब्रह्मविदामपि सतामित्यर्थः तेषां सर्वेषु लोकेषु कामचारो भवतीत्युक्तार्थं तस्मात्परममेतत्साधनं ब्रह्मचर्यं ब्रह्मविदामित्यभिप्रायः ॥४॥

य आत्मा स सेतुत्वादिगुणो स्तुतस्तस्य प्राप्तये ज्ञानसहकारि साधनान्तरं ब्रह्मचर्यं विधातव्यमित्याह अथ यदित्यादिना प्रकृतं स्तौति कर्तव्यार्थं अथ यद्यज्ञ इत्याचक्षते लोके परमपुरुषार्थसाधनं कथयन्ति शिष्टास्तद्ब्रह्मचर्यमेव यज्ञस्यापि यत्फलं तद्ब्रह्मचर्यवानेव लभते अतो यज्ञोऽपि ब्रह्मचर्यमेवेति प्रतिपत्तव्यं कथं ब्रह्मचर्यं यज्ञ इत्याह ब्रह्मचर्येणैव हि साधनेन यस्माद्यो ज्ञाता स तं ब्रह्मलोकं यज्ञस्यापि पारम्पर्येण फलभूतं विन्दते लभते अतो यज्ञोऽपि ब्रह्मचर्यमेवेति यो ज्ञातेति लक्षणानुवादेन यज्ञो ब्रह्मचर्यमेव अथ यदिष्टमित्याचक्षते ब्रह्मचर्यमे

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवेष्ट्वात्मानमनुविन्दते अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दतेऽथ यन्मौनमि त्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुतेऽथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दतेऽ॥

व तत्र कथं ब्रह्मचर्येणैव साधनेनात्मानमीश्वरमिष्ट्वा पूजयित्वा अथवा एषणां प्रारब्धविषयां कृत्वात्मानमनुविन्दते एषणादिष्ट मपि ब्रह्मचर्यमेव तत् अथ यत्तथा सतः परस्मादात्मन आत्मनस्त्राणं रक्षणं ब्रह्मचर्यसाधनेन विन्दते सत्त्रायणशब्दमपि ब्रह्मचर्यमेव तद्य यन्मौनमित्याचक्षते। ब्रह्मचर्यमेव तद्यन्मौनमित्याचक्षते। ब्रह्मचर्यमेव तद्ब्रह्मचर्येणैव साधनेन युक्तः सन्नात्मानं शास्त्राचार्याभ्या मनुविद्य पश्चान्मनुते ध्यायत्यतो मौनमपि ब्रह्मचर्यमेव अथ यदनाशकायनमित्याचक्षते तमनुविन्दते स एष ह्यात्मा ब्रह्मचर्यसा धनवतो न नश्यति अनशनान्नाशकमेवायनं तस्मादनाशकायनमपि ब्रह्मचर्यमेव॥ इति ब्रह्मचर्यमेव तत् यदात्मानं ब्रह्मचर्ये

छां०उ०भा०
११८

238

श्यप्रवेशितेन कश्चिद्विरोधः तस्मान्मानसा एव ब्रह्मलोकिका अरण्यापारयः संकल्पजा अपि ते आदयः कामा बाह्यविषयभोगवत अशुद्धिरहितत्वा
त् शुद्धसत्त्वसंकल्पजन्यत्वात् इति नित्यनिरतिशयसुखाः सत्या अक्षया अरावतो भवन्तीत्यर्थः सतत्सत्यात्मनः प्रतिबोधे विपरीतमिव कल्पितास्सर्वोद
यः सदात्मनः स्वरूपतामेव प्रतिपद्यन्त इति न दृश्यन्ते न सत्या एव भवन्ति॥ ५॥ यस्तु हृदयपुण्डरीकगतं यथोक्तगुणविशिष्टं ब्रह्मचर्या
दिसाधनसंपन्नस्सन् बाह्यविषयात्तत्तृष्णः सन् उपास्ते तस्येयं मूर्द्धन्यया नाड्या गतिर्वक्तव्येति इदमारभ्यते। अथ या एता वक्ष्यमा
णा हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य संबन्धिन्यो नाड्यो हृदयमांसपिण्डात्सर्वतो विनिःसृता आदित्यमण्डलादिव रश्मयः।
ताश्चैताः पिङ्गलस्याणिम्नो वर्णविशेषविशिष्टस्य सूक्ष्मरसस्य रसेन पूर्णास्तदाकारा एव वर्तन्त इति प्रवृत्तेत्यर्थः। तथा शुक्लस्य नील

अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल ए
ष शुक्ल एष नील एष पीत एष लोहितस्तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय
उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ताः॥

स्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्वे आध्याहार्ये सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन संपर्कात् तत्पिङ्गलं भवति
सौरं तेजः पित्ताख्यं नरे वातभूयस्त्वात् नीलं भवति। तदेव च कफभूयस्त्वात् शुक्लं कफेन समतायां पीतं शोणितबाहुल्येन लोहितं वै घ
कान्ता वर्णविशेषा अन्वेष्टव्याः कथं भवन्तीति श्रुतिस्त्वाहादित्यसंबन्धादेव तत्तेजसो नाडीष्वनुगतस्यैते वर्णविशेषा इति कथम् असौ वा आ
दित्यः पिङ्गलो वर्णत एष आदित्यः शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव तस्याध्यात्मं नाडीभिः कथं संबन्धस्तत्र दृष्टान्तमा
ह तत्तत्र यथा लोके महान्विस्तीर्णः पन्था महापथ आततो व्याप्त उभौ ग्रामौ गच्छतीमं च संनिहितममुं च विप्रकृष्टं दूरस्थमेवं यथा दृष्टा
न्तः महापथ उभौ ग्रामौ प्रविष्ट एवमेवैता आदित्यरश्मय उभौ लोकौ अमुं चादित्यमण्डलमिमं च पुरुषं गच्छन्त्युभयत्र प्रविष्टाः यथा हा

आभ्यो नाडीभ्यः प्रतायन्ते प्रवृत्ताः सन्तानभूताः सततमेवामुष्मिन्नर श्मीनामुभयलिङ्गत्वात् तेषु सृप्तेति तत्रैवं सति यत्र यस्मिन्काले अयं जीवः
सुप्तो भवति स्वापस्यापि हि प्रकारत्वात् विशेषणमेतत् समस्तः उपसंहृतसर्वकरणवृत्तिरित्येतत् अतो बाह्यविषयसंपर्कजनितकालुष्याभावात्
सम्यक् संप्रसन्नो भवति अत एव स्वप्नं विषयाकारावभासं मानसं स्वप्नप्रत्ययं न विजानाति नानुभवतीत्यर्थः। यदैवं सुप्तो भवति आसु सौरतेजः
पूर्णासु यथोक्तासु नाडीषु तदा सृप्तः प्रविष्टो नाडीभिर्द्वारभूताभिर्हृदयाकाशं गतो भवतीत्यर्थः। न ह्यत्र संपत्ते। स्वप्नादर्शनमस्तीति सत
म अवर्तनाडीद्वारैतिसप्तमीततीयार्थे परिणम्यते तं सतासंपन्नं कश्चन कश्चिदपि धर्माधर्मरूपः पाप्मा स्पृशति स्वरूपावस्थितत्वा
त्तदात्मनः देहेन्द्रियविशिष्टं हि सुखदुःखकार्यप्रदानेन पाप्मा स्पृशतीति न तु सत्संपन्नं स्वरूपावस्थं कश्चिदपि पाप्मा स्पृष्टुं [illegible] अ

न स्पृं

आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्तास्तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति
तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवत्यथ यत्रैतदबलिमानं नीतो भवति॥

विषयत्वात् अन्यो ह्यन्यस्य विषयो भवति न त्वन्यत्वं केनचित् कश्चिदपि सत्त्वं यतस्तस्य स्वरूपात् प्रच्यवनं तस्मान्नोऽज्ञस्य प्राव
स्थां प्रतिगमने बाह्यविषयप्रतिबोधोऽविद्याकामकर्मबीजस्य ब्रह्मविद्याहुताशा [illegible] प्रसेतस्य यथे
वं सुप्तः सौरेण तेजसा व्याप्तस्तेन सर्वतः संपन्नो भवति अतो विशेषेण च सुप्तानि नाडीद्वारैर्बाह्यविषयभोगाय प्रसृतानि कर
णानि अस्य पुरुषस्य न तदा प्रभवन्ति तस्मात् द्विकरणानां निरोधात् तत्त्वात्मस्थानावस्थितः स्वप्नं न विजानातीति युक्तं तत्रैवं सति अथ यत्र यस्मिन्का
ले अबलिमानमबलभावं देहस्य ~~[illegible]~~ रोगादिनिमित्तं जरादिनिमित्तं वा कृशीभावमेतन्नयनं
नीतः प्रापितो देवदत्तो भवति। मुमूर्षुर्यदा भवतीत्यर्थः॥

239

छां० आ०
११८

नम्रियते इत्यर्थः सर्वतो वेष्टयित्वा आसीना ज्ञातय आहुः जानासि मां तव पुत्रं जानासि मां पितरं वेत्यादि स मुमूर्षुर्यावदस्माच्छरीरान्नोत्क्रान्तो भवति तावत्पुत्रादीन् जानाति अथ यत्र यदैतदस्मिन्क्रियाविशेषणमिदमस्माच्छरीरादुत्क्रामत्यथ तदैतैरेव यथोक्ताभी रश्मिभिरूर्ध्वमाक्रमते यथाकर्मजितं लोकं प्रस्तविद्वानितरस्तु विद्वान्यथोक्तसाधनसंपन्नः स ॐ मिति वा ओंकारेणात्मानं ध्यायन्यथापूर्वं वा होद्वैवोद्वीयते विद्वाञ्छ्रेयस्कर इत्यर्थः उत्तरस्मिन्यतो गच्छतीत्यर्थः स विद्वानुत्क्रमिष्यन्यावत्क्षिप्येन्मनो यावता कालेन मनसः क्षेपः स्यात्तावता कालेनादित्यं गच्छति प्राप्नोति क्षिप्रं गच्छतीत्यर्थः न तु तावतैव कालेनेति विवक्षितं किमर्थमादित्यं गच्छतीत्युच्यते एतद्वै खलु प्रसिद्धं ब्रह्मलोकस्य द्वारं यदादित्यस्तेन द्वारभूतेन ब्रह्मलोकं गच्छति विद्वानतो विदुषां प्रपदनं प्रपद्यते ब्रह्मलोकमनेनेति प्रपदनं

नम्रियत आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ॐ मिति वा होद्वा मीयते स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषां तदेष श्लोकः शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्त्युत्क्रमणे भवन्ति॥६॥

निरोधनं निरोधोऽस्मादादित्याद्विदुषां भवतीति निरोधः सोऽविदुषामित्यादि हे रावणि रुद्धाः संतो मूर्धन्यया नाड्या नोत्क्रामन्त एवेत्यर्थः॥ विद्यार्थं वा इति श्लोकान्तरेणास्मिन्नर्थे एष श्लोको मन्त्रो भवति शतं चैका च वे षोडकोत्तरशतं नाड्यो हृदयस्य मांसपिण्डभूतस्य संबन्धिन्यः प्रधाना नाड्यो भवन्ति तासां मूर्धानमभिनिःसृता विनिर्गता एका सुषुम्ना नाम तयान्ते काले हृदय आत्मानं वशीकृत्य योजयेत्तया नाड्योर्ध्वमायन्गच्छन्नादित्यद्वारेणामृतत्वमेति विष्वङ्ङन्या नानागतयः सर्वतो गताः नाड्य उत्क्रमणे निमित्तं भवन्ति संसारगमनद्वारभूता भवन्तीत्यर्थः द्विर्वचनमध्यायसमाप्त्यर्थम्॥६॥

य आत्माऽपहतपाप्मा इत्यादि अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्युक्तं तत्र कोऽसौ संप्रसादः कथं वा तस्याधिगमः यथासौ अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते येन स्वरूपेणाभिनिष्पद्यते स किंलक्षण आत्मा संप्रसादस्यैव देहसंबन्धीनि रूपाणि ततोऽन्यत्कथं स्वरूपमित्येतेऽर्था वक्तव्याः तदर्थमुत्तरो ग्रन्थ आरभ्यते आख्यायिका तु विद्याग्रहणसंप्रदायविधिप्रदर्शनार्था विद्यास्तुत्यर्था च राजसेवितत्वात्प्रजापतिवत्तस्य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः यस्यापासनाय दहरपुण्डरीकमभिहितं यस्मिन्कामाः समाहिताः सत्याः अनृतापिधाना य उपासनास्तेभ्यो विविक्तत्वं चार्थसाधनमुक्तं उपासनफलभूतकामप्राप्तिः यतो येच मूर्धन्यया नाड्या गतिरभिहितास्ते सोऽन्वेष्टव्यः शास्त्राचार्योपदेशैर्ज्ञातव्यः स विजिज्ञासितव्यः

य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मा॥

शेषेण ज्ञातुमेष्टव्यः स विजिज्ञासितव्यः स्वसंवेद्यतामापादयितव्यः किं तस्यान्वेषणात्विजिज्ञासनाच्च स्यादित्युच्यते स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानं यथोक्तप्रकारेण शास्त्राचार्योपदेशेनान्विष्य विजानाति स्वसंवेद्यतामापादयति तस्यैतत्सर्वलोककामावाप्तिः सर्वात्मत्वं फलं भवतीति ह किल प्रजापतिरुवाच अन्वेष्टव्यो विजिज्ञासितव्य इति चैष नियमविधिर्नापूर्वविधिरेवमन्वेष्टव्यो विजिज्ञासितव्य इत्यर्थः स्वार्थप्राप्तौ चान्वेषणविजिज्ञासनयोरर्थं एवं चरति यथोक्तविधिविपरीतस्य आत्मनो अनवाप्तिः आत्मा अधिगमने विपरीतावधिगमनिवृत्तिरेव ~~...~~ फलमिति नियमार्थता वा स्वविधेः सुज्ञानत्वाद्धि हेत्वादीनामिवापूर्वविधित्वमिह संभवतीत्यभिप्रायोपपत्त्या॥

काप्रयोजनमनुक्तं तद्धि किल प्रजापतेर्वचनमुभये देवासुरा देवासुराश्चानुपरम्परागतं स्वकर्णगोचरापन्नमनुबुबुधिरे ऽनुजज्ञिरे देवासुराः। ह ऊचुः। ते तत्प्रजापतिवचो बुध्वा किमकुर्वन्नित्युच्यते ते होचुर्हन्त यद्यस्मात्तमेवं देवा असुराश्चोचुः। हन्त तं पुनरनुमतिमेव तां प्रजापतिनोक्तं तमात्मानमन्विच्छामो ऽन्वेषणं कुर्मो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानित्युक्त्वेन्द्रो ह एव देवानामभितः प्रवव्राज विरोचनो ऽसुराणां स्वस्थानेभ्यः। राजा देवानामितरो ऽसुराणां। एवं संगतौ। सर्वां संपदं सर्वं स्वराज्यं च पुनः प्रविष्टौ। प्रजापतिं प्रवव्राजतुः प्रगतवानित्यर्थाच्च। विरोचनो ऽसुराणां विनयेन गुरवो ऽभिगन्तव्याः

नमन्विच्छामोय मात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति। इन्द्रो हैव देवानामभिप्रवव्राज विरोचनो ऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः। तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतु-
स्तौ ह प्रजापतिरुवाच ॥

इत्येतद्दर्शयति त्रैलोक्यराज्यस्याप्यगुरुत्वं राविद्यायेति यतो देवासुरराजौ महान्तौ भोगार्हौ सन्तौ तौ तथा गुरुसमीपं गतवन्तौ तौ ह किलासंविदानावेवान्योन्यं संविदमकुर्वाणौ विद्याफलं प्रत्यन्योन्यमीर्ष्यां दर्शयन्तौ समित्पाणी समिद्भारहस्तौ प्रजापतिसकाशमाजग्मतुरागतवन्तौ तौ ह गत्वा द्वात्रिंशतं वर्षाणि शुश्रूषापरौ भूत्वा ब्रह्मचर्यमूषतुरुषितवन्तौ तौ अभिप्रायज्ञः प्रजापतिस्तौ होवाच॥

तौ ह संविदानावेव समित्पा ४

किमिच्छन्तौ किं प्रयोजनमभिप्रेत्य मम समीपमवास्तमुषितवन्तौ युवामिति तौ होचतुः। य आत्मेत्यादि भगवतो वचो वेदयन्ते शिष्टास्तमात्मानं ज्ञातुमिच्छन्तावबास्तमिति। अवस्थितिं यद्यपि प्राक् प्रजापतेः समीपगमनादन्योन्यमीर्ष्यायुक्तौ तथापि विद्याप्राप्तिप्रयोजनगौरवात्प्रत्यस्तरागद्वेषमोहेर्ष्यादिदोषावेव भूत्वा उषतुर्ब्रह्मचर्यं प्रजापतौ तेनेदं प्रख्यापितमात्मविद्यागौरवं तावेवं तपस्विनौ शुद्धकल्मषौ योग्यावुपलक्ष्य प्रजापतिरुवाच ह य एषो ऽक्षिणि पुरुषो निवृत्तचक्षुभिर्दृश्यते योगिभिर्दृष्टा एष आत्मापहतपाप्मादिगु

किमिच्छन्तावबास्तमिति तौ होचतुर्य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सो ऽपिपासः सत्यकामः सत्यसंकल्पः सो ऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्तावबास्तमिति तौ ह प्रजापतिरुवाच य एषो ऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्यथ यो ऽयं भगवो ऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वेतेषु परिख्या-
यत इति होवाच ॥७॥

णोयमतो ऽयं पुरा हं यद्धि ज्ञानान्सर्वलोककामावाप्तिरेतदमृतमभयमात्मा। अत एवामयमत एव ब्रह्म बृहत्तममित्यस्य तत्प्रजापतिनोक्तम् अक्षिणि पुरुषो दृश्यत इति वचः श्रुत्वा छायात्मकं पुरुषं जगृहतुः। तौ ह्यवोचतुर्दृढीकरणाय प्रजापतिं हे भगवो ऽप्सु परिख्यायते परिसमन्तात्ख्यायते यश्चायमादर्शे आत्मनः प्रतिबिम्बाकारः परिख्यायते खड्गादौ च कतम एष एकोवानेकेषु। एवं पृष्टः प्रजापतिरुवाच एष उ एव यश्चक्षुषि द्रष्टा मयोक्तस्तेन मनसि कृत्वैषु सर्वेष्वन्तेषु मध्येषु परिख्याय-
त इति होवाच ॥७॥

छां०उ०भा०
१२१

८

[illegible]

ननु कथमयुक्तं शिष्ययोर्विपरीतग्रहणमनुज्ञातं प्रजापतेर्विजानतो दोषस्याचार्यस्य सतः सत्यमेवं नानुज्ञातं कथं आत्मन्यध्यारोपितं प्रा० लमहत्त्वादीश्वरेहंबुद्धिविरोचनोत्तस्थौ वचप्रथितालोके तोपाध्यायतिनामाचेष्ट्युर्वा विपरीतग्राहिणाविस्तु तौ स्यातां ततस्ताभ्याम्युत्थितेन दुःखे स्यान्नतु विनाश्यवि — वसारात्सुनः प्रश्नश्रवणाग्रहणाबधारणं प्रसुखं हविर्घातः स्यान्न तोरक्षणीयौ शिष्याविति मन्यते प्रजापतिरहो

उदशरावआत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति तौ होदशरावे वेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव [illegible] आलोमभ्य आनखेभ्यः प्रतिरूपमिति तौ ह प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेवेक्षेथामिति तौ ह साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावे वेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुर्यथैवेदमावां भगवः साध्वलंकृतौ सुवसनौ परिष्कृतौ [illegible] [illegible] स्व एवमेवेमौ भगवः साध्वलंकृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तौ ह शान्तहृदयौ प्रवव्रजतुः तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वासु रा वा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुप [illegible] [illegible] निषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं चेति तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणां ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसनेनालंकारेणेति संस्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥ ८ ॥

तौ तावत्तदुदशरावद्दृष्टान्तेनापनेष्यामीति । ननु न युक्तमेष लुप्तवेतन्तं वक्तुं नचात्र न युक्तं कथमात्मनो कोऽपि पुरुषो मनसि संनिहितत रःशिष्य न होतच्छायात्मनः सर्वेषां वा भ्रान्त रः सर्वो तरइति श्रुतेस्तमेवो बो चरे षउराविरू तौ तानन्तन युक्तं प्रजापतिना न थावत्तयोर्विपरीत न दृग्माजिव सार्थ प्रार्हं उदकपूर्णपात्रं वा शराव आत्मानमवेक्ष्यानन्तरं यत्तत्रात्मानं पश्यन्तौ न विजानीथस्तन्मे मम प्रब्रूतमाचक्षीयाथामित्युक्तौ तौ ह तथैवोदशरावेऽवेक्षांचक्राते अवेक्षणं च क्रतवन्तौ तथा कृतवन्तौ ह प्रजापतिरुवाच किं पश्यथ इति ननु तन्मे ब्रूतमित्युक्तामर्यादं तदुदशरावे अवेक्षतौ

उदशरावेर

वक्ष्यति साध्वलं [illegible] कृताविति एवमादि तौ होचतुर्यथैवावां हे भगवो लोमनखादिमन्तौ स्व एवमेवेदं लोमनखादिसहितं आवयोः प्रतिरूपमुदशरावे पश्याव इति तौ ह पुनः प्रजापतिरुवाच छायात्मनि अश्यापनयाय साध्वलंकृतौ पश्यास्वग्रहे सुवसनौ महार्हवस्त्रपरिधानौ परिष्कृतौ छिन्नलोमनखौ च भूत्वोदशरावे पुनरीक्षेथामिति तौ ह च नादिदं शपथदर्शनं तं तन्मे प्रब्रूतमिति । कथं पुनरनेन साध्वलंकारादि कृत्वा उदशरावेक्षणेन तयोश्छायात्मग्रहोऽपनीतः स्यात्साध्वलंकारसुवसनादीनामागन्तुकानां छायाकारत्वमुदशरावे यथा शरीरे संबधानामेवमेव शरीरस्यापि छायाकरत्वेऽपूर्वं वभूवेति निश्चयेनानु शरीरैकदेशानां चलोमनखादीनां निश्चलेनापि प्रेतानामवं च्छिन्नानां छायाकारत्वं पूर्वं मासीत्तच्छिन्नेषु च नैव लोमनखेषु छायाहृश्यते तो लोमनखादिवत्शरीरस्यार्थगमायापित्वं सिद्धमतिसुदृशा शरीरात्ते दृश्यमानस्य तन्निमित्तस्य च देहस्यानात्मत्वं सिद्धमुदशरावादिच्छायाकारत्वान्न देहे देहसंबंधालंकारादिवत्तनकेवलमेता वतायतेन यावत्किंचिदलीयमात्मीयमभिमतं सुदुःख्रणाहेषमोहादिचकर्हाचित्कृत्वान्नखरोमादि वदनात्मेति प्रत्येतव्यमेवमशेष मिथ्याहेहादेरनात्मत्वकथनेन मिथ्यावि हायनयाभिमिनेतसाध्वलंकारादिहृष्टान्तेन प्रजापतिनोक्तेऽतुल्योऽथाकृत वतोरपि छायात्म— विपरीतग्रहेनापजगामयस्मात्तस्मात्स्वदोषरौ वकेनाचित्प्रतिवद्धविवेकविज्ञानाविदुर्विरोचनावभूतामितिगम्यते । तौ पूर्ववद्दृदय दृष्ट नि श्चयोपप्रच्छ किंपश्यथइतितौ तथैव प्रतिपन्नौ यथैवेदमात्मनिपूर्ववत्पश्यासाध्वलंकारादिविशिष्टावैवां स्व एवमेवेमौ छायात्मानावि तिसुनरां विपरीतनिश्चयौ बभूवतुः यस्मात्तेनोलसरां याद्रात्मा अपहतपाप्मेत्युक्तः पुनस्तद्धिमन्त्वेषा सा रायोर्येरगुबो ज्ञातिर्यो पुरुषोऽक्षिणि दृश्यत इति सा हार्दं मिति निर्दिष्टं तद्विपरीतग्रहायनयाय उदशरावेसाध्वलंकारादिदृष्टान्तेयमभिहितेत्रात्मस्वरूपबोधात्तविपरी तग्रहोनापगतोऽनः स्वदोषवशात्केनचित्प्रजिवद्धविवेकज्ञानासामर्थ्याद्विमलाय श्चाभिप्रेतमेवात्मानमेष आत्मेति होवाचैतद् मृतमभयमेतद्ब्रह्मेति प्रजापतिः पूर्ववत्तनन्तरं हृदये प्रेतम आत्मानं य आत्मेत्याधात्मलक्षणाश्रवणेनापि पुरुषः सोऽक्षि उदशरावा द्युपपत्याचसंस्कृतौ तावन्मद्धवनयुनः पुनःस्मारतौ प्रतिबंधक्षयाच्च स्वयमेवात्मविषये विवेको भविष्यतीति मत्वा न पुनर्ब्रह्मच

पु

२४४

२४५

यौ रे पूर्ववत्पादौ च्छिन्नतदुःखौ स्वलंकृतौ परिजिहीर्षेन कृतार्थबुद्धितया गच्छंतौ बप्युपेक्षितवान् प्रजापतिः तौ हेंद्रविरोचनौ शांतहृदयौ तुष्टहृदयौ कृतार्थबुद्धी एव प्रवव्रजतुरित्यर्थान तु शमरावशमश्चेत यो जातो विपरीतग्रहो विगतः । अभिप्रेत प्रवव्रजतुः गतवंतौ एवं तयोर्गतयोरिंद्रविरोचनयो राज्ञो भार्गासक्तयो येयोऽत्र विस्मारणं स्यादित्याशंक्याप्रपन्नं प्रपक्षवचनेन चेतदुःखे प्रतिजिहीर्षुः सो ह्यं गच्छंतावन्वीक्ष्य प्रजापतिरुवाच यथोक्तवदिवचनं वदेत् यन्न यः अवगतो विचारतमेष्यतो तिमलो वाच प्रजापतिः अनुपलभ्य यथो क्तलक्षणमात्मानमननुविद्य स्वात्मप्रत्यक्षं वा कृत्वा विपरीतनिश्चयो चमत्वं द्वविरोचनावेतौ व्रजतो गच्छेयातां अतो यतरे देवा वा असुरा वा किं विशिष्टा तेन तद्वयः निश्चयवन्तो यतो हि तांश्च सक्ति धारयन्ति यस्यैषा देवानामसुराणां वा तेऽतत्तदुपनिषदः एवं विज्ञानाः तत्त्वविद्यया भविष्यंतीत्यर्थः ते किं पराभविष्यन्तीति श्रेयोमार्गात्परा भूता वहिर्भूता विनष्टाश्च भविष्यंतीत्यर्थः स्वारं छतोऽसुरासुरराजयोर्यो सुरराजः स ह शांतहृदय एव सन् विरोचनोऽसुरान् जगाम गत्वा चैतेभ्योऽसुरेभ्यः शरीरात्मबुद्धिर्योपनिषद् तामेतामुपनिषदं प्रोवाचोक्तवानात्मैव देहलक्षणः इह लोके महनीयः पूजनीयः पूजनीयः तत्र परिचर्यः परिचरणीयः तथा परिचर्यः परिचरणीयः तथा वात्मानमेवेह लोके देहं महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीहलोकं चामुं च इहलोकपरलोकयोर्वस्तवस्त्वेवं लोकाः कामाश्चान्ते मन्वं तो भिराशी भिप्रायः तस्मात्संप्रदाय घापन्नवर्तत इतीहलोके अदद् दानशीलमविभागशीलमश्रद्दधानं सत्कार्येषु श्रद्धारहितं यथाशक्ति अयजमानमयजनस्वभावमाहुरासुरः असुरः खल्वयं स्वभावो यत एवमाचार सत्संगमासुराणां हि यस्मात्श्रद्धानतालक्षणा योपनिषत्तया संस्कृताः संतः प्रेतस्य शरीरं कुणपं भिक्षया गंधमाल्यादिलक्षणया वसनेनेन प्रच्छादनादिप्रकारेणालंकारादिकरणेन ध्वजपताकादिकरणेन संस्कुर्वन्तेन कुणपसंस्कारेणामुं प्रेत्य प्राप्यतव्यं लोकं जेष्यतो मन्यंते ॥ ८ ॥

अथ तत्किलेंद्रोऽप्राप्यैव देवानदैव्यात्सौ पारसंपदा युक्तत्वात्गुरोर्वचनं पुनःपुनः स्मरन्नेव गच्छन्नेन दृष्टमात्मानं महोत्साहमपश्यत् प्रजापतिना दर्शितं दृष्टवानुदशरावदर्शनेन प्रजापतिना यददर्शितमेयादर्शनात्सादरं तदेकदेशोपादेयत्वेन प्रत्यभिज्ञैव येन च्छायात्मग्रहणात् तद्दोषं ददर्श कथं यथैव खल्वयमस्मिन्शरीरे साध्वलंकृते छायात्मायि साध्वलंकृतो भवति सुवसने वस्त्रे सुवसनः परिष्कृते प । परिष्कृतो यथा नखलोमादिरहितः एवमयमेव छायात्मापि परिष्कृतो भवति नखरोमादिरहितो भवति एवमेवायं छायात्मास्मिन् शरीरे नखलोमादि भिरेवावयवस्यानुल्पत्वादंधे चक्षुषो यदि मे धी भवति स्रामे स्रामः कारणः किलैकनेत्रः तस्य अंधत्वेनंतर्गतात्

अथ हेंद्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिंछरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नंधेंऽधो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन्यच्छांतहृदयः प्राव्राजीः सार्द्धं विरोचनेन किमिच्छन्पुनरागम इति स होवाच ॥ २

चक्षुर्नासिकादावयवस्य सरात्स्ववत्येस स्रामः परिवृक्णः छिन्नहस्तः छिन्नपादो वा स्रामे परिवृक्णे सौ वा देहे छायात्मापि तथा भवति तथास्य देहस्य नाशमन्वेष नश्यति । अतो नाहमत्रास्मिन्छायात्मदर्शने देहात्मदर्शने वा भोग्यं फलं पश्यामीत्येवं दोषं देहच्छायात्मदर्शने ध्यवस्यत्स समित्पाणिः ब्रह्मचर्यं वस्तुं पुनरेयायत्ते ह प्रजापतिरुवाच । मघवन्यच्छांतहृदयः प्राव्राजीः प्रगतवानसि विरोचनेन सार्द्धं किमिच्छन्पुनरागम इति विजानन्नपि पुनः पप्रच्छ इंद्राभिप्रायाभिव्यक्तये । यद्यहो तेन मोऽपसीदति यद्यहं न ग्राच स्वाभिप्रायं प्रकटमकरोत्यथैव खल्वयमिसाधवमेवेति वा मेत्मोर ॥

दोषमदर्शयत्तदेहाभिमानेनैव कस्मात् एषोऽक्षिणि पुरुषो दृश्यत इति नच्छायात्मा प्रजापतिनोक्त इति मन्यते मघवान् कथमवहतप्मादिलक्षणोक्तेः हेतुः यदि छायात्मा प्रजापतिनोक्तः स्यात् इति मन्यमानेन दाकयं प्रजापतिं प्रमाणीकृत्य पुनः श्रवणाय समित्पाणिर्गच्छत् जगाम वा तस्मात् छायात्मा प्रजापतिनोक्त इति मन्यते व्याचष्टे व्याख्यातं द्रष्टाक्षिणि दृश्यत इति तथा विचारयन्तो वविदुर्वयं तो वक्तव्याश्च पुत्राद्यमरणानिमित्तमप्रियवेत्तेव भवति अपि च रोदितीव नन्वप्रियवेत्तेव कथं वेत्तेत्युच्यते ना अमृतत्वम् एतदवच

मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥१०॥

नानुपपत्तेः ध्यायतीव लेलायतीव श्रुतेरनात्मनः प्रकाशविरोधादिति चेन्न शरीरात्मत्वप्रसङ्गादिति संभवात् तिष्ठतु तावत् स्वप्रियवेत्तीव नाहमत्र भोग्यं पश्यामि स्वप्नात्मज्ञाने फलं नोपलभे इत्यभिप्रायः एवमेवैष मघवन्नित्यभिप्राय इति वा वाक्यशेषः आत्मनो मनागपि दोषं मन्यमानस्याभिप्रेतत्वात् ह्युक्तिमपि अन्यापतनो मत्या पथाव स्वयमवधारयितेत्यस्मादयाधापि प्रतिवचकारामसीति मन्वानस्तत्र आयतनाय वसापराणि द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमित्यादि द्वे शतं प्रजापतिना प्रतिपन्न वतो अपि तनकल्मषाय हि ॥१०॥

पूर्ववदेतं त्वेव तत्साधु व्याख्यातं ध्यायतेनेनसुप्तस्यात्मादिव्याख्यातं वाक्यमाक्षिणीयो दृष्टा स्वप्ने च महीयमानश्चायत्तिर्यच्च सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स्वाभिप्रेतमेवं मघवान् तत्रापि दोषं ददर्श कथं नाह नैव सुषुप्तस्थो ध्याता खल्वयं संप्रति सम्यगिदानीं चात्मानं जानाति नैवं जानाति कथं अयमहमस्मीति नो एवेमानि भूतानि चेति यथा जाग्रति स्वप्ने वा तो विनाशमेवेति नाशमेवेति पूर्ववद्दृष्टव्यम् अपीतोऽपिगतो भवति विनष्ट इव भवतीत्यभिप्रायो ज्ञाने हि सति ज्ञातुः सत्त्वं गम्यते नासति ज्ञाने न च सुषुप्तस्य ज्ञानं दृश्यते तो विनष्ट इवेत्यभिप्रायो न तु विनाशमेवात्मनो मन्यते मता मय

तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच नाह खल्वयं भगव एवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्च वर्षाणीति स हापराणि पञ्च वर्षाण्युवास तान्येकशतं संपेदुरेतत्तद्यदाहुरेकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥११॥

वचनस्य प्रामाण्यमुपगम्य परापूर्ववदेवमेवैषुत्क्रमोक्तस्त्रिभिः पर्यायैः तमेवैतं नो एवान्यत्रैतस्मादात्मनः कंचन किं तर्हि एतमेव व्याख्यास्यामि स्वल्पस्तु दोषस्तत्र वा विशिष्टः तत्क्षपणाय वसापराणि पञ्च वर्षाणीत्युक्तः स तथा चकार तत्रैतमेकशतं कषायादिदोषनिवर्तनपरा अतः एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवासेति तदेतदुक्तं शतं मिसादिना दर्शनमिवा
ये

छां० भा०
१२५

मघवन्मर्त्यं वै मरणधर्मि इदं शरीरं यन्मन्यसे छायात्मादिलक्षणः संप्रसादलक्षण आत्मा मयोक्तो विनाशमेवापीतो भवतीति अत्र तु
तत्र कारणं यदिदं शरीरं वै यत्पश्यसि तन्मर्त्यं विनाशि आत्तं मृत्युना ग्रस्तं सततमेव कदाचिद्वे म्रियत इति मर्त्यमिदं तु केन त
था संत्रासो भवति। यथा ग्रस्तमेव तस्कराद्यात्तमेव मृत्युनेत्युक्ते इति वैराग्यार्थं विशेषं दृश्यते आत्तं मृत्युनेति कथं नाम देहाभिमानतो
विरक्तः सन्निवर्तेतेति शरीरमप्यन्तस्य देहेन्द्रियमनोभिरुध्यते तच्छरीरमस्य संप्रसादस्य त्रिस्थानतया गम्यमानस्यामृतस्य मरणादि

मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै
शरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव संतं न प्रियाप्रिये स्पृशतो ऽशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्ये
तानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यंते एवमेवैष संप्रसादोऽस्माच्छरीरा
त्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञा
तिभिर्वा नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तोऽथ यत्रैतदाका
शमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमथ यो वेदेदमभिव्या
हराणीति स आत्माभिव्याहाराय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रमथ यो वेदेदं मन्वानीति स आ
त्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके तं वा एतं देवा आत्मानमु
पासते तस्मात्तेषां सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजा

देहेन्द्रियमनोधर्मवर्जितस्यैतेन मृतत्वस्य तेनैवाशरीरत्वे नातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥१२॥
सिद्धं पुनरशरीरस्येति वचनं वाय्वादिवत्सविषय बलमूर्तिमत्त्वेनात्मनित्यात्मनः। आत्मनो भोगाधिष्ठानमात्मनो वा सतं ईक्षितुस्तेजो
बन्नादिक्रमेणोत्पन्नमधिष्ठानं जीवरूपेण प्रविश्य सद्वाधितिष्ठत्यस्मिन्निति वा स्थानं यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्माधर्मजनि
तं तस्य प्रियाप्रियवदधिष्ठानं तदधिष्ठितत्वात्तत्स्थानः सशरीरो भवति अशरीरस्वभावस्यात्मनस्तदेवाहं शरीरं शरीरमेव वा ॥

२५२

ह्यभिन्नविवेकात्मभावः सशरीरत्वं सशरीरः सन्नात्तो ग्रस्तः प्रियाप्रियाभ्यां प्रसिद्धमेतत् तस्य च तस्यैव सशरीरस्य सतः प्रियाप्रिययोर्वास्तविष
यसंयोगवियोगयोर्निमित्तं यो वीस्य विषयसंयोगवियोगौ ममेति मन्यमानस्यापहतिर्विनाशस्यो दुःसंततिरूपयोर्नास्तीति तत्पुनर्हाभि
मानाद्दशरीरस्वरूपविज्ञानेनैव निवर्तिता विवेकज्ञानमशरीरं सन्तं प्रियाप्रिये न स्पृशतः स्पृशिः प्रत्येकं संबध्यत इति प्रियं न स्पृशत्यप्रि
यं न स्पृशतीति वाक्यद्वयं भवति। न हि कर्मधर्मिकं सहते भावनेति यदुक्तधर्माधर्मकार्ये हि ते अशरीरतानुस्वरूपमिति तत्र धर्मा
धर्मयोः संभवात्तत्कार्याभावो दूरत एवेत्यतो न प्रियाप्रिये स्पृशतो न नु परिप्रियमप्यशरीरं न स्पृशतीति यन्मघवन्नेतत्संपुत्तस्यो विना
शमेवापीतो भवतीति न देवेत्यापन्नं नैष दोषो धर्माधर्मकार्ययोः शरीरसंबंधिनोः प्रियाप्रिययोः प्रतिषेधस्य विवक्षितत्वात् शरीरं ना
विनाशस्पर्श इति भवति तथाग्नेर्यथाविनैवोष्णप्रकाशवत्स्वरूपमतस्तान इदं प्रियस्यापि नेह प्रतिषेधो विज्ञानमानं दमानंदो ब्रह्मेत्यादि
तिश्रुतेः तापयमेव सुखमित्युक्तत्वात् ननु भूमा प्रियस्यैकत्वे सवैवमुक्तात्स्वरूपत्वे नैव वानिसर्वं वैषत्वान्निर्विशेषतेति नेदस्यत
दृश्यं नाहं खल्वयं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति। नाहमत्र भोग्यं पश्यामीत्युक्तत्वात्
रूपान्तर्याम्यभिन्नता निर्मितो न्यानि लोकाश्च कामाश्च सर्वमतो ऽस्मि हमेषोऽभिमानित्वं नारंदस्य हितः इहैवेदं प्रजापति नाथ कथं ... मन्त्रस
शरीरात्मतया सर्वमतलोकामालत्वोपगमे न ययैति समुत्थितमिं द्वयवकल्पमिति प्राजापति नाभिप्रेतं न तु राज्ञो राज्या सिवदन्यत्वेन तत्र
वंसतिकं केनविजानीयादात्मेकत्वे रमानि भूतान्यपमेहमस्मीति नन्वस्मिन्पक्षे स्त्रीभिः यानैर्वा सयदि पितृलोककामः स एकधाभ
वतीत्याद्यैश्वर्यश्रुतयो नुपपत्ताः नसर्वात्मिनः सर्वफलसंबंधोपपत्तेरविरोधात्। मदस्वमवैवयत्ते चरकुतायास्त्रिन्नु सर्वात्मत्वे दुःख
संबंधोपि स्यादिति चेतन्न दुःखस्य विद्याविद्यानात्मोपगमादविरोधः आत्मन्याविद्याकल्पनानिमित्तानि दुःखानि रज्ज्वामिव सर्पादिकल्पनानिमित्तानि

प्रा४

छां० भा०
१८०

२५६

न यथा विरोचनो महाप्राज्ञः प्राजापत्योपि देहमात्रात्मदर्शनो वभूव तथेंद्रः स्याद्विनाशभयसागरे एव वैनाशिकाः न्यमज्जंत यथा सांख्या
द्रष्टारं देहाद्व्यतिरिक्तमवगम्यापि तत्कालागमप्रमाणत्वात्मस्तु विषय एवात्मत्वदर्शिने न स्थुः ततोस्य कारणाद्धादि दर्शिनः कषायरक्त
मिव क्षारादिभिर्वस्त्रं न विमिराम्य गुरुणे पुत्रमात्मेंद्र त्वां विशोधयित्वं प्रवृत्तास्तथान्ये कामिरागो वाल्या विषयापहृत चेतसः वेदप्रमाणमु
पिपरमार्थसत्यमात्मैकत्वं वेदांतमवेंद्रवत्सम्यमानाघटीयंत्रवदारोहावरोहप्रकारैरनिशं वंभ्रमंति किमन्ये क्षुद्रजंतवो विवेक
हीनाः स्वभावत एव बहिर्विषयापहृतचेतसः। तस्मादिदं त्यक्तसर्वबाह्यैषणैरनन्यशरणैः परमहंसपरिव्राजकैरत्याश्रमिभिर्वेदांतवि
ज्ञानपरैरेव वेदनीयं पूज्यतमैः प्राजापत्यं चेमं संप्रदायमनुसरद्भिरुपनिबद्धं प्रकरणाच्चानुष्ठेये नात तथानुशास्त्यद्यापि तेन एवनान्यइतिन
त्राशरीरस्य संप्रसादस्याविद्यया शरीरैरविशेषतां सशरीरतामेव संप्राप्तस्य शरीरात्समुत्थाय स्वेन रूपेणाभिनिष्पत्तिस्तथा
वक्तव्येति दृष्टांतरूपमन्ते शरीरो वायुर्विषमानं त्रिणः पराद्यादिमतः शरीरमस्येत्यशरीरः किंचाभ्रं विद्युत्स्तनयित्नुरित्येतानि चाशरीरा
णि तत्तत्रैवं सति वर्षादिप्रयोजनावसाने यथायममुष्मादिति अभिप्राक्षति द्युलोकसंबंधिनमाकाशदेशं व्यपदिशति एतानि यथो
क्तान्याकाशसमानरूपतामापन्नानि स्वेन वायुदिरूपेणागतयमाणानि आकाशवत्तो गतानि यथा संप्रसादोविद्यावस्थायां शरीरात्म
भावमेवापन्नः तानि च तथा प्राप्नुवंति अमुष्मात् द्युलोकसंबंधिन आकाशदेशात् समुत्तिष्ठंति वर्षणादिप्रयोजनाय विनिवृत्ते
थां शरीरागाथेसाविचित्रपरंज्योतिः प्रकृष्टं छिन्नसंदेहं घसावेन समभिन्नं प्राप्योत्तं फं आदित्यापितामिनायेन एवं वायुर्वाम्या
दितोः स्वेन रूपेण पुरोवातादिवायुरूपेणाक्तिमिनभावेहित्वाऽस्नमपि मिपूर्वं तद्वर्षादिरूपेणाविद्युपिस्वेन ज्योतिर्लीनावपलरू

संतः स्वेन१

राम०
१८०

पेणास्तन पितुरपि स्वेन गर्जितानाशनिरूपेणात्येवं प्रावृडागमे स्वेन स्वेन रूपेणाभिनिष्पद्यंते यथायं दृष्टांतो वाय्वादीनामाकाशादिसा
म्यागमनवदविद्ययात्मनाशरीरसंबंधः शरीरसाम्यमापन्नोहममुष्यपुत्रो जातो जीर्णो मरिष्य इत्येवं प्रकारः प्रजापतिनैव मघवान्प
बोधितो न त्वमेतदात्मासीति देहेंद्रियादिधर्मान् त्वमसीति प्रतिबोधितः स तदा संप्रसादो जीवोस्माच्छरीरादाकाशादिव वाय्वादयः समुत्था
य देहादिवैलक्षण्यमात्मनो रूपमवगम्य देहात्मभावनां हित्वा स्वेन स्वेन रूपेण सदात्मनैवाभिनिष्पद्यत इति व्याख्यातं पुरस्तात्स ये
न स्वेन रूपेण संप्रसादोभिनिष्पद्यते प्राक्प्रतिबोधात्तु त्रिमितात्मा यो भवति यथा रज्जुः प्रज्ञारूतप्रकाशात्स्वात्मना स्वेन रूपे
णाभिनिष्पद्यते एवं तथा संप्रसादोभिनिष्पद्यते। स उत्तमपुरुषः उत्तमश्चासौ पुरुषश्चेत्युत्तमपुरुषः। स एवोत्तमपुरुषो क्ष
रपुरुषो व्यक्तोव्यक्तश्च तः समस्तः संप्रसन्नो शरीरश्च स्वेन रूपेणात्मैवमेव स्वेन रूपेणावस्थितः न क्षराक्षरौ व्याकृताव्याकृतावपे
क्ष्योत्तमः पुरुषः कृतान्ते वचनोपनिषत्सु ~~...~~ स संप्रसादः
स्वेन रूपेणात्तत्र स्वात्मनि स्वच्छतयात्मनि सर्वात्मभूतः पर्येति। क्व चिज्जक्षद्धासलमनाजक्षद्धसन्भक्षयन्वा भक्ष्यानुच्चावचानीप्सितान् क्व
चिन्मनोमात्रैः संकल्पादेव समुत्थितैः क्रीडन्लौकिकैर्वा क्रीडन् स्त्रीभिर्वा रममाणो मनसैव नोपजनं स्त्रीपुंसयोरन्योन्योपगमेन जाय
त इत्युपजनमात्मभावेन वा आत्मसामीप्येन जायत इत्युपजनमिदं शरीरं न स्मरं स्तत्स्मरतो हि दुःखमेव स्याद्दुःखात्मकत्वात्स्मर
णानुभूतं चेत्स्मरेदसर्वज्ञत्वं मुक्तस्यैव दोषो येन मिथ्याज्ञानादिना जनितं तत्र मिथ्याज्ञानादिविषयोच्छेदेन मनसत्त्वानुभूत मे

२५७

छां० भा०
१२८

वेत्तिनन दस्मरतोसर्वज्ञत्वहानिः नखलुमतेन ग्रंयहीतेनवायदनुभूतं तद्भूमा दाघयगमेपि स्तर्जो यंस्मात ये ह्यापिसंसारिभिर्वि
द्या दोषवद्धि यदनुभूयते तेन तस्य सर्वात्मा नम शरीरं नस्य शृणोति अविद्यानिमित्ताभावात ये तु छिन्नदोषं र्दतकषाये मीन सौकामामन
नापिधानाऽनुभूयंते विद्याभि र्यंगपत्वात तेन एव मुक्तेन सर्वात्मभूतेन संबध्यंत इत्यालज्ञानमुत येनि द्रष्टपते ऽतः सा
धुन दूषितनाष्टयेरते ब्रह्म तेकश्चिनयत्र च कचन भवंतोपि ब्रह्मलपे वहिते लोके भवंतीतिसर्वात्मत्वाद् ब्रह्मरा उच्यते न नुकथमेकं
सन्नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाती तिभूम्नः कामोश्च ब्रह्मलौकिकान्पश्यन्ड मन इति च विरुद्धं यथैकोपस्मिन्नेव क्षणे
यः पश्यति सन्न स्मिन्नेव क्षणे तान पश्यतिचेतिनैष दोषः श्रुत्यंतरेपरिहृतत्वात् इष्टुरन्यत्वेन कामाभावान्न पश्यतिचेति यदापमुष्ट्ये
नद्रष्टुम्पत्यपि सर्वकत्वात्समानोद्विनी याभावः केनकं पश्येदिति वीक्षयेवाऽशरीरस्वरूपोपहतपाप्मादिलक्षणः सकयमेषपुरु
षोक्षिणि दृश्यत इत्युक्तः प्रजापतिना तत्र यथासावक्षिणि साक्षाद्दृश्यते तद्वक्तव्यमितीदमारभ्यते तत्रकोहेतुरक्षिण्युपदर्शनस्य
हेतुर्दर्शनः प्रयोगस्य एतेवाऽस्य प्रयुज्यन्तइति प्रयोक्तोबलीवर्दोवा यथालोके ऽस्य चरानेन तेषाचररतोरथोनोवातस्मिन्नाच
रणोपुरुक्तः स्याद् कर्षणाय यैवमस्मिन् शरीरे रथं कोयेपाणाः यंच वृत्तिरिंद्रियमनोबुद्धिसंयुक्तः प्रज्ञात्माविज्ञानक्रियाशक्तिद्वय
संमूर्च्छितात्मायुक्तः स्वकर्मफलोपभोगनिमित्तं नियुक्तः कस्मिन्न अहमुक्तं तत ऊर्ध्वं तो भविष्यामि कस्मिन्वा प्रतिष्ठितेप्रष्ठास्यामीतिई
श्वरेणारायाः इवसर्वाधिकारिदर्शनश्रवणाच्चेष्टाव्यापारे धिकृत तत्संवेदनमात्रेकदेशश्चक्षुरिंद्रियंरूपोपलब्धिद्वारमतेस्त्रयथ

द्रष्टुर्दृष्टेर्विपरिलोपात्पश्यन्नेवभवति

राम०
१२८

यत्र कृष्णतारोपलक्षितमाकाशं देहच्छिद्रमनुविषण्णं अनुषक्तमनुगतं तत्र स प्रकृत आत्मा शरीर आत्मा चक्षुषि भवतीति चाक्षुषः चक्षुषि भव
इति चाक्षुषस्तस्य दर्शनाय रूपोपलब्धये चक्षुःकरणं यस्य नदेहादिभिः संहतत्वात् परस्य हेतुरर्थोः साधयन्नसौ अत्र च चक्षुषि दर्शनेन लिंगेन
दृश्यते परोऽशरीरो ऽहमसंहतो क्षित्यादि दृश्यत इति प्रजापतिनोक्तं सर्वेंद्रियद्वारोपलक्षणार्थं सर्वविषयोपलब्धिर्हितस्य एव वेत्ति स्फुटे
यलक्षितेनुक्तं लक्षणीतिविशेषवचनं सर्वश्रुतिषु मद्दर्शनमिति तिनस्तदर्थंमवतीति च श्रुतेरथापि योऽस्य हेहे वेदकथामि दं सुगंधं दुर्गं
धिंवा जिघ्राणीति सस्य गंधंविजानीयामिति सआत्मा तत्स्यंधाय गंधाविज्ञानाय घ्राणम्‌ अथयो वेदे दं वचनमभिव्याहराणीति वा दर्शा
तिसआत्मा मिव्याहरणाक्रियासिद्धये करणं वागिंद्रियं अथयोवेदं शृणवानीतिसआत्मा श्रवणाय श्रोत्रं अथयोवेद इदं मन्वानीति म
ननव्यापारमिंद्रियासंप्रयुक्तं केवलं मन्वानोतिवेद स आत्मा योवेद सआत्मेत्येवं सर्वत्र प्रयोगाद्धेदेनमस्तस्वरूपमित्येवगम्यते। य
थाऽयं पुरस्तात् प्रकाशयति सआदित्यो योदक्षिणतो यः पश्चाद्य उत्तरतो यत्तु द्वर्ध्वं प्रकाशयत्यादित्य इत्युक्ते प्रकाशस्वरूपः स इति गम्य
ते दर्शनादिक्रियानिवृत्तये नतु चक्षुरादि करणानीदं वास्यात्मनः सा मर्थ्यादवगम्यते आत्मनः सत्तामात्र एवज्ञानकर्तृत्वं
नतु व्यापततन यापथास विनुः सत्तामात्र एव प्रकाशनकर्तृत्वं नतुव्यापृतत्वं तस्येतिः तद्वन्मनो स्यात्मनो दैवमप्राकृतमितरेंद्रियैरसा
धारणं चक्षुः चह्येय पश्यतेनेनतिच तत्तुवर्तमानकालविषयाणि चेंद्रियाण्यतो दैवमितनातानि मन त्रिकालविषयोपलब्धिकारणंम
दितदोषं च सूक्ष्मव्यवहितादि सर्वोपलब्धिकारणं चेति दैवं च सुरत्वात्स वै मुक्तः स्वरूपापन्नो विद्याकृत देहे दें द्रियमनोविमुक्तः
सर्वात्मभावमापन्नः सन्नेषव्योमवच्छुद्धः स्वर्वेश्वरो मनउपाधिः सन्नेतेन दैवेश्वरोणामनसेनात्मकामान्सवितप्रकाशवन्नित्यप्रतनेन

छां० भा०
१२८

नरकेणेव प्रपन्नं मन्यते कान्कामानिति विशिनष्टि य एते ब्रह्मलोके एते ब्रह्मणा लोके ब्रह्मलोके हिरण्यगर्भे इति विद्याविषयासंसारे तेनापिहिताः संकल्पमात्रलभ्याः नित्यसिद्धा यस्मादेवं द्वौ प्रजापतिनोक्त आत्मा तस्मात् तं वै एतं देवाः आत्मानमुपासते तेन ह्युपासनाद्धेतोस्तेषां सर्वे च लोका आत्ताः प्राप्ताः सर्वे च कामाः यदर्थं हीन्द्र एकशतं वर्षाणि प्रजापतौ ब्रह्मचर्यमुवास तत्फलं प्राप्तं देवैरित्यभिप्रायः तद्गुणत्वेन चेदानीन्तना अपि मनुष्याणां मध्ये जीवितवान् मन्दतरप्रज्ञालाभात् संभवतीति प्राप्तौ द्वौ मनुष्यते स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् इदानींतनोऽपि कोऽसौ विदुरिव घतमाला न मनुविद्य विजानाति इति ह स्माह तेन किल प्रजापतिरुवाच प्रजाः सर्वेषां मात्मज्ञानेन फलप्राप्तिरनुष्ठेयमभवतीत्यर्थो द्विर्वचनं प्रकरणसमाप्त्यर्थं ॥ १२ ॥ ॥ श्यामाच्छबलं प्रपद्य

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीत्यभिसंभवामीति ॥ १३ ॥

श्यामादिमन्त्राम्नायः पावनो जपार्थश्च ध्यानार्थो वा श्यामो गम्भीरो वर्णः श्याम इव श्यामो हार्दं ब्रह्मात्यन्तदुर्विगाह्यत्वात् हार्दं ब्रह्म ज्ञात्वा ध्यानेन तस्मात् श्यामाच्छबलं शबल इव शबलोऽरण्याद्यनेककामामिश्रत्वात् ब्रह्मलोकस्य शाबल्यं तं ब्रह्मलोकं शबलं प्रपद्ये मनसा शरीरपाते वा गच्छेयं यस्मादहं शबलाद्ब्रह्मलोकान्नामरूपव्याकरणाय श्यामं प्रपद्ये हार्दं भावं प्रपन्नोऽस्मीत्यभिप्रायोऽतस्तमेव प्रकृतिस्वरूपमात्मानं शबलं प्रपद्ये इत्यर्थः कथं शबलं ब्रह्मलोकं प्रपद्य इत्युच्यते अश्व इव स्वानि लोमानि विधूय कम्पनेन श्रमं पांस्वादि च रोमतो पातयत्येवं हार्दब्रह्मज्ञानेन विधूय पापं धर्माधर्माख्यं चन्द्र इव राहुग्रस्तस्तस्माद्राहोः प्रमुच्य भास्वरो भवति यथैवं धूत्वा प्रहाय शरीरं सर्वानर्थाश्रयमिहैव ध्यानेन कृतात्मा कृतकृत्यः सन्नकृतं नित्यं ब्रह्मलोकमभिसंभवामीति द्विर्वचनं मन्त्र

आकाशो वै इत्यादि ब्रह्मणो लक्षणनिर्देशार्थमाम्नायः आकाशो वै नाम श्रुतिषु प्रसिद्ध आत्मा आकाश इवाशरीरत्वात् सूक्ष्मत्वाच्च स चाकाशः नामनामरूपयोः स्वात्मस्थयोर्जगद्बीजभूतयोः सलिलस्येव फेनस्थानीययोर्निर्वहिता निर्वोढा व्याकर्तेति नामरूपयोरन्तरा यस्य ब्रह्मणो ते नामरूपे यदन्तरा यन्मध्यवर्तिनी ते यो वा नामरूपयोरन्तरा मध्ये यन्नामरूपाभ्यामस्पृष्टं यदित्येतत् तद्ब्रह्म नामरूपविलक्षणं नामरूपाभ्यामस्पृष्टं तथापि तयोर्निर्वोढृ एवं लक्षणं ब्रह्मेत्यर्थः इदमेव चामृतं यो ब्रह्मणो नोक्तश्चिन्मात्रानुगमात् सर्वत्राविस्वरूपं नेव विगम्यते एवं ब्रह्माकाशो नाम कथं नरकवद्गम्यत इत्याह स आत्मा स आत्मा हि नाम सर्वजन्तूनां प्रसिद्धोऽनन्तः स्वसंवेद्यः प्रसिद्धः तेनैव रूपेणालोक्यो

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्येतमदत्कमदत्कं श्येतं लिन्दु माभिगां लिन्दु माभिगां ॥ १४ ॥

शरीरो यो मत्वा सर्वं गतमात्मानं ब्रह्मैव सगुणं ब्रह्मविन्नमरणधर्मा तज्ज्ञं मन्त्रं प्रजापतिश्चतुर्मुखस्तस्य सभां वेश्म प्रभुविमितं वेश्म प्रपद्ये गच्छेयं किं च यशोऽहं यशो नाम आत्माहं भवामि ब्राह्मणानां ब्राह्मणा एव हि विशेषतस्तमुपासते तत्र स्तेषां यशो भवामि तथा राज्ञां विशां च तेऽप्यधिकृता एवेति तेषामप्यात्मा भवामि तद्यशोऽहमनुप्रापत्सि प्राप्तुमिच्छामि स हाहं यशसामात्मनां रेहे द्वियमनोबुद्धिलक्षणानामस्मायपृः किमर्थमहमेवं प्रपद्य इत्युच्यते श्येतं वर्णतः पक्वबदरसमं रोहितं स्त्रीचिह्नं यो निपूर्वं तत्किल दन्तरहितमप्यदत्कं भक्षयितृ तेजोबलवीर्यविज्ञानधर्माणामपहन्तृ विनाशयितृ इत्येतत् सेविनोऽस्त्रीव्यंजनं यदेवं लक्षणं श्येतं लिन्दु पिच्छिलं तन्माभिगां माभिगच्छेयं द्विर्वचनमत्यन्तानर्थहेतुत्वप्रदर्शनार्थं ॥ १४ ॥

तद्धैतदात्मज्ञानं सोपकरणमोमित्येतदक्षरमित्याद्यैः सहोपासनैस्तद्वाचकेनग्रंथेनाष्टाध्यायलक्षणेन सह ब्रह्मा हिरण्यगर्भः परमे
श्वरो वा तद्द्वारेण प्रजापतये कश्यपायोवाचासावपि मनवे स्वपुत्राय मनुः प्रजाभ्य इत्येवं श्रुत्यर्थसंप्रदायपरंपरयागतमुपनिषद्वि
ज्ञानमद्यापि विद्वत्सु वर्तते यथेह षष्ठाध्यायत्रयप्रकाशितानां विद्यानां सफलावगम्यते तथा कर्मणां न कश्चनार्थ इति प्राप्ते न
दानर्थक्यप्राप्तिः ... विशेषेयं कर्मणां कर्मविद्भिरनुष्ठीयमानस्य विशिष्टफलवत्त्वेनार्थवत्त्वमुच्यते॥ आचार्यकुलाद्वेदमधीत्यस...

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गु
रोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदध॥

यथोध्ययनं कृत्वा यथाविधानं यथास्मृत्युक्तैर्नियमैर्युक्तः सन्नित्यर्थः सर्वस्यापि विधेः स्मृत्युक्तस्योपकुर्वाणकं प्रति कर्तव्यत्वेन गुरु
शुश्रूषायाः प्राधान्यप्रदर्शनार्थमाह गुरोः कर्म यत्कर्तव्यं तत्कृत्वा कर्मशून्यो यो ऽतिशिष्टः कालस्तेन कालेन वेदमधीत्येत्यर्थः एवं हि नियम
वताधीतो वेदः कर्मज्ञानफलप्राप्तये भवति नान्यथेत्यभिप्रायोऽभिसमावृत्य धर्मजिज्ञासां समापयित्वा गुरुकुलान्निवृत्य न्या
यतो दारानाहृत्य कुटुंबे स्थित्वा गार्हस्थ्ये विहिते कर्मणीति शेषः ... न त्वापि गार्हस्थ्ये विहितानां कर्मणां स्वाध्यायस्य प्राधान्यप्रद
र्शनार्थमुच्यते शुचौ विविक्ते ऽमेध्यादिरहिते देशे यथावदासीनः॥

त

दि

सिकलेधांदोगभाष्यं

स्वाध्यायमधीयानो नैत्यकमधिकं च शक्तितः ऋगाद्यभ्यासं च कुर्वन् धार्मिकान्पुत्रान्शिष्यांश्च धर्मयुक्तान्विदधद्धार्मिकत्वेन तान्नियमय
न्नात्मनि स्वहृदये हृदि ब्रह्मणि सर्वेन्द्रियाणि संप्रतिष्ठाप्योपसंहृत्येन्द्रियग्रहणात्कर्माणि च संन्यस्याहिंसन्हिंसां परपीडामकुर्वन्सर्वभू
तानि स्थावरजंगमानि भूतान्यपीडयन्नित्यर्थः भिक्षानिमित्तमटनादिना परपीडा स्यादित्यत आहान्यत्र तीर्थेभ्यस्तीर्थं नाम शास्त्रानुज्ञावि
षयस्ततोऽन्यत्रेत्यर्थः सर्वाश्रमिणां चैतत्समानं तीर्थेभ्योऽन्यत्राहिंसैवेत्यन्ये वर्णयन्ति कुटुंबे चैव तत्सर्वं कुर्वन्खल्वयं यावदायुषं

दात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभि
संपद्यते न च पुनरावर्तते न च पुनरावर्तते १५ इति छांदोग्योपनिषद्यष्टमप्रपाठकः समाप्तोयं ग्रंथः ॥

यावज्जीवमेवं यथोक्तेन प्रकारेण वर्तते यन् ब्रह्मलोकमभिसंपद्यते देहांते न च पुनरावर्तते पुनरावृत्तेः शरीरग्रहणाय प्राप्तायाः
प्रतिषेधात् अर्चिरादिमार्गेण कार्यं ब्रह्मलोकमभिसंपद्यते मुच्यते न तेनावर्तते पुनः तस्मादागमनमेशंका गमनादितो यावद्ब्रह्मलो
कस्थितिस्तावत्तत्रैव तिष्ठति प्राक्ततो नावर्तत इत्यर्थः द्विरभ्यासोऽध्यायसमुपनिषत्परिसमाप्त्यर्थः ॥१५॥ इति श्रीछांदोग्योपनिषद्भाष्ये अ
ष्टमः प्रपाठकः समाप्तः ॥ ॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशंकरभगवतः कृतं छांदोग्योपनि
षद्भाष्यं समाप्तं ग्रंथसंख्या ५०७०० ॥

264

265